CC-0. In Public Domain. Digitization by eGangotri

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS.

No. 15

(PART II)

THE

TRIPURĀ RAHASYA

GOVERNMENT SANSKRIT LIBRARY

BENARES.

1927.

Saleable at half of the printed price.

[Rs. 2-4-0.]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री ५ को सरकार
नेपाल राजकीय ... महाविद्यालय
काठमाडौं
२०१६

९५२८

रत्न पुस्तक भंडार,
भोटाहिटी (नेपाल)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री
नेपाल राज
काठमाडौं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS

No. 15

(Part II)

—o—

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

THE

TRIPURĀ RAHASYA

(JÑĀNA KHAṆḌA)

Printed by Jai Krishna das Gupta

At the Vidya Vilas Press, Gopal Mandir Lane,

Benares City.

1927

CHOWKHAMBA SANSKRIT PUSTAKALAYA P. BOX 8, BENARES

Saleable at half of the printed price.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सटीकं

त्रिपुरारहस्यम्

(ज्ञानखण्डम्)

... राजकीय ... महाविद्यालय
काठमाडौं
२०१६
नं ५२४

The

TRIPURĀRAHAṢYA

(JÑĀNA KHAṆḌA)

With Commentary

Edited with Introduction

BY

GOPI NATH KAVIRAJ, M. A.,
Principal, Government Sanskrit College Benares.
and
Nārāyaṇa S'āstrī Khiste Sāhityāchārya
Assistant Librarian, Saraswati Bhawan, Benares.

1927

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपुरारहस्यम्

[illegible]

TRIPURARAHASYA

[illegible]

[illegible]

GOPINATH KAVIRAJ, M.A.

Principal, Government Sanskrit College

and

[illegible]

Librarian, Sarasvati Bhavana, Benares

MAHENDRA SANSKRIT UNIVERSITY

Acc. No. 728

25
Gop
1927

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रं ५२८

अश्रद्धस्तरुणः पत्न्यां कथं स सुखमेधते ।
तथापत्येषु स्थविरः कथमियात् सतीं गतिम् ॥ २६ ॥
अश्रद्धो वा भुवं कस्माद् विकर्षेत् कर्षकः किल ।
न प्रवृत्तिर्भवेत् क्वापि त्यागे वा सङ्ग्रहेऽपि वा ॥२७॥
श्रद्धावैधुर्ययोगेन विनश्येज्जगतां स्थितिः ।
एकान्तग्रहणाल्लोकप्रवृत्तिरिति चेच्छृणु ॥ २८ ॥
एकान्तग्रहणे वापि श्रद्धा कस्मात् प्रतिष्ठिता ।

मयि निद्रिते मामियं न हन्यादिति पत्न्यां श्रद्धामकुर्वतो विपरीतसम्भावनोदयात् सुखं न स्यात् । एवं स्थविरोऽपि । सतीं गतिं सुखस्थितिम् ॥ २६ ॥ अश्रद्धस्य न क्वापि प्रवृत्तिः स्यात् इष्टसाधनत्वनिश्चयासम्भवादित्याह-अश्रद्ध इति ॥ २७ ॥ प्रवृत्त्यभावे इष्टापत्तिरिति चेन्नैवमित्याह-श्रद्धेति । श्रद्धावैधुर्यं श्रद्धाभावः तद्योगेन तत्सत्त्वेन हेतुना प्रवृत्त्यभावे साधिते सति इति शेषः । जगतां प्राणिनां स्थितिः सुखाद्यनुभवात्मा व्यवहारः । नश्येन्नाशः सम्भवेत् । प्रत्यक्षसिद्धा जगत्स्थितिरपन्होतुं न शक्या । अतस्तन्मूलभूतश्रद्धासिद्धिरिति भावः । ननु न जगत्स्थितिनिमित्तप्रवृत्त्यन्यथानुपपत्त्या श्रद्धासिद्धिः प्रवृत्तेरन्यथासिद्धेरित्याह-एकान्तेति । एकान्तग्रहणात् व्याप्तिग्रहादित्यर्थः । कर्षकः भूविकर्षणे कृतेऽकृते च धान्यप्राप्तिमप्राप्तिञ्च भूयो गृहीत्वा कर्षणव्याप्तिं धान्यप्राप्तौ विनिश्चित्य कर्षणे प्रवर्त्तते न श्रद्धया प्रवर्त्तत इति भावः । अत्राह-शृण्विति ॥२८॥ श्रद्धा नाम सम्भावनात्मा निश्चयः इदमित्थमेव स्यादिति । एवं सति एकान्तग्रहणे वा श्रद्धा तत्र कथं प्रतिष्ठिता स्थिता ।श्रद्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राप्येकान्तशरणः श्रद्धाशरण एव हि ॥ २९ ॥
तस्माच्छ्रद्धामृते लोकोऽवसीदेदश्वसन् ध्रुवम् ।
तस्माच्छ्रद्धां दृढां प्राप्य सुखमात्यन्तिकं व्रज ॥३०॥
श्रद्धाऽवरे न कार्येति मन्यसे यदि तच्छृणु ।
इयञ्च श्रद्धयैवास्ते प्रवृत्तिर्नृपतेः सुत ॥ ३१ ॥
तत् कथं ते प्रवृत्तिः स्यादिति श्रुत्वा प्रियावचः ।
हेमचूडः प्राह पुनः प्रियां कुशलभाषिणीम् ॥ ३२ ॥
नूनं प्रिये सर्वथैव श्रद्धातव्यं यदा भवेत् ।

मपन्हुवानस्य. तव केषुचित् स्थानेषु कार्यकारणयोः साहचर्यानुभवमात्रेण परोक्षे भाविकार्येऽपि कारणसाहचर्यसम्भावना कुत इत्यभिप्रायः । यद्वा सुखाद्यनुभवरूपफलादपन्होतुमशक्यात् प्रवृत्तिः सिद्धा । सिद्धायां प्रवृत्तौ श्रद्धामूलकत्वं न भवेदेकान्तग्रहणमूलकत्वमेव भवेदिति वा श्रद्धा कुत इति । तत्रापीति । एकान्तग्रहणात् प्रवृत्तिरिति स्वीकारेऽपि । एवं सत्यपि श्रद्धा त्वयाभ्युपगतेति भावः ॥ २९ ॥ यस्माच्छ्रद्धां विना प्रवृत्तिर्न घटते तस्मात् । श्रद्धामृते प्रवृत्त्यभावाल्लोकव्यवहारो नश्येत् । अश्वसन्निति । उच्छ्वासनिश्वासयोस्तन्निरोधे च संशयादप्रवृत्तिः स्यादिति तात्पर्यम् । यस्माच्छ्रद्धां विना व्यावहारिकमपि सुखं न भवेत्तस्मात् । मदुक्तौ श्रद्धां प्राप्य ॥ ३० ॥ ननु श्रद्धा विद्वद्वचनेषु कार्या नावरे निकृष्टे स्त्रीमूढादिवचने इति तदाक्षेपमनूद्य परिहरति–श्रद्धेति । इयमिति । अवरे श्रद्धा न कर्त्तव्येत्यभ्युपगमरूपा प्रवृत्तिरपि श्रद्धयैव भवेदिति भावः ॥ ३१ ॥ ॥ ३२ ॥ यदि श्रद्धा न स्यात्तदा प्रोक्ताभ्युपगमरूपा प्रवृत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धा सत्सु विधातव्या यथा श्रेयः समाप्नुयात् ३३
असत्सु नो विधातव्या श्रद्धा श्रेयोऽभिवाच्छिना ।
अन्यथान्तः सुनिशिते कुटिले बडिशो यथा ॥ ३४ ॥
बहिः समे सुपिष्टेन मीनानां नाशमाप्नुयात् ।
तस्मात् सत्स्वेव कर्त्तव्या श्रद्धा नासत्सु कुत्रचित ३५
असत्सु कृत्वा श्रद्धां ये नाशमीयुः परेऽपि च ।
सत्सु श्रेयोयुजः श्रद्धावशतस्ते निदर्शनम् ॥ ३६ ॥
अतः प्रतीत्यैव युक्ता कर्त्तुं श्रद्धा न चान्यथा ।
तत् कथं ते प्रवृत्तिः स्यादिति प्रश्नः कथं तव ॥ ३७ ॥
इत्युक्ता हेमलेखा सा पुनराह पतिं प्रियम् ।
शृणु राजकुमारेदं प्रोच्यमानं मया वचः ॥ ३८ ॥
यदात्थ त्वं कथं प्रश्न इति तत्र ब्रवीमि ते ।

कथं स्यादित्याह–तदिति । सर्वथा । वरावरत्वविचारं विना । तदा श्रद्धा सत्स्वित्यादि महाजनोक्तवत् मीनानामिव नाशमाप्नुयादिति व्यवहितेन सम्बन्धः ॥ ३३ ॥ ३४ ॥ अन्यथा असति बडिशे । श्रद्धया मीना यं नाशमाप्नुयुः तं नाशमाप्नुयात् । यतोऽसति श्रद्धया नाशः तस्मात् ॥ ३५ ॥ ये मीना इवासत्सु श्रद्धया नष्टाः ये च सत्सु श्रद्धया श्रेयोयुक्तास्ते सर्वे मदुक्तौ निदर्शनम् उदाहरणम् ॥ ३६॥ सदिति प्रतीत्या ज्ञात्वैव श्रद्धा कर्तुं युक्ता । एवं सति तत् कथं ते प्रवृत्तिरिति प्राक्कृतः प्रश्न आक्षेपः कथम् । न सर्वथाहं श्रद्धाप्रतिषेधपरः सत्सु श्रद्धा कार्या नान्यत्रेति सतां महाजनानां वाक्यादेवमहं प्रवृत्त इति भावः ॥ ३७ ॥ ३८ ॥ सत्सु श्रद्धा कार्येति यद्वाक्ये तत्र श्रद्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सन् वा ह्यसन् वायमिति ते निश्चयः कुतः ॥३९॥
सत्यस्मिन् निश्चये भूयाच्छुभं सच्छ्रद्धयेह वै।
सोऽपि लक्षणतः स्याच्चेच्छ्रद्धा लक्षणसङ्गता ॥ ४० ॥
प्रमाणाल्लक्षणज्ञानमिति चेत्तत्र संशृणु।
अश्रद्धस्य प्रमाणं किं भवेत्तत् सुनिरूप्यताम् ॥४१॥
अन्यथा हि प्रमाता नोऽविसंवाद्येत कुत्रचित्।
तस्माच्छ्रद्धां समाश्रित्य लोकः सर्वः प्रवर्त्तते ॥४२॥

सोऽयं पुरुषः सन्नेवेति कथं ते निश्चयः ॥ ३९ ॥ अन्यवाक्येनेति चेदनवस्थेत्यभिप्रेत्याह—सत्यस्मिन्निति। अयं निश्चय एव न घटत इति तात्पर्यम्। सोऽपि। सन्निति। निश्चयोऽपि। लक्षणतः असद्व्यावृत्तिधर्मेण। श्रद्धेति। इदमस्य लक्षणमित्यन्यवाक्येनेदं लक्षणज्ञानं भवितव्यं चेदनवस्था तदवस्थैवेति भावः ॥४०॥ प्रमाणादिति। अन्वयव्यतिरेकाभ्यामित्यर्थः। अश्रद्धस्य प्रमाणं किमिति। अयमाशयः। परे ह्यागमे श्रद्धयैव प्रवृत्तिरुपपद्यते न शुष्कतर्केण। पार्थिवत्वलोहलेख्यत्वयोः सहचारस्य भूयो गृहीतत्वेऽपि हीरके व्यभिचारदर्शनान्न केवलतर्केण किञ्चिज्ज्ञातुं शक्यते इति ॥ ४१ ॥ तस्मात् पुरुषार्थसाधनप्रवर्त्तकमविसंवादिप्रमाणमागमान्नान्यादित्याह—अन्यथेति। सदागमस्यैवान्यप्रमाणानामपि दृष्टत्वाभावसम्भावनया सर्वथाऽविसंवादकत्वे प्रवृत्तः प्रमाता न क्वापि विसंवाद्येत प्रवृत्त्युद्दिष्टफलाप्राप्त्या परिभूयेत। यस्मादन्यप्रमाणानां विसंवादकत्वसम्भावना तस्मात्। सदागमे श्रद्धामाश्रित्यैव कृषीवलोऽपि आगमाश्रयेण सुमुहूर्त्तविघ्ननिरसनादिपूर्वकं प्रवर्त्तते। तत्र च दृश्यमानः क्वचिद्विसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रकारं प्रवक्ष्यामि शृणु निश्चलचेतसा ।
अनवस्थिततर्को वा ह्यतर्को वापि सर्वथा ॥४३॥
श्रेयो न प्राप्नुयाल्लोक इह वापि परत्र वा ।
तत्रातर्कस्य कालेन भवेच्छ्रेयः कदाचन ॥ ४४ ॥
अनवस्थिततर्कस्य न श्रेयः स्यात् कथञ्चन ।
पुरा सह्यगिरौ गोदावरीतीरे हि कौशिकः ॥ ४५ ॥
न्यवसच्छान्तसुमतिर्ज्ञातलोकः सतत्त्वकः ।
तस्य शिष्यास्तु शतशः स्थिता गुरुसमाश्रयात् ॥४६॥
त एकदा गुरुमनुगता लोकस्य संस्थितिम् ।
निर्णेतुं बुद्ध्यनुगुणं तदा प्रोचुः परस्परम् ॥ ४७ ॥

वादो न प्रमाणदोषकृतः किन्तु सामग्रीवैकल्यकृत एव । अ-तएव तस्यैव तत्रैव भूयः सामग्रीसाकल्यसम्पादनाभिमानेन प्रवृत्तिरुपपद्यत इति भावः ॥ ४२ ॥ तत् प्रकारं श्रद्धया श्रेयः-प्राप्तिप्रकारम् । अनवस्थिततर्कः शुष्कतर्कवान् । अतर्को मूढः ॥ ४३ ॥ श्रेयो नेति । आद्यस्यानाश्वासेनाप्रवृत्तेः । द्वितीयस्य सामग्रीवैकल्यसम्भवात् । अन्धप्रक्षिप्तलोष्टाघातेन फलपातवद्द्वि-तीयस्य श्रेयः कदाचित् सम्भाव्येत इत्याह–तत्रेति । तयोर्म-ध्ये इत्यर्थः ॥ ४४ ॥ अनवस्थिततर्कस्य श्रेयो न कथञ्चिदि-त्यत्रेतिहासमाह–पुरेति ॥ ४५ ॥ शान्तश्चासौ सुमतिश्च । कामाद्यनाहतस्वभावः श्रद्धाभक्तिप्रचुरमतिश्च । अतएव ज्ञात-लोकसतत्त्वकः । लोक्यते दृश्यते इति लोको दृश्यम् । दृश्यस्य हि परं तत्त्वं यत्प्रकाशः परः शिव इत्यागमरीत्या अधिष्ठान-प्रकाशमात्रं सतत्त्वं स्वरूपं ज्ञातं येन ॥ ४६ ॥ ते शिष्याः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राजगाम शुङ्गाख्यो विप्रः कश्चिन्महाबुधः ।
स सर्वेषां मतं प्रोक्तं दूषयद्बुद्धिकौशलात् ॥ ४८ ॥
अश्रद्धया हतप्रज्ञो विवादनिपुणस्तदा ।
प्रमाणात् प्रमितं सत्यमित्युक्तेषु द्विजेष्वथ ॥ ४९ ॥
अनवस्थिततर्को वै प्राह तर्कैकसंश्रयः ।
शुङ्गाख्य आक्षिपन् सर्वान् तत्र वादकथान्तरे ॥५०॥
विप्राः शृणुध्वं मद्वाक्यं सत्यं न क्वापि सिध्यति ।
प्रमितं यत् प्रमाणेन तत् सत्यमिति हीरितम् ॥५१॥

गुरुमनु पश्चात् । गुरोः परोक्ष इति यावत् । लोकस्य स्थितिं निर्णेतुं गताः सङ्गताः सन्तः तदा तन्निर्णयाय स्वबुद्ध्यनुगुणं यथा तथा परस्परं प्रोचुः ॥ ४७ ॥ तत्र कौशिकशिष्यसमाजे । महाबुधः शुष्कतर्कनिपुणः । यद्वा महांश्चासावबुधश्च अज्ञात-लोकसतत्त्व इति भावः । सः शुङ्गः । सर्वेषां कौशिकशिष्याणाम् । बुद्धिकौशलात् । नागमानुरुद्धयुक्त्याऽदूषयत् किन्तु केवलं बुद्धिकौशलात् शुष्कतर्कैरिति भावः ॥ ४८ ॥ कुतस्तस्यागमानादर इति चेदाह—अश्रद्धयेति । अतएव विवादनिपुणः सन् वितण्डामाश्रित्येति यावत् । तदा कौशिकशिष्याणां दृश्यतत्त्वनिर्णयोपयुक्तकथाकाले । निर्दुष्टप्रमाणप्रमितं सत्यमिति तेषूक्तेषु । अथाहेत्यन्वयः ॥ ४९ ॥ अनवस्थिततर्कः शुङ्गाख्यः । शुष्कतर्काश्रयः । वादकथान्तरे । जल्पवितण्डाभिन्नकथामध्ये ॥ ५० ॥ शुङ्गवाक्यं विप्रा इत्यादि । भवद्भिर्यत् साध्यते सत्यं न तत् क्वापि कालत्रयेऽपि सिध्यतीत्याक्षेपः । प्रमितमित्यादिकौशिकशिष्यमतानुवादः । इति हि भवद्भिरीरितम् ॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र तेन दोषयुजा भवेदप्रमितं ननु ।
निश्चेतव्या ततस्त्वादौ प्रमाणानामदुष्टता ॥ ५२ ॥
सा प्रमाणान्तरकृता तत्राप्येवं विचिन्त्यताम् ।
इत्येवमनवस्थानात् न किञ्चित् प्रमितं भवेत् ॥ ५३ ॥
अतः प्रमाता प्रमितं प्रमाणं वा न सिध्यति ।
तस्माच्छून्याश्रयो ह्येष विकल्पो विविधः स्थितः ॥५४॥
सोऽपि शून्यात्मतां प्राप्तः प्रमाणाविषयत्वतः ।

—— ——

तत्र प्रमाणेषु मध्ये दोषयुक्तप्रमाणेन भातमप्रमितमसत्यं ननु । अत आदौ सत्यासत्यपरीक्षकेण प्रमाणानामदुष्टता निश्चेतव्येत्याह–निश्चेतव्येति । नहि भासनमात्रेण सत्यत्वं कस्यचित् शुक्तिरजतादेः सत्यत्वप्रसङ्गात् । अतः अदुष्टप्रमाणप्रमितस्यैव सत्यत्वात् प्रमाणादुष्टत्वनिश्चयाधीन एव भावसत्यत्वनिश्चय इति भावः ॥ ५२ ॥ प्रमाणादुष्टत्वनिश्चयोऽपि प्रमाणान्तराधीन इत्यनवस्थया मूलक्षतिकर्या न क्वचित् सत्त्वं सिध्यतीत्याह–सप्रमाणेति ॥ ५३ ॥ अतः प्रमाणादुष्टत्वानिश्चयात् । प्रमितं दृश्यम् । सत्यं न सिध्यति । तस्मात् सत्यत्वासिद्धेः । अहमिदं चक्षुषा पश्यामीत्यादि विविधो विकल्पः शून्यालम्बन एव । न चानुमानादिप्रमाणैरभिमतसिद्धिः उक्तदोषग्रस्तत्वात् तेषां प्रत्यक्षोपजीव्यत्वाच्च । न च शून्यं वा तव कथं सिद्ध्यतीति वाच्यम् । शून्यसिद्धौ प्रमाणव्यापारानुपयोगात्, इतरासिद्धिमात्रात्मकत्वात् तस्येति ॥ ५४ ॥ अतएवाह–सोऽपीति । शून्यपदार्थोऽपि शून्यतां प्राप्तः निश्चितादुष्टप्रमाणाविषयत्वात् । तस्मात् शून्यमिति न किञ्चिद्वस्तु स्यादितरासिद्धिमात्रात्मक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माच्छून्यं न किञ्चित् स्यादित्येष प्रविनिर्णयः ॥५५॥
इति शुङ्गवचः श्रुत्वा तेषु केचिद्द्विजाधमाः ।
तं श्रिता निश्चयाभासं बभूवुः शून्यवादिनः ॥ ५६ ॥
विनाशमीयुस्तन्निष्ठाः शून्यभावं परंगताः ।
ये द्विजाः सारहृदयाः ते शुङ्गस्य प्रभाषितम् ॥ ५७ ॥
निरूप्य कौशिके तेन समाहितहृदोऽभवन् ।
तस्मात् सर्वात्मना त्यक्त्वा तर्कं तमनवस्थितम् ॥५८॥
सदा सदागमायत्ततर्कः श्रेयः समाप्नुयात् ।
इति प्रोक्तो हेमचूडः प्रिययात्यन्तधीरया ॥ ५९ ॥
पुनः पप्रच्छ चात्यन्तविस्मितस्तां महाशयाम् ।

त्वात् तस्य । यद्वा ननु प्रमातृप्रमाणप्रमेयासिद्धावपि विकल्प-धारायाः स्वप्रकाशायाः सत्त्वान्न शून्यमात्रशेष इति चेदाह—सोऽपीति । विकल्पोऽपीत्यर्थः । तस्यानवस्थया प्रमाणान्तराविषयत्वात् स्वप्रकाशत्वे कर्तृकर्मभावविरोधात् सोऽपि शून्यात्मतां प्राप्तः । तस्माद्विकल्परूपमपि सन्न सिध्यतीति शून्यमेवेति प्रविनिर्णयः ॥५५॥ तेषु कौशिकशिष्येषु मध्ये । द्विजाधमाः असारहृदयाः । तं शुङ्गसिद्धान्तम् ॥५६॥ सर्वस्य शून्यतानिश्चयेन स्वात्मानमपि शून्यं मन्यमानाः शून्यभावं स्थावरतां प्राप्ताः । न त्वभावरूपतां गताः । वस्तुतो भावस्याभावत्वानुपपत्तेः । सारहृदयाः । सारं विचारपरं हृदयं मनो येषाम् ॥ ५७ ॥ तेन कौशिकोक्तेन । शङ्काया नाशात् समाहितहृदः । यतोऽनवस्थिततर्कस्यानर्थसम्पत्तिः तस्मात् ॥ ५८ ॥ सदागमस्यायत्तोऽनुकूलः तर्को यस्य । धीरया पण्डितया ॥ ५९ ॥ असम्भाव्यमानां योषिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो प्रिये ते वैदुष्यमीदृशं नाविदं पुरा ॥ ६० ॥
धन्यासि त्वमहञ्चापि धन्यो यस्त्वामुपागतः ।
ब्रवीषि श्रद्धया सर्वं श्रेयःसिद्धिर्हि तत् कथम् ॥६१॥
कुत्र श्रद्धा विधातव्या कुत्र वा सा न शस्यते ।
आनन्त्यादागमानां वै विरुद्धार्थसमाश्रयात् ॥ ६२ ॥
आचार्यमतभेदाच्च व्याख्यातृमतभेदतः ।
स्वबुद्धेरनवस्थानात् किमादेयं न वापि किम् ॥ ६३ ॥
यद्यस्याभिमतं तत् स वदत्येव सुनिश्चितम् ।
अन्यच्चाप्यव्यवसितं हानिप्रदमपि प्रिये ॥ ६४ ॥

विद्वत्तां दृष्ट्वा विस्मितः ॥ ६० ॥ उपागतः सङ्गतः ॥ ६१ ॥ आगमे श्रद्धा विधेयेत्युक्ते आगमानामप्यनैक्यात् कुत्र श्रद्धा कर्त्तव्येति पृच्छति–कुत्रेति । सा; श्रद्धा । अनैक्येऽप्यागमानामर्थैक्याद्यत्र क्वचिच्छ्रद्धां कुर्विति चेदाह–विरुद्धेति ॥ ६२ ॥ न विरुद्धार्थत्वं बौद्धार्हतवेदाद्यागमानामेव परस्परम् । अपि तु एकैकागमेऽपि आचार्यमतभेदादपि विरोध इत्याह–आचार्येति । स्पष्टञ्चैतत् । तथाहि । वैदिकाद्यागमाचार्याणां जैमिनिपतञ्जलिप्रभृतीनां परस्परं मतविरोध इति । तथा जैमिनिशास्त्रव्याख्यातॄणां शावरकुमारिलप्रभृतीनां परस्परं व्याख्याविरोधः । नन्वेवं परस्परविरोधेऽपि स्वबुद्ध्या विचार्य यच्छ्रेष्ठं तच्छ्रद्धेयमिति चेदाह–स्वबुद्धेरिति । विचारो हि तर्करूपः । तथा सति तर्कस्य बुद्धिविभवत्वेन बुद्धेः कालभेदेन स्थितिभेदादेकस्यैव पुरुषस्य कालभेदेन विविधतर्कसम्भवादनवस्थानमिति भावः ॥६३॥ आचार्यादिपरस्परविरोधमेवाह–यदिति । तत् साधनत्वेन वदति । अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैवं सति नैवान्तं कश्चिदत्रापि गच्छति ।
यः शून्यमाह तत्त्वं सोऽप्यशून्यं दूषयेत् परम् ॥६५॥
अश्रद्धेयं कुतो वा तत् सङ्गतं चागमेन हि ।
एतद् ब्रूहि प्रिये सम्यग् न ह्येतत्तेऽस्त्यचिन्तितम् ६६

इति श्रीम० ज्ञानखण्डे हेमचूडोपाख्याने श्रद्धा-
प्रशंसनं नाम षष्ठोऽध्यायः ।

न्यत् । अनभिमतम् अव्यवसितं साधनत्वेनानिश्चितम् ॥६४॥ तत्र आगमेषु । एवं सति विरोधे सति । अन्तं निश्चयम् । अत्रापि विचारे कृतेऽपि ॥ ६५ ॥ शून्यवादिनापि शुभ्रेन शून्यतत्त्वमुक्तं अशून्यतत्त्ववादो दूषितः, आगमेन च तन्मतं सङ्गतमेव तस्मात्तन्मतं कुतो न श्रद्धेयमेतन्मे वदेत्याह—अश्रद्धेयमिति । यद्यप्येष दुरुद्धराक्षेपः तथाप्येतत्त्वया चिन्तितमस्तीति सम्भाव्यते तव सर्वज्ञकल्पत्वादित्याशयेनाह—न ह्येतदिति ॥ ६६ ॥

इति श्री० व्याख्यायां तात्पर्यदीपिकायां षष्ठोऽध्यायः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पृष्टा हेमलेखा भर्त्रा प्रियतरेण सा ।
प्रोवाच विदुषा सम्यग् विज्ञातलोकसंस्थितिः ॥ १ ॥
शृणु वक्ष्ये प्रियतम स्थिरशान्त समादरात् ।
मनो हि मर्कटप्रायमस्थिरं सर्वदैव तत् ॥ २ ॥
यत एवं महानर्थं प्राप्तवान् प्राकृतो जनः ।
चलन्मनः सर्वदुःखनिदानं दृष्टमेव हि ॥ ३ ॥
यतः सुषुप्तौ चलनाभावाद्विन्दति वै सुखम् ।
तस्मान्मनः स्थिरीकृत्य शृणु यत्ते ब्रवीम्यहम् ॥ ४ ॥
अनादरेण श्रुतश्च भवेदश्रुतसम्मितम् ।
अफलं स्यात्तदत्यन्तं यथा चित्रतरुश्रयः ॥ ५ ॥

अत्राध्याये वेदपद्यैः श्रद्धापौरुषतर्कतः ।
शिवं ज्ञात्वाराध्य ततो लभेच्छ्रेय इतीर्यते ॥ १ ॥

विज्ञाता लोकस्य संस्थितिराधिष्ठानं वा यया ॥ १ ॥ स्थिरस्वान्तोऽनन्यचित्तः । समादरात् इदं मया श्रोतव्यमेवेत्यभिनिवेशात् । एतद्द्वयस्यापि क्रमेण फलमाह–मन इति । न स्वभावतो मनसः स्थैर्यमिति भावः । यत एवं तत् तस्मात् स्थिरः स्वान्त इति योजना ॥ २ ॥ तदस्थैर्येण किं मे भवेदिति चेदाह–यत इति । मनसश्चलनादित्यर्थः ॥ ४ ॥ मनसश्चलनादेव दुःखमिति व्यतिरेकतो दर्शयति–यत इति । सर्वोऽपि विन्दति । तस्मादिति । नित्यप्राप्तस्वरूपसुखफलविघटकस्य मनश्चलनस्य श्रवणफलविघटकत्वं सुतरां भवेदिति तात्पर्यम् ॥४॥ अनादरेण श्रुतम् । अश्रद्धया असमाहितमनसा आपाततः श्रुतम् अफलमिति । नास्ति फलं यस्य तत् । न ह्येतद्वक्ष्यमाणं गान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनवस्थिततर्कत्वमपहाय विनाशनम् ।
सत्तर्कमाश्रित्य जनः प्राप्नुयात् सुफलं द्रुतम् ॥ ६ ॥
सत्तर्कसंश्रयेणाशु साधनैकपरो भवेत् ।
सत्तर्कजनितां श्रद्धां प्राप्येह फलभाङ् नरः ॥ ७ ॥
अनवस्थिततर्कं तं विहायालोकय प्रिय ।
प्रवृत्तिमेतां जगतः श्रद्धया फलशालिनीम् ॥ ८ ॥
सुतर्कितेन कालेन कर्षकः क्ष्मां विकर्षति ।
श्रद्धयैव तथा रूप्यस्वर्णरत्नौषधादिकम् ॥ ९ ॥

मित्र श्रुतिमात्रेण फलावहं—किन्तु मननादिद्वारेण । तथा चादराभावे मननादावप्रवृत्तेः । चित्रलिखितवृक्षाश्रयवत् व्यर्थं श्रवणं स्यादिति भावः । तत् श्रवणम् ॥ ५ ॥ ६ ॥ ननु मम शुष्कतर्कं सन्त्यज्य त्वदुक्तौ विश्रब्धस्यापि सत्तर्कपरस्य न फलप्राप्तिर्दृश्यते इति चेदाह—साधनैकपर इति । नन्वलं सत्तर्केण कुतर्कस्यापि मे साधनपरत्वेनैव फलं भवेदिति चेदाह—सत्तर्केति । कुतर्कस्य वक्ष्यमाणसत्तर्कमूलकेश्वरसिद्धेर्दुर्घटत्वेन तदाराधनश्रद्धा दूरतोऽपास्तेति केवलाराधनस्याश्रद्धया हुतं दत्तम् । न च तत् प्रेत्य नो इहेति नीत्या निष्फलमिति सत्तर्कजनितश्रद्धया साधनपर एव फलभाग् भवतीत्याशयः ॥ ७ ॥ तं प्रसिद्धं त्वयि स्थितम् । अनवस्थिततर्करहितानां श्रद्धावतां फलशालिनीं प्रवृत्तिमवलोकय । तत्फलस्य न परोक्षत्वमिति भावः ॥ ८ ॥ तां प्रवृत्तिमेवाह—सुतर्कितेनेति । आगमाविरुद्धस्तर्कः सुतर्कः । शास्त्रोक्तहलप्रवहणयोग्यः तर्कितानावृष्ट्यादिशस्यप्रतिबन्धाभाववांश्च यः कालः तेन निमित्तेन कर्षति । न तु तर्कानवस्थित्या स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्यन्ति सुतर्केण त्यक्त्वा तर्कानवस्थितिम् ।
तस्मात् सुतर्कश्रद्धाभ्यां व्यवस्य श्रेय आत्मनः ॥ १० ॥
प्रयतेत साधनाय नहि तर्कानवस्थितेः ।
विरमेत् पौरुषाद्यत्नाच्छुङ्गानुगनरा इव ॥ ११ ॥
श्रद्धया पौरुषपरो न विहन्यते सर्वथा ।
दृढं पौरुषमाश्रित्य न प्राप्येत कथं फलम् ॥ १२ ॥
पौरुषात् कर्षका धान्यं वणिजो धनमेव च ।
राज्यलक्ष्मीं नृपा विप्रा विद्यां सर्वसुखाश्रयाम् ॥ १३ ॥
शूद्रा भृतिं सुधां देवास्तापसा लोकमुत्तमम् ।
प्रापुरन्येऽप्यभिमतं पौरुषेणैव कर्मणा ॥ १४ ॥
अनवस्थिततर्केणाश्रद्धेन पुरुषेण किम् ।

र्वत्राश्रद्धया त्वयेव तूष्णीं तिष्ठतीति भावः ॥ ९ ॥ तथा पूर्व-समादिदमतिसूक्ष्मलक्षणमपि स्वर्णादिकमेतावन्मौल्यार्हमेवंविध-गुणमेवं रोगहरमिति परीक्षका आगमतर्काभ्यामेव व्यवस्य-न्ति प्रायो न विसंवाद्यन्ते चेत्याह—व्यवस्यन्तीति । सुतर्कः पुरुषः कचिद्विसंवाद्यते न त्वनवस्थितर्कवत् सर्वशून्यत्वेनात्मा-पहारं प्राप्नोतीति यतः तस्मात् । आत्मनः श्रेयो व्यवस्य नि-२ श्रित्य तत्साधनाय यतेदिति सम्बन्धः ॥ १० ॥ शुङ्गानुगता नरा इवासत्तर्केण सर्वशून्यत्वं सम्भाव्य पौरुषयत्नविमुखो न भवेदित्याह—न हीति ॥ ११ ॥ पौरुषं पुरुषयत्नः । फलप्रा-प्त्या न विहन्यते । केषाञ्चित् फलाभावो ह्यदृढपौरुषादित्याह—दृढमिति ॥१२॥ दृढपौरुषयोगान्न फलमिति सप्रत्ययमाह—पौरु-षादिति ॥ १३ ॥ १४ ॥ किञ्चिदपि किं फलं कदा काले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदा किञ्चित् कथं प्राप्तं फलं वद विमृश्य तत् ॥१५॥
क्वचित् फलविसंवादात् सर्वत्राश्वासवर्जने ।
विजानीयाद्दैवहतं तं स्वात्मरिपुरूपिणम् ॥ १६ ॥
अतः पौरुषमाश्रित्य श्रद्धासत्तर्कपोषितम् ।
श्रेयसां यन्मुख्यतमं साधनं तत् समाश्रयेत् ॥ १७ ॥
तत्र दृष्टसाधनानां वैचित्र्यश्च पृथग्विधम् ।
तेषु यत् सर्वथा साध्यं साधयेत् तद्धि मुख्यकम् ॥ १८
तत् सुतर्कानुभूतिभ्यां व्यवस्याशु समारभेत् ।
तत्ते सर्वं प्रवक्ष्यामि सावधानः शृणुष्व तत् ॥ १९ ॥

साधनं विना कथं प्राप्तम् ॥ १५ ॥ ननु कर्षकादीनामपि क्वचित् फलाभावो दृश्यते इति चेत्तावतैवाप्रवृत्तिर्मौर्ख्यमूलैवेत्याह—क्वचिदिति । आश्वासः श्रद्धा ॥ १६ ॥ श्रद्धासत्तर्काभ्यां पोषितम् । सत्तर्केण श्रद्धोदयः श्रद्धया च पौरुषस्य वृद्धिर्भवेदिति भावः । ननु श्रेयःसाधनमपि कर्मयोगादिकं शास्त्रेषु बहुविधं प्रसिद्धं तत्र कतमं साधनं समाश्रयेदिति चेदाह—श्रेयसामिति ॥१७॥ श्रेयःसाधनस्य मुख्यत्वं किन्तदिति चेदाह—तत्रेति । फलप्राप्ताविव्यर्थः । पृथग्विधं दृष्टमिति शेषः । तेषु विचित्रत्वेन पृथग्दृष्टेषु साधनेषु । साध्यं फलं सर्वथा यत् साधयेत् । नेहाभिक्रमनाशोऽस्तीत्यादिनीत्या फलविपर्ययो नेत्युक्तं सर्वथेति ॥१८॥ एतदपि वा कथं निश्चेतव्यमिति चेदाह—तदिति । व्यवस्य निश्चित्य । तत्र नृदेहस्य श्रेयोनिदानस्य दुर्लभस्य मृत्युग्रस्तत्वेनाह—आश्विति । निश्चयो वा मम कथं स्यादिति चेदाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेयस्तद्धि विजानीयाद्यस्माद् भूयो न शोचति ।
शोकः सर्वत एव स्याद् दृश्यते सूक्ष्मया दृशा ॥२०॥
यच्छोकैरनुसंभिन्नं न तच्छ्रेयो हि सर्वथा ।
धनं पुत्रास्तथा दारा राज्यं कोशो बलं यशः ॥ २१ ॥
विद्या बुद्धिर्दर्शनञ्च देहः सौन्दर्यसम्पदः ।
सर्वमेतदस्थिरत्वात् कालसर्पमुखस्थितम् ॥ २२ ॥
शोकाङ्कुरमहाशक्तिबीजात्मकतया स्थितम् ।
कुत आत्यन्तिकश्रेयःसाधनत्वं समर्हति ॥ २३ ॥
अतः परमकं श्रेय एतद्वै मुख्यतो भवेत् ।
एवं धनादिविषये यदादेयत्वविभ्रमः ॥ २४ ॥

तदिति । मुख्यं श्रेयस्तत्साधनं चेत्यर्थः ॥ १९ ॥ तत्रादौ मुख्यं श्रेयःपदार्थमाह—श्रेय इति । ननु तादृशं धनादिकमेवेति चेन्नेत्याह—शोक इति । कथं धनादेः शोक इति चेदाह—विवेकदृशा सर्वतः शोको दृश्यते ॥ २० ॥ तदेवाह—यदिति । अनुसंभिन्नं युतम् ॥ २१ ॥ आन्तरमाह—विद्येत्यादि । दर्शनं करणम् । सौन्दर्यस्य सम्पदः प्राप्तयः । एतत् सर्वं नाशग्रस्तमिति शोकावहत्वाद्दुःखयुतमित्याह—सर्वमिति ॥ २२ ॥ शोकाङ्कुरोत्पादने महाशक्तियुतबीजवत् अङ्कुरशक्तेः साधारणोपायैरनाश्यत्वमिति भावः । तस्मादेवंविधस्य नैवात्यन्तिकश्रेयःसाधनत्वमित्याह—कुत इति ॥ २३ ॥ अतः धनादेः साधनत्वात् । श्रेयः श्रेयःसाधनम् । एतत् वक्ष्यमाणं देवताराधनम् । कथं देवताराधनेनैव श्रेयोलाभ इत्येतन्निरूपयितुमाह—एवमिति । श्रेयःसाधनत्वेनेत्यर्थः । यदिति यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहादेव समुद्भूतो मोहको हि महेश्वरः ।
यो हि सर्वजगत्कर्त्ता तस्मात् सर्वे हि मोहिताः ॥२५॥
मोहयत्यल्पकोऽपीह विद्याभागसमाश्रयात् ।
कांश्चिदेव न सर्वान् स यस्माद्विद्या हि सा मिता ॥२६॥
अल्पविद्यं मायिनश्चाप्यनुत्क्रान्ता जना यतः ।
महादेवं महामायं कः समुत्क्रान्तुमर्हति ॥ २७ ॥
यो हि लोकेऽल्पमायाश्च जानाति प्रतिविद्यया ।
स मोहान्निर्गतः स्वस्थः सुखमाप्नोत्यनश्वरम् ॥ २८ ॥
एवंविधापि विद्या तमनाश्रित्य तु मायिनम् ।
न लभ्या सर्वथा यावदप्रसाद्य तु सर्वथा ॥ २९ ॥
तस्मान्महामायिनं तमप्रसाद्य कथं भवेत् ।
महामोहस्य तरणं तस्मात्तं सर्वथाश्रयेत् ॥ ३० ॥

विभ्रम इत्यर्थः ॥ २४ ॥ कोऽयं मोहक इति चेदाह—महेश्वर इति । कथम्भूतो महेश्वर इति चेज् जगत्कर्तृत्वेन सिद्धो नापह्नवनीय इत्याह—यो हीति ॥ २५ ॥ कथमस्यैवं सामर्थ्यमिति चेदाह—मोहयतीति । अल्पकः देहादिपरिच्छिन्न ऐन्द्रजालिकः । अस्य विद्या मितेति न सर्वमोहकत्वम् ॥ २६ ॥ मायिनमप्रसाद्य तन्मोहतरणमशक्यमित्याह अल्पविद्यमिति ॥ २७ ॥ अल्पमायाम् । निरोद्धुमिति शेषः । स्वस्थः तन्निर्मितसर्पादिभयरहितः । अनश्वरं तन्माययाऽविनाश्यम् ॥ २८ ॥ एवंविधापि अल्पमायाप्रतिरोधिविद्यापि । तम् अल्पमायिनम् । यावत् यस्मात् । अनाश्रित्य सर्वथा धनदानसेवनाद्यैरप्रसाद्य न लभ्या । सर्वथा तमप्रसाद्येत्यग्रिमेण सम्बन्धः ॥ २९ ॥ तस्मात् अप्रसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तं प्रसादयेत् सम्यक् प्राप्य तस्य प्रसादतः ।
महाविद्यां स तन्मोहाद् ध्रुवमुत्क्रान्तिमेष्यति ॥ ३१ ॥
अन्येऽपि योगाः कथिताः श्रेयःसाधनकर्मणि ।
महेश्वरप्रसादात्ते विना न स्युः फलाप्तये ॥ ३२ ॥
तस्मादाराधयेदादौ महेशं विश्वकारणम् ।
भक्त्या स साधयेदाशु योगान्मोहविनाशनान् ॥ ३३ ॥
एतज्जगत् कार्यभूतं प्रत्यक्षं परिदृश्यते ।
सांशमेवं पृथिव्याद्यमदृष्टारम्भमप्यलम् ॥ ३४ ॥

दने मोहतरणाभावात् ॥ ३० ॥ सम्यक् अकापट्येन । महावि-द्याम् । अद्वितीयशिवात्मविद्यां प्राप्य महामायास्वरूपं वेदेति शेषः । तन्मोहात् । महामायाकृतमोहात् ॥ ३१ ॥ योगाः यु-क्तयः प्राणायामादिरूपाः । श्रेयःसाधनकर्मणि हेतुत्वेनेति शेषः ॥ ३२ ॥ तस्मादिति । यस्मादीश्वराराधनं विना किमपि सा-धनं फलपर्यवसायि न भवेत्तस्मादित्यर्थः । आदाविति । सर्व-साधनोपक्रम इत्यर्थः । कुत एवमिति चेदाह—विश्वकारणमि-ति । तस्य सर्वकर्तृत्वेन तदनुग्रहं विना न किञ्चित् संतृप्यतीति भावः ॥ ३३ ॥ कथमेष ईश्वरो जगत्कर्तृत्वेन सिध्यतीत्याशङ्क्ये-श्वरं प्रसाधयितुमुपक्रमते—एतदिति । प्रत्यक्षेण दृश्यमानमित्यर्थः । तच्च जगत् कार्यभूतमेवं प्रत्यक्षं यथा तथा परिदृश्यते । ननु घटादीनां कार्यभूतत्वं दृश्यते न तु पृथ्वीसमुद्रगिर्यादीनामिति चेत् तेषामपि सांशत्वेन हेतुना कार्यत्वं सेत्स्यतीत्याह—सांशमि-ति । अदृष्टारम्भमपि अदृष्टोत्पत्तिकमपि पृथिव्यादि ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यं स्यादिति तर्केण बह्वागमदृढेन तु ।
व्यवस्येत्तत्र कर्त्तारं सर्वकर्त्तृविलक्षणम् ॥ ३५ ॥
यद्यप्यकर्त्तृकं लोकमाह कश्चिदिहागमः ।
तदनेकैरागमैस्तु तर्करूढैः सुबाधितम् ॥ ३६ ॥

यत् सावयवं तत् कार्यमिति तर्केण पृथिव्याद्युत्पत्तिमदिति भावः । नन्वेवमपि परमाण्वाकाशादीनां निरवयवत्वेनाकार्यत्वान्न जगन्मात्रं कार्यभूतमिति चेन्न । वेद्यत्वेन हेतुना कार्यत्वसिद्धेः । न च निरवयवत्वेन कार्यत्वाभावः साधयितुं शक्यः, वेद्यत्वे हेतुकानुमानस्य बह्वागमसंवादेन दृढतरत्वादित्याह–बह्वागमेति । तथा चागमः । द्यावाभूमी जनयन् देव एकः, आत्मन आकाशः सम्भूतः, आकाशाद्वायुप्रमुखं दृश्यं सर्वं ससर्ज स इत्यादयः । तथा च दृश्यमात्रस्य जगतः कार्यत्वे सिद्धे तत्र जगति कार्यत्वेन कर्तृपूर्वकत्वं साधयेदित्याह–व्यवस्येदिति । तत्र पृथिव्यादौ कर्तारं निश्चयविषयीकुर्यादित्यर्थः । ननु घटादितत्तत्कार्येषु सिद्धकुलालादिभिः सिद्धसाधनमित्याशङ्क्याह–सर्वकर्त्तृविलक्षणमिति । नासदासीन्नोसदासीत्तदानीम्, पुरा सृष्टेरिदं दृश्यं नाणुमात्रमपि स्थितमित्याद्यागमानुरोधेनादिसृष्टावुपादानाद्यभावात्तदनपेक्षणात् सर्वकर्त्तृविलक्षण एष कर्त्ता साधित इति भावः ॥ ३५ ॥ नन्वागमसंवादाद्यथा जगत्कार्यत्वगमकस्तर्को दृढस्तथाऽकार्यत्वानुमापकस्तर्कोऽपि दृढः कुतो न भवेत्, अकर्त्तृको ह्ययं लोकः स्वभावैकसमाश्रय इत्यादि बार्हस्पत्यागमसंवादादित्याशङ्क्य नैष सदागमः किन्त्वागमाभास एवेति चार्वाकमतंप्रक्षेपायोपक्रमते–यद्यपीति । कश्चिदागमश्चार्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रात्मनाश एवार्थः प्रत्यक्षैकसमाश्रयात्।
तदागमाभासमेव न तद्धि महदाश्रयम्॥ ३७॥

कागमः। अत्रेयं चार्वाकप्रक्रिया। भूमिरापोऽनलो वायुरिति तत्त्वचतुष्टयम्। प्रत्यक्षमानसंसिद्धं पञ्चमं नहि विद्यते। एतत्संघातमको लोकः प्रतिक्षणविभेदितः। पूर्वपूर्वजगज्जालसदृशं चोत्तरोत्तरम्। एवं स्वभाव एवैष लोकः स्वस्मिन् प्रतिष्ठितः। गुडोदकादौ स्वाभाव्यान्मदशक्तिर्यथोद्भवेत्। एवं स्त्रीगर्भनिहिते शुक्रशोणितबुद्बुदे। उत्पद्यते हि चैतन्यं क्रियाज्ञानसमाश्रयम्। मदशक्तियुतं तोयं मद्यमित्युच्यते यथा। एवं चैतन्यसंयुक्तो देहः पुरुष उच्यते॥ सुखं पुमर्थः स्वर्गः स्यात् दुःखन्तु नरको भवेत्। प्रवर्त्तकद्वयञ्चैतत् स्वभावादेव नान्यथा॥ सुखदुःखाभास एवं संसारः प्रणिगद्यते। मदिरामदशक्तेस्तु यथा नाशः स्वभावतः॥ एवं चैतन्यनाशो हि मोक्ष इत्युच्यते बुधैः। मृतस्य नास्ति स्वर्गो वा नरको वापि कश्चन॥ तत् चार्वाकशास्त्रम्। अनेकैः आस्तिकनास्तिकसम्बन्धिभिः। आगमैः तर्करूढैः अनुगततर्कैर्बाधितमतस्त्याज्यमेवेति सम्बन्धः॥ ३६॥ अनेकागमविरोधादाभासत्वमुक्तं सम्प्रति सर्वानुभवविरोधाच्च तथात्वमाह—यत्रेति। जननमरणादिप्रवाहरूपः संसारो दुःखरूपत्वाद्धेयः। एतत्संसारस्य निमित्ताभावासम्पादनेनाभावे सति महासुखस्वरूपानुभवो मोक्षः परमपुरुषार्थरूपोऽतएव सर्वैरुपादेय इति हि मोक्षस्य पुरुषार्थत्ववादिनां मतं तर्कागमाद्यैर्व्यवस्थितम्। एवं सति प्रत्यक्षैकप्रमाणसमाश्रयादात्मनाश एव पुरुषार्थ इति यत्र शास्त्रे उक्तं तदागमाभासमेव। अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुष्कतर्कैकसंक्लृप्तं शास्त्रं तत्तथाऽन्यमेव हि ।
अन्यैरप्युच्यते कैश्चिज्जगदेतत् सनातनम् ॥ ३८ ॥
अबुद्धिमत्कर्तृकं चेत्येतच्चाप्यसमञ्जसम् ।

तएव तच्छास्त्र न महतां सारासाराविवेचकानामाश्रयं पुरुषार्थप्रयोजकत्वेनोपादेयम् ॥ आत्मनाशः पुरुषार्थ इति वदन् चार्वाकः प्रष्टव्यः । किमात्मनाशोऽयं कश्चन पुरुषार्थः उत तत्समुदायः, अहोस्विदात्मसामान्यनाशः ? नाद्यः । आत्मनस्तव मते क्षणिकत्वेन यत्किञ्चिदात्मनाशस्य प्राप्तत्वात् । इतरयोरसम्भवात् । नापि स्वात्मसन्ताननाशः । स्वात्मनाशकाले स्वस्यासत्त्वेन स्वात्मनाशस्याप्राप्तव्यत्वेनापुरुषार्थत्वात् । अप्राप्तव्यस्यापि पुरुषार्थत्वे अन्यात्मनाशस्यापि पुमर्थत्वप्रसक्तेः । अथ च स्वात्मनाशः प्रमाणेन सिद्धः । प्रत्यक्षं हि सन्निकर्षनिमित्तकं नातीतानागतयोः सम्भवति । न ततोऽन्यत् प्रमाणमनुमानाद्यभ्युपगम्यते त्वया । प्रत्यक्षमात्रं प्रमाणं वदता त्वया गुडोदकादौ मदशक्त्युद्भवादेर्दृष्टान्तत्वानिरूपणेन चैतन्याद्युद्भवादिसाधनमपि तन्नास्ति मे जिह्वेति कथनतुल्यमित्यादि ज्ञेयम् ॥ ३७ ॥ न तच्छास्त्रं सर्वज्ञप्रणीतमित्याह—शुष्केति । शुष्कः उपपत्तिरहितो यस्तर्कः । तदेकसंक्लृप्तं तन्मात्रमूलकमित्यर्थः । एवं प्रकृतपक्षप्रतिपक्षभूतं चार्वाकमतं निरस्य तथाविधमेव सांख्यमतं निराकर्तुमनुक्रमते—अन्यैरिति । सनातनम् सद्रूपमित्यर्थः । ते हि परिणामवादिनो जगत्कारणान्तर्भावेन सदेवेत्याहुः ॥३८॥ अबुद्धिमादिति । गुणसाम्यावस्थात्मकं प्रकृतितत्त्वं जगन्मूलकारणम् । तच्च बुद्धिमत्त्वाचितिक्रियारहितं जडम् । यथा हि मृत्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रियाया बुद्धिपूर्वत्वादबुद्धौ तददर्शनात् ॥ ३९ ॥

पिण्डो घटात्मना परिणममानः कुलालङ्कर्त्तारमपेक्षते । न तथा प्रकृतितत्त्वं जगद्रूपेण परिणममानं स्वातिरिक्तं कञ्चित् कर्त्तारमपेक्षते । अतो जगत्क्रियायां स्वतन्त्रमिति जगत्कर्तृभूतमित्यर्थः । इत्येतदनीश्वरं सांख्यमतम् । अत्र हि प्रकृतिः सत्वांशेन दर्पणतुल्येन स्वान्तःशुद्धचिद्रूपं पुरुषं स्वीयतमोशमयं च दृश्यं प्रतिविम्बत्वेन गृह्णाति । एवं प्रतिविम्बभूतद्रष्टृदृश्यसम्बन्धादेव प्रकृत्यविवेकमापन्नः पुरुषो घटमहं जानामीति मृषाभिमानेन युज्यते । अयमेव पुरुषस्य संसारः । यदा हि पुरुषो विचारेण प्रकृतेर्विविक्तमात्मानं जानाति तदा ज्ञातचोर इव तत्पुरुषविषये प्रकृतेरनुपसरणात् पुरुषप्रतिविम्बाग्रहणेन मृषाभिमानाभावान्मुच्यत इति तन्मतम् । अत्र हि प्रकृतौ प्रतिविम्बभूतचित्सम्बन्धाद् दृश्यप्रकाशोऽभ्युपगतः । तत्र प्रतिविम्बभुता चित् किमाश्रयवज्जडरूपा उत स्वनिमित्तमुख्यचिद्रूपा वा । आद्ये जडस्य दृश्यप्रकाशत्वानुपपत्तिः । जडस्य दृश्यप्रकाशत्वाभ्युपगमे प्रकृतिसत्त्वांशसम्बन्धेनैव सर्वोपपत्तौ चित्प्रतिविम्बकल्पनवैयर्थापत्तेः । द्वितीयेऽपि दृश्यस्य मुख्यचित्सम्बन्धोपगमाच्चित्प्रतिविम्बवैयर्थ्यमेव । नच दर्पणस्य घटाद्यप्रकाशकत्वेऽपि तत्प्रतिविम्बितसौरातपस्य गौणस्य घटादिप्रकाशकत्ववच्चितिप्रतिविम्बस्यैव दृश्यप्रकाशकत्वमिति वाच्यम् । सौरातपप्रातिविम्बस्यालोकवत् घटादिप्रकाशसहकारितेनाप्रकाशकत्वात् । नापि प्रतिविम्बभूताचितः चिज्जडोभयरूपत्वमुभयाविलक्षणत्वं वक्तुं युज्यते । विरोधादपसिद्धान्ताच्च । अथ च स्वभावस्यान्यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बह्वागमोपष्टम्भाच्च कर्तात्र स्याद्धि बुद्धिमान् ।
बुद्धिमत्कर्तृकं कार्यं सर्वत्रैव हि दर्शनात् ॥ ४० ॥
एवं सत्तर्कागमाभ्यां जगदेतत् सकर्तृकम् ।
स कर्त्ता लौकिकेभ्यस्तु कर्तृभ्यः स्याद्विलक्षणः ॥४१॥
कार्यस्याचिन्त्यरूपत्वादचिन्त्यानन्तशक्तिकः ।

भावानुपपत्तेः पुरुषं प्रति प्रवृत्तिस्वभावायाः प्रकृतेः विवेकज्ञानानन्तरं निवृत्तिस्वभावतानुपपत्त्या बन्धस्यापरिहार्यत्वमित्याद्यभिसन्धायाह–एतच्चाप्यसमञ्जसमिति । क्रियाया इति । घटाद्युत्पत्तिक्रियायाः कुलालादिबुद्धिपूर्वत्वात् । एवम्भूतं घटमेव करोमीति बुद्धिमत्पूर्वकत्वाद् घटाद्युत्पत्तेरबुद्धिमत्प्रकृतिकर्तृकत्वं न जगत इति भावः । अबुद्धाविति । चित्रलिखितकुलालादौ घटादिक्रियादर्शनात् ॥ ३९ ॥ बह्विति। स ऐक्षत लोकानसृजदिति, नामरूपे व्याकरवाणीति, आदिकर्ता हि भगवानादावालोच्य वै जगत् । योगीव निरुपादानं प्रविविक्तमकल्पयदित्यादि बह्वागमः उपष्टम्भः आश्रयभूतः । अनुकूलो यस्यैवंविधात् जगद्बुद्धिमत्कर्तृकं कार्यत्वाद् घटादिवदिति बलवत्तर्कात् बुद्धिमानेव जगत्कर्त्ता भवेन्नाबुद्धिमती प्रकृतिरित्यर्थः । कार्यस्य बुद्धिमत्कर्तृकत्वे दृष्टान्तदौर्लभ्यं परिहरति सांख्यमते जडस्य प्रकृतितत्त्वस्य कर्तृत्वसाधने दृष्टान्तदौर्लभ्यवन्नात्रेति भावः ॥ ४० ॥ सकर्तृकं सिद्धमिति शेषः । ननु घटादिकर्त्ता कुलालादिरिवादिकर्त्तापि पुरुषः कश्चन सिद्ध्यतु तस्य पुनर्न परमेश्वरत्वं सिद्ध्यतीत्याशङ्क्याह–स कर्त्तेति ॥ ४२ ॥ तत्र हेतुः अचिन्त्यरूपत्वादिति । कथं जले स्थिता पृथ्वी जलं वापि कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपरिच्छिन्नसामर्थ्यः कार्यस्यानुगुणत्वतः ॥ ४२ ॥
स प्रपन्नान् समुद्धर्तुं प्रभवत्येव सर्वथा ।
अतस्तं सर्वभावेन शरणीकुरु सर्वदा ॥ ४३ ॥
निदर्शनं तेऽभिधास्ये शृणु प्रत्ययकारणम् ।
मितेश्वरोऽप्यत्र लोके चाकापट्यात् प्रसादितः ॥४४॥
सर्वात्मना योजयति स्वेष्टार्थैः श्रेयसे नरम् ।
एष लोकेश्वरो देवः सम्यग् येन प्रसादितः ॥ ४५ ॥
तस्मै किं न दिशेद् ब्रूहि भक्तलोकैकवत्सलः ।
पुरुषा हीश्वरा लोके चानवस्था अवत्सलाः ॥ ४६ ॥

दिवीत्यादिरीत्या कार्यस्याचिन्त्यता ज्ञेया । लौकिककर्तृवैलक्षण्यमत्राह—अचिन्त्येति । एवंविधा एतावतीति तच्छक्तिर्न चिन्त्या नापि सान्ता । एतदेव निष्कृष्याह—अपरिच्छिन्नेति । लोके कार्यगुण एव कर्त्ता दृष्ट इति अपरिच्छिन्नजगतः अपरिच्छिन्नसामर्थ्य एव कर्त्तेति भावः ॥ ४२ ॥ एतावता ग्रन्थेनेश्वरं प्रसाध्य सम्प्रति तस्य शरण्यत्वमाह—स प्रपन्नानिति । यत एव मतः तम् जगत्कर्त्तारम् । सर्वभावेन निष्कामत्वेनेत्यर्थः । ये कामिनः तेषां अर्द्धो भावः अर्द्धं चित्तं काम्ये तिष्ठति अर्द्धमीश्वर इति भावः ॥ ४३ ॥ सर्वभावेन शरणीकृतात् फलप्राप्तौ निदर्शनं दृष्टान्तः । प्रत्ययो विश्वासः । अकापट्यात् सर्वभावेन ॥ ४४ ॥ सर्वात्मना कायवाङ्मनोभिः प्रसादित इति सम्बन्धः । श्रेयसे । सुखाय ॥ ४५ ॥ तस्मै । उपासकाय इष्टं न दिशेत् किम् । अपि तु दिशेदेवेत्यर्थः । यद्वा किं इष्टं न दिशेदपि तु सर्वं दिशेदेव । ननु मितेश्वराणां स्वस्य समीहितसेव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्दयाश्च कृतघ्नाश्च तस्मात् तत् फलमस्थिरम् ।
परमेशो दयासिन्धुः कृतिज्ञः सुव्यवस्थितः ॥ ४७ ॥
अन्यथानादिसंसारे कुतोऽनिन्द्यत्वमाप्नुयात् ।
व्यवस्थिता जगद्धात्रा चापि वा स्यात् कथं वद ॥४८॥
अनवस्थस्य राज्यन्तु नष्टमालोक्यते यतः ।
तस्मादेव दयासिन्धुः सुव्यवस्थश्च कीर्त्तितः ॥ ४९ ॥
तमेव सर्वभावेन भक्त्याशु शरणीकुरु ।
श्रेयसि त्वां योजयेत् सः त्वं न तत्परतां व्रज ॥५०॥

भावसम्पत्त्या सन्तोषादिष्टार्थप्रदानं युज्यते । परमेश्वरस्य प्राप्तकामत्वेन संतोषाभावात् कथमुपासितस्येप्सितदातृत्वमिति चेदाह-भक्तलोकैकवत्सलइति । तस्य भक्तेषु वत्सलस्वभावत्वादेव फलदानं युज्यत इति भावः । किञ्च मितेश्वरेभ्यः फलप्राप्तिरनियता परमेश्वरात्तु नियतेत्याह-पुरुषा इति ॥ ४६ ॥ तस्मात् । अनवस्थत्वादिधर्मचतुष्टययुक्तात् । अस्थिरम् अनियतम् । ईश्वरस्तु नैवंविध इत्याह-परमेश इति । यत एवमतः फलप्राप्तिर्भवेदेवेति शेषः ॥ ४७ ॥ कुत एतन्निश्चितमिति चेदाह-अन्यथेति । अवत्सलत्वादिसत्त्वेऽनिन्द्यो न भवेत् अनवस्थश्च तत्कृता लोकयात्रा व्यवस्थिता न भवेदिति भावः ॥ ४८ ॥ अनवस्थेति । ईश्वरस्यानवस्थितत्वे तत्सृष्टः संसारोऽकाले एव नश्येदिति भावः ॥ ४९ ॥ सर्वभावेन निष्कामत्वेन । श्रेयसि परश्रेयःसाधने । त्वं न तत्परतां व्रजेति । परश्रेयः-साधनस्य दुर्विज्ञेयत्वेन त्वं न तत्परो भव किन्तु त्वं सम्प्रतीश्वरमाराधय त्वदाराधनेन प्रसन्न ईश्वरस्त्वां तत्र योजयेदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासने बहुविधमार्त्त्यर्थार्थित्वतोऽपि च ।
निर्हेतुकन्तु काचित्कं तत् सत्योपासनं भवेत् ॥५१॥
दृष्टमेतत् सर्वतो वै चार्त्तेनोपासितः प्रभुः ।
कदाचिद् दययाविष्ट आर्त्तिं तस्य विमोचयेत् ॥५२॥
उपेक्षेत कदाचिद्वोपास्तेर्वै तारतम्यतः ।
एवमेवार्थार्थिनोऽपि मितश्चानियतं फलम् ॥ ५३ ॥
निर्हेतुकोपासनस्य ज्ञात्वा निर्हेतुतां चिरात् ।
मितेश्वरोऽप्यव्यवस्थस्तदधीनो भवत्यलम् ॥ ५४ ॥
निर्हेतुकत्वज्ञानाय चिरं स्यादज्ञभावतः ।
एष सर्वेश्वरो देवो हृदयेशोऽखिलस्य तु ॥ ५५ ॥

इति भावः । एतेन मतभेदेषु साधनभेदसत्त्वात् किं साधनमुपादेयमिति शङ्का प्रक्षिप्ता ज्ञेया ॥ ५० ॥ निष्कामत्वेनेश्वरभजनमेव सर्वथा फलमिति वक्तुमाह—उपासनमिति । आर्त्या रोगादिकृतपीडया । अर्थार्थित्वतः धनादिलिप्सया वा । आर्त्यां कृतमुपासनं प्रसिद्धं सर्वत्र । निर्हेतुकं निष्कामोपासनं सत्योपासनम् । सत्यफलसहितत्वात् ॥५१॥ एतदेव लौकिकदृष्टान्तेनोपपादयति—दृष्टमेतदिति ॥५२॥ तारतम्यत इति। उपास्तेराधिक्ये आर्त्तिं मोचयेदन्यथोपेक्षेतेति भावः । एवमिति । उपास्तितारतम्यादर्थप्राप्तिरप्राप्तिर्वा । एवं कामिनामुपासनफलमनियतम् । मितश्च मदर्थमुपासनं तस्य परिमितत्वात्, उपास्यस्य कृतघ्नत्वे फलाप्राप्तिश्चेति भावः ॥ ५३ ॥ तदधीनः उपासकाधीनः ॥ ५४ ॥ मितेश्वरस्य उपासकनिर्हेतुकत्वज्ञानाय कालविलम्बापेक्षास्ति ईश्वरस्य तु न सापीत्याह—एष इति । अन्तर्यामित्वेनाखिलहृद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं जानाति तत्काले फलं दद्याच्च सत्वरम् ।
आर्त्तमर्थार्थिनं देवस्तदर्थेनाभियोजितुम् ॥ ५६ ॥
स्वनियत्या कर्मपाकं प्रतीक्ष्य फलमादिशेत् ।
निर्हेतुकोपासकं स्वमनन्यशरणं विभुः ॥ ५७ ॥
ज्ञात्वा सर्वात्मना तस्य योगक्षेमवहो भवेत् ।
अप्रतीक्ष्यं कर्मपाकं नियतिं स्वां विधूय च ॥ ५८ ॥
तत्साधनं सम्प्रसाध्य द्रुतं संयोजयेत् फले ।

यस्थितत्वाद्‌ हृदयेशः ॥ ५५ ॥ यतः सर्वमुपासकहृद्गतमपि स्वभावत एव जानाति अतः तत्काले उपासनारम्भकाले एव । अत्रार्तार्थिनोरपि नैव सत्वरं फलं प्रयच्छति किन्तु कर्मपरिपाकानन्तरमित्याह–आर्त्तमिति । तदर्थेन कामितार्थेन ॥ ५६ ॥ स्वनियतिः स्वकृतः इदमित्थं भवेदिति संकल्पः । तया युतः तामनुल्लंघ्येति यावत् । कर्मपाकमिति । अत्रेदमवधेयम् । कर्मणः पाकः फलप्रदानसामर्थ्यम् । तच्च क्वचित् कर्मणः कालविशेषकृतम् , क्वचित् कर्मान्तरसहकारकृतम्। कर्मान्तरसहकृतमेवोत्कटं कर्मेत्युच्यते। यदुक्तं शिवागमे । कर्मणः परिपाकस्तु कालात् कर्मान्तरादपीति। अन्यत्रापि । अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति । एवंविधकर्मपाकं प्रतीक्ष्येत्यर्थः । स्वं स्वीयमित्यर्थः ॥ ५७ ॥ तं स्वीयं ज्ञात्वा । सर्वात्मना मनोवागादिभिः योगक्षेमवहः । अप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य रक्षणं क्षेमः । एतदुभयन्तस्य स्वयमेव करोतीति भावः । नियतिरिति प्रारब्धोपलक्षकम् । नियतिं प्रारब्धं च विधूयेत्यर्थः ॥ ५८ ॥ तस्य निष्कामिनो यत् साधनं तत् विज्ञापन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेव महेशत्वं स्वातन्त्र्यमहतन्तु यत् ॥ ५९ ॥
प्रारब्धं नियतिर्वापि महेशविमुखं भवेत् ।
एतन्मृकण्डुतनयेऽत्यन्तमीश्वरतत्परे ॥ ६० ॥
सर्वैर्ज्ञातं महेशस्य नियत्यारब्धलङ्घनम् ।
अत्रोपपत्तिन्ते वक्ष्ये शृणु प्राणप्रियेरितम् ॥ ६१ ॥
यद्यप्यनुल्लङ्घनीये प्रारब्धानियती खलु ।
तथाप्यपौरुषाणां तत् प्रारब्धमनपोहनम् ॥ ६२ ॥
अतएव प्राणायमैः प्रारब्धं परिजीयते ।
न तान् दृष्टेषु दुःखेषु प्रारब्धं योजयत्यलम् ॥ ६३ ॥
प्रारब्धाहिनिगीर्णास्ते ये पौरुषपराङ्मुखाः ।

यनेन सम्यक् प्रसाध्य । ननु नियतिः सर्वथाऽनुल्लंघनीयेति चेदाह–एतदेवेति । नियत्यादेरुल्लंघनमेवेत्यर्थः ॥ ५९ ॥ ननु प्रारब्धनियत्योरप्युल्लंघने प्रारब्धं नो नाशमियात् नियतिर्नान्यथा भवेदित्याद्यागमविरोध इति चेदाह–प्रारब्धमिति । महेशविमुख एव ' प्रारब्धनियत्योर्माहात्म्यमित्यागमतात्पर्यमिति भावः । न तदागमैकसिद्धं किन्त्वैतिह्यसिद्धमपीत्याह–एतदिति ॥६०॥ नियत्यारब्धयोर्लङ्घनम् । अत्र अनुल्लङ्घ्यप्रारब्धनियत्युल्लङ्घने । उपपत्तिं युक्तिम् ॥ ६१ ॥ अपौरुषाणां पुरुषयत्नरहितानाम् ॥ ६२ ॥ कुत एतदिति चेदाह–अत एवेति । प्राणायामैः प्राणायामपरैर्योगिभिः कथमेतज्ज्ञातमिति चेत् प्रत्यक्षेणेत्याह–न तानिति ॥ ६३ ॥ कुत एवं पौरुषात् प्रारब्धपराभव इति चेत्तथैव नियतिस्वभावादित्याह–तदिति । पौरुषेण प्रारब्धापोहनमित्यर्थः । तथैवेति । अनुभवानुरोधेन नियतेः कल्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतन्नियतिसंक्लृप्तं तथैवानुभवान्ननु ॥ ६४ ॥
नियतिः स्यादीशशक्तिः सङ्कल्पैकस्वरूपिणी ।
सत्यसङ्कल्प एवेशो ऽनुल्लङ्घ्या ह्यत एव सा ॥ ६५ ॥
कुण्ठिता सापि भवति परमेशपरायणे ।
अकुण्ठितापि भवति यतः सा तादृशी भवेत् ॥६६॥
तस्मात् कुतर्कं सन्त्यज्य महेशं शरणीकुरु ।
अहेतुकतया स त्वां नियोजयति श्रेयसि ॥ ६७ ॥
एतावदेव सोपानं प्रथमं क्षेमसौधकम् ।
एतद्विधाय चान्यत्र नास्तीषत्फलसम्भवः ॥ ६८ ॥
श्रुत्वेत्थं वचनं राम हेमचूडः प्रियोदितम् ।
पप्रच्छ भूयस्तां कान्तामतिहृष्टमनास्तदा ॥ ६९ ॥

नीयत्वादिति भावः ॥ ६४ ॥ अतएव सत्यसङ्कल्पादेव ॥६५॥ सापि अनुल्लङ्घ्या नियतिरपि । नन्वनुल्लङ्घ्यत्वं कुण्ठितत्वमित्युभयं विरुद्धमिति चेदाह—अकुण्ठितेति । यतः सा नियतिः तादृशी परमेशपरायणे कुण्ठितस्वभावैव । अयं भावः । प्रारब्धं हि फलोन्मुखं कर्म तच्च योगिना जीयत इति तथैव तन्नियत्या नियतं परिकल्प्यते । प्रकृतेर्निष्काम्युपासकोऽपि कर्मयोगित्वेन योगी भवेदित्यनेनापि तज्जीयते । तथा च प्रारब्धमयोगिन एवानुल्लङ्घ्यम् । नियतिश्च भगवत्सङ्कल्परूपा सा सर्वथानुल्लङ्घ्यस्वभावैव । तथापि भगवत्परायणे सा कुण्ठिता भवतीति च तस्याः स्वभाव एवेति सा सर्वत्राकुण्ठितैवेति ॥ ६६ ॥ यस्माद्भगवत्परे प्रारब्धनियत्योरप्यनन्तरायत्वं तस्मात् । अहेतुकतया निष्कामत्वेन । सः महेशः ॥ ६७ ॥ एतावदेव अहेतुकत्वेनोपास-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रिये महेश्वरं ब्रूहि यः शरण्यो भवेन्मम ।
सर्वकर्त्ता स्वतन्त्रात्मा यच्छक्त्या नियतं जगत् ॥७०॥
तं विष्णुमाहुः केचिद्वै केचित् शिवगणेश्वरम् ।
तथा सूर्यं नृसिंहादीन् बुद्धं सुगतमेव च ॥ ७१ ॥
अर्हन्तं वासुदेवञ्च प्राणं सोमञ्च पावकम् ।
कर्म प्रधानमणव इत्यादि बहुधा जगुः ॥ ७२ ॥
जगत्कारणरूपं वै विचित्रमतभेदितम् ।
तत्र केश्वरबुद्धिस्तु कर्त्तव्या तत् समीरय ॥ ७३ ॥
न तेह्यविदितं किञ्चिद् भवेदिति हि निश्चयः ।
यतः स भगवान् व्याघ्रपादो दृष्टपरावरः ॥ ७४ ॥
अतस्ते योषितोऽप्येवं ज्ञानमेतद्विराजते ।
ब्रूहि मे श्रद्दधानाय प्रियामृतप्रभाषिणी ॥७५॥
पृष्टैवं सा हेमलेखा प्रियेण प्राह हर्षिता ।
नाथ ते सम्प्रवक्ष्यामि शृण्वीश्वरविनिर्णयम् ॥७६॥

नमेत् । अन्यत्र साधने ॥ ६८ ॥ ६९ ॥ एवं जगदादिकर्त्ता परमेश्वरः सेव्य इति श्रुत्वा कर्त्तुर्हि शरीरवत्त्वं नियतमिति मत्वा शिवादिशरीरिषु ईश्वरत्वं क त्वया निश्चितमिति पृच्छति—प्रिये इत्यादि । नियतं क्लृप्तम् ॥ ७० ॥ कुतस्तवात्र शङ्केति चेत्तत्रापि शास्त्रानैक्यादित्याह—बुद्ध मिति । बुद्धं सुगतं च बौद्धैकदेशिनः ॥७१॥ अर्हन्तं जैना आहुः । वासुदेवं पाञ्चरात्राः । प्राणादीन् प्राणाद्युपासकाः । कर्मादीनां कर्तृत्वं प्राक् परिहृतं तथापि प्रसङ्गात् पुनस्तद्ग्रहणम् ॥ ७२ ॥ एवं जगतः कारणस्य कर्त्तुः स्वरूपं विचित्रमतभेदितं अत आह । तत्रेति ॥ ७३ ॥ व्याघ्रपादः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरो हि जगज्जालप्रलयोत्पादकृद् भवेत् ।
स विष्णुः स शिवो धाता स सूर्यः सोम एव च॥७७॥
स एव सर्वथा सर्वः सर्वैरपि निरूपितः ।
न शिवो नापि विष्णुर्वा न धाता नान्य एव च ॥७८॥
एतत्ते सम्प्रवक्ष्यामि शृण्वत्यन्तसमाहितः ।
कर्त्तारं शिवमाहुस्ते पञ्चवक्त्रं त्रिलोचनम् ॥ ७९ ॥
स कर्त्ता घटकर्त्तेव चेतनः सशरीरकः ।
लोकेऽपि चेतनः कर्त्ता सशरीरो हि दृश्यते ॥ ८० ॥
अशरीरोऽचेतनो वा न कर्त्ता क्वचिदीक्षितः ।
तत्र मुख्यं हि कर्तृत्वं चेतनस्यैव सम्भवेत् ॥ ८१ ॥
यतः स्वप्नेष्वयं जीवो हित्वा स्थूलं शरीरकम् ।
चैतन्यमयदेहेन सर्वानभिमतान् सृजेत् ॥ ८२ ॥

ते पिता ॥ ७४ ॥ अतः तत्सम्बन्धात् ॥ ७५ ॥ ७६ ॥ ७७ ॥ सर्वैः वैष्णवाद्यैः निरूपितः सर्वोऽपि विष्णुशिवादिः स एव विष्णुशिवादिमूर्त्तिषु सर्वत्रानुगतं परमेश्वरं स्वतन्त्रचिद्रूपमिति सर्वात्मतां तस्योक्त्वा परस्परं व्यावृत्तं दृश्यं स्थूलशरीरं न तस्य वास्तवं रूपमिति निषेधति । न शिव इत्यादि ॥ ७८ ॥ एतत् शिवो न शिवश्चेत्येतत् । ते शैवाः ॥ ७९ ॥ सः स्थूलशरीरसहकृतः । कुत एवमिति चेद्विभज्याह–लोक इति । कर्त्ता कुलालादिः ॥८०॥ एवं शरीरविशिष्टचेतनस्यैव कर्त्तृत्वमीक्षितम् । तथापि तत्र शरीरचेतनयोर्मध्ये ॥८१॥ कुत एवमिति चेद्भौतिकदेहस्य व्यभिचारान्न कर्त्तृत्वमित्याह- स्वप्नेष्विति । स्वाप्नो देहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः शरीरं करणं कार्यं कर्त्तुश्चिदात्मनः ।
जीवानां करणापेक्षा यतोऽपूर्णा स्वतन्त्रता ॥ ८३ ॥
भगवांस्तु जगत्कर्त्ता पूर्णस्वातन्त्र्ययोगतः ।
अनपेक्ष्यैव यत्किञ्चित् सृजत्यविकलं जगत् ॥ ८४ ॥
अतः शरीरं नास्त्येव ह्येष मुख्यविनिश्चयः ।
अन्यथा लोकवत्कर्त्तुरुपादानाश्रयो भवेत् ॥ ८५ ॥
तथा च देशकालादिकारणप्रचयैर्युतः ।
जगत् सृजन्महेशानो जीव एव भवेत्तथा ॥ ८६ ॥
पूर्णैश्वर्यं विहन्येत जगत्सृष्टेः पुरापि च ।

नैवंविध इत्याह—चैतन्येति ॥ ८२ ॥ अतः स्थूलशरीरं विनापि कार्यसम्भवेन व्यभिचारात् । अस्तु करणत्वेऽपि स्थूलं चिन्मयं वा शरीरमीश्वरस्यापेक्षितमिति चेन्नेत्याह—जीवानामिति । ॥ ८३ ॥ जीवानामपूर्णस्वातन्त्र्येण करणाद्यपेक्षायामपि न पूर्णस्वातन्त्र्यस्येश्वरस्य यत्किञ्चिदपेक्षेत्याह—भगवानिति । अविकलम् सम्पूर्णम् ॥८४॥ अतः शरीरकल्पने प्रयोजनाभावात् । अन्यथा कुलालादिवत् करणाद्यपेक्षत्वे । कर्त्तुः ईश्वरस्य उपादानस्याप्याश्रयः अपेक्षा भवेत् ॥ ८५ ॥ प्रचयैः समूहैः सामग्र्येति यावत् । जीव एव भवेत् ईश्वरत्वं विहन्येतेति भावः । तथा कुलालादिवत् ॥ ८६ ॥ इष्टापत्तावाह—जगदिति । उपादानादिकजगत्सृष्टेः पूर्वमपि सिद्ध्येत् ईश्वरस्य जगत्क्रियायां उपादानाद्यपेक्षणे उपादानादेर्नित्यता सिद्धेति भावः । तत् उपादानादिकम् । अस्त्विति चेदाह—सर्वकर्त्तृत्वमिति । उपादानादेः सृष्टेः पूर्वं सिद्धत्वेन तं प्रत्यकर्त्तृत्वेन सर्वकर्त्तृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्ध्येत्तत्सर्वकर्तृत्वं विहतं स्यान्न संशयः ॥ ८७ ॥

त्वं विहन्येतेत्यर्थः । तथा च कर्तुर्निमित्तत्वेनोपादानत्वाभावेनेश्वरत्वमेव न सङ्गच्छेत इति भावः । यदुक्तं क्षेमराजाचार्यैः—'ये त्वीश्वरं जगदादिशन्ति निमित्तहेतुं दत्तस्तिलाञ्जलिरमीभिरिहेशितायै । अन्याङ्गतोपगमनेन वशीकृतस्य कामीश्वरस्थितिममी बत सङ्गिरन्ते' इति । अथ च न हीश्वरस्य केवलनित्यत्वे कार्यं सम्भवितुमर्हति । तथा हि । सृष्टेः पुरा विशरारवः परमाणवः ईश्वरेच्छया संघटिताः कार्यारम्भका भवन्तीति ह्यारम्भवादिन आहुः । नैतदुपपन्नम् । लोके चेतनो ह्यन्येच्छामनुरुध्य किञ्चित् करोति नाचेतनः । तथा च परमाणूनामीश्वरेच्छानुरोधोऽनुपपन्न एव । नन्वीश्वरस्यैवंविधमेव सामर्थ्यम्, यत् परमाणवोऽपि तदिच्छामनुरुन्धेरन्निति । सत्यमेतत्, ईश्वरोऽपरिच्छिन्नसामर्थ्य एव । तेनैवालौकिकसामर्थ्येन भगवानुपादानाद्यनपेक्ष्यैव जगत्क्रियासमर्थः । एवं सत्यपि भगवतो जगत्क्रियायां परमाण्वाद्यपेक्षाभ्युपगमः द्वैतवादश्रद्धामात्रविलास इति ज्ञेयम् । एतेन सेश्वरसांख्योऽपि प्रत्युक्तो ज्ञेयः । अस्माकमागमैकसमाश्रयाणामभ्युपगताखिलव्यवहारसमर्थनसमर्थपरमेश्वरैश्वर्याणां नानुपपत्तिगन्धोऽपि ।

ननु वैषम्यनैर्घृण्यदोषदूरीकरणाय जगत्क्रियायां कर्म निमित्तमिति सर्वैरभ्युपेयम् । तथा चान्यापेक्षेश्वरस्य सिद्धेति चेदुच्यते । सत्यमेतदप्रतिसमाधेयमेव द्वैतवादिनाम् । अद्वैतवादिनामस्माकं तु दर्पणप्रतिबिम्बन्यायेन सर्वस्य जगतश्चिदेकरसत्वेन कर्मणोऽपि परमेश्वरस्वरूपानन्यत्वेनान्यानपेक्षणान्न दोषावकाश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतो हि दृश्यदेहाद्यमनपेक्ष्य जगत् सृजेत् ।
नास्ति तस्मात् स्थूलदेहो वस्तुतः प्राणवल्लभ ॥ ८८॥
पररूपे ह्यदेहेऽस्मिन् मुह्यन्ति स्थूलबुद्धयः ।
भक्तियुक्ताश्च तैर्ध्यातो यत्र यत्र यथा यथा ॥ ८९ ॥
तथा धत्ते ऽनेकरूपं भक्तचिन्तामणिः स्वयम् ।
अतश्चेतन एतेन तद्देहः स्याच्चितिः परा ॥ ९० ॥
चितिरेव महासत्ता सम्राज्ञी परमेश्वरी ।
त्रिपुरा भासते यस्यामविभिन्ना विभिन्नवत् ॥९१॥

लेशोऽपि। नन्वेवमपि घटादिकर्तृत्वस्य कुलालादिनिष्ठत्वान्नेश्वरः सर्वकर्त्तेति चेन्न । कुलालात्मन ईश्वरानन्यत्वेनादोषात् । अथ च राजपुरुषकृते राजकृतत्ववद् ब्रह्मादिकृतस्यापीश्वरकृतत्वात् । तदुक्तं प्रत्यभिज्ञायाम्—तथा हि कुम्भकारोऽसावैश्वर्यव्यवस्थाया तत्तन्मृदादिसंस्कारक्रमेण जनयेत् घटमिति ॥ ८७ ॥ अतः शरीराद्यपेक्षायामैश्वर्यविहतेः ॥८८॥ ननु यदि वस्तुतः देहो नास्ति तर्हि कुतोऽयं विष्ण्वादिदेहः इति चेदाह—परेति। अस्मिन् ईश्वरे । मुह्यन्ति मोहं माप्नुवन्ति न विदन्तीति यावत् । एवंविधा भक्तियुक्ताश्च । यत्र यत्र कैलासवैकुण्ठादिदेशे । यथा यथा पञ्चवक्त्रैकवक्त्रादिरूपेण ॥ ८९ ॥ स्वयमिति । न मातृपित्राद्यपेक्षयेति भावः । अतः एवंविधदेहानामिच्छामात्रपरिकल्पितत्वात् । परा अपरिच्छिन्ना चितिः ॥ ९० ॥ चितिरेवेति । चितिर्हि स्वरूपपरिनिष्ठिता निस्तरङ्गाविकल्पा तु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदर्शनगरप्रख्यं जगदेतच्चराचरम् ।
तद्रूपैकत्वतस्तत्र नोत्तमाधमभावना ॥ ९२ ॥
अपरे तु स्वरूपे हि कल्पितं मुख्यतादि हि ।
तस्मात् प्राज्ञ उपासीत परं रूपं हि निष्कलम् ॥९३॥
असमर्थः स्थूलरूपं यद्बुद्धौ सङ्गतं दृढम् ।

रीया त्रिपुरा । सैव यदा स्वस्वातन्त्र्याच्चितिक्रियाकर्तृत्वरूप-चेतनामासादयति तदेश्वर इत्युच्यते । कार्यं ब्रह्मेति यं वेदान्तिन आहुः । सा चितिर्महासत्ता अपरिच्छिन्नसद्रूपा । सम्राज्ञी स्वतन्त्रा । परमेश्वरी अनुत्तरैश्वर्यवती । त्रिपुरा तुर्या । भासते अविशेषात् सर्वत्र सर्वदेत्यर्थः ॥ ९१ ॥ ननु सा चितिः क्वचिद्भासते किन्तु जगदेव भासत इति चेदाह—आदर्शेति । यथा ह्यादर्शात्त्विभिन्नमपि प्रतिबिम्बनगरमादर्शे भिन्नवद्भासते एवमस्यां चितिश्चराचरात्मकं जगत्तदभिन्नमपि विभिन्नवद्भासते । यथा हि बालाः प्रतिबिम्बं पश्यन्तो दर्पणं न विदुरेवं मूढा जगत् पश्यन्तोऽपि न चितिं विदुः । एवञ्च विष्णुशिवादिष्वपीयमेवेश्वराख्या एका, अतः तत्र विष्णुशिवादौ नोत्तमाधमभावना कर्त्तव्या ॥ ९२ ॥ ननु शास्त्रेषूत्तमत्वादि कथमुक्तमिति चेदाह—अपरे इति । स्थूले । तस्मात् यतः सा मुख्यता कल्पिता न वास्तवी । निष्कलमशरीरम् ॥९३॥ ननु तद्रूपं प्राज्ञेनोपासितुं शक्यमन्येन किं कर्त्तव्यमिति चेदाह—असमर्थ इति । यद्बुद्धौ दृढं सङ्गतमिति । यद्रूपे बुद्धिर्दृढानुरक्ता सा मूर्तिरुपास्येति भावः । अन्यथा ईश्वरमनाराध्य । गतिः प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुपास्या हेतुतस्तु श्रेयः प्राप्नोत्यनुत्तमम् ॥ ९४ ॥
नान्यथास्य गतिः क्वापि भवेद्धै कोटिजन्मभिः ॥९५॥

इति श्रीमज्ज्ञानखण्डे हेमचूडोपाख्याने ईश्वरस्वरूप-
निरूपणं सप्तमोऽध्यायः ।

रश्रेयःसाधनप्राप्तिः । षट्चरणः श्लोकः ॥ ९४ ॥
इति श्रीतात्पर्यदीपिकायां सप्तमोऽध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमोऽध्यायः ।

एवं प्रियावचः श्रुत्वा ज्ञात्वा तत्त्वं महेशितुः ।
त्रैपुरं चिन्मयं हेमलेखावाक्येन निश्चितम् ॥ १ ॥
आश्वस्तचित्तस्त्रिपुरां गुणरूपां महेश्वरीम् ।
ज्ञात्वा गुरुभ्यः परमां माहेश्वर्यविभावितः ॥ २ ॥
तामेकभावानुगतो हेमचूडोऽभवद् दृढम् ।
एवं परोपासनेन व्यतीयुः केऽपि मासकाः ॥ ३ ॥
त्रिपुरा परमेशानी प्रसादमकरोद् हृदि ।
विषयाद्विमुखं चित्तं विचारपरमं बभौ ॥ ४ ॥
एतावद् दुर्लभं लोके परानुग्रहमन्तरा ।
विचारप्रवणं चित्तं यन्मुख्यं मोक्षकारणम् ॥ ५ ॥

अत्राध्याये भागमितपद्यैः स्तुत्वा विरागताम् ।
हेमलेखोक्तिगूढार्थव्याख्यानं सुनिरूप्यते ॥ १ ॥

त्रैपुरं तुर्यम् । तद्रूपं चिन्मयमेवेश्वरस्य तत्त्वमिति परोक्षतया ज्ञात्वा ॥ १ ॥ गुणरूपाम् सगुणमूर्त्तिम् । गुरुभ्यः तन्मन्त्रादिकं च ज्ञात्वेति शेषः । माहेश्वर्यविभावितः परमेश्वरानुग्रहशक्तिविद्धः । एतदुक्तम्—ईशानुग्रह एवैकः सद्गुरुसमागम इति ॥ २ ॥ एकभावो दृढभक्तिः अनुगतिरुपासनम् ॥ ३ ॥ किंविधं प्रसादमकरोत्तदाह—विषयादिति । विचारपरमम् स्वरूपविचारतत्परम् ॥ ४ ॥ एतावत् विषयवैमुख्यपूर्वकं विचारप्रवणत्वम्, कुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राम यावन्न जायेत विचारपरमं मनः ।
न तावच्छ्रेयसा योग उपायानां शतैः क्वचित् ॥ ६ ॥
अथ भूयः स कस्मिंश्चिद्दिने रहसि वै तया ।
सङ्गतः प्रिययाऽत्यन्तविचारपरमानसः ॥ ७ ॥
आयान्तं स्वनिकेतं तं दूरात् कान्तं ददर्श सा ।
उत्थाय तं समानीय स्वासने विनिवेश्य च ॥ ८ ॥
पादप्रक्षालनाद्यैस्तं पूजयित्वा यथाविधि ।
प्रोवाचामृतनिष्यन्दसुन्दरं परमं वचः ॥ ९ ॥
प्रेष्ठ ! त्वामद्य पश्यामि चिराय ननु ते वपुः ।
नीरुजं कच्चिदासीद्धि यतो रोगास्पदं वपुः ॥ १० ॥
तन्मामाचक्ष्व वृत्तान्तं यतो नाहं स्मृता त्वया ।
ननु मामसमालोक्य चाप्रभाष्य कदापि ते ॥ ११ ॥
नात्यगाद्दिनभागोऽपि तदेवं कुत आस्थितम् ।
मन्येऽहं तेऽनभिमते वर्त्तनं नहि वर्त्मनि ॥ १२ ॥
स्वप्ने वापि कुतोऽन्यत्र कुत एवमभूद्वद ।
कथं रात्रिस्त्वया नीता चैकापि युगसम्मिता ॥१३॥

एतस्य दुर्लभता तदाह—यदिति ॥ ५ ॥ ६ ॥ अथ विचारपरता-सम्पत्त्यनन्तरम् ॥ ७ ॥ निकेतम् गृहम् ॥ ८ ॥ ९ ॥ प्रेष्ठ अति प्रियतम ॥ १० ॥ तत् शरीरवृत्तान्तम् । कुतस्तवेयं सम्भावनेति चेदाह—यत इति ॥ ११ ॥ एवं मामस्मृत्वा वा त्वया आस्थितं तत् कुतः । स्वप्नेऽपि न मन्ये ॥ १२ ॥ अन्यत्र जाग्रति कुत एतत्सम्भावनेति भावः । एवं सति कुत एवं ते स्थितिरभूत्॥ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विना मां च क्षणोऽप्येको युगकल्पः सुदुःसहः ।
इत्युक्त्वा सा समाश्लिष्य खिन्नेवाभूत् क्षणं ततः॥१४॥
सोऽपि प्रियासमाश्लिष्टो नेषद्विकृतिमाययौ ।
प्राह प्रिये न मामेवं विमोहयितुमर्हसि ॥ १५ ॥
ज्ञाता मयाऽसि सुदृढं नास्ति ते शोककारणम् ।
परावरज्ञा त्वं धीरा मोहस्त्वां वै कथं स्पृशेत् ॥१६॥
तत्त्वां प्रष्टुं समायातो यत्तद्वक्ष्यामि संशृणु ।
यत् प्राक् स्ववृत्तं कथितं तत् स्फुटं मे समीरय ॥१७॥
का सा ते जननी प्रोक्ता सखी वा तत्पतिश्च कः ।
तत् पुत्राद्या अपि च के मम वा ते क संवद ॥ १८ ॥
न तन्मया सविदितं न तन्मन्ये मृषोदितम् ।
किन्तु त्वया निगदितं व्यपदेशेन सर्वथा ॥ १९ ॥
तद्विविच्य प्रकथय यथा ज्ञास्ये त्वहं स्फुटम् ।
अहं त्वां सुप्रसन्नोऽस्मि छिन्धि मे हृदि संशयम्॥२०॥
एवमुक्ता हेमलेखा प्रसन्नवदनेक्षणा ।
मत्वा सुनिर्मलधियं परानुग्रहसंयुतम् ॥ २१ ॥

मां विना क्षणमपि सुदुःसहमिति ॥ १४ ॥ दृढवैराग्येन नैषोऽपि प्रियाश्लेषादिना विकृतिं प्राप्तवान् । मामियं मोहयितुं प्रवृत्तेति ज्ञात्वाऽऽह—प्रिये इति ॥ १५ ॥ कुतस्त्वद्वियोगे शोको न भवेत्तदाह—परावरेति ॥१६॥ नाहं प्रागिव क्रीडितुं समागत इत्याह—तत्त्वामिति । महासती मे जननीत्यादि प्रागुक्तं स्ववृत्तम् ॥१७॥ ते जनन्यादयः ॥ १८ ॥ तत् त्वदुक्तं न तन्मृषोदितम्, किन्त्वन्यव्यपदेशेनोक्तम् ॥ १९ ॥ २० ॥ परायास्त्रिपुरायाः अनुग्रह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नून मेषोऽतिविमुखो विषयेभ्योऽतिधैर्यतः ।
विष्णुशक्त्या महेशान्या फलितः पुण्यसञ्चयः॥ २२ ॥
कालः प्रबोधने चायं बोधयामि ततस्त्विममम् ।
नाथ तेऽहो महाभाग्यं प्राप्तमीशकृपावशात्॥ २३ ॥
अन्यथा नैव विषयवैरस्यं पश्यति कश्चित् ।
एतल्लक्षणमीशस्यानुग्रहे ज्ञेयमादितः ॥ २४ ॥
भोगवैरस्यमपरं विचारप्रवणं मनः ।
हन्त ते सम्प्रवक्ष्यामि वृत्तिं प्रोक्तां सदात्मनः ॥२५॥
परा चिति र्मे जननी सखी बुद्धिर्मता मम ।
अविद्या त्वसती सोक्ता यया बुद्धिः सुसङ्गता ॥२६॥
अविद्यायास्तु सामर्थ्यं लोके स्पष्टं विचित्रितम् ।
यद्रज्जौ सर्पमाभास्य महाभीतिं प्रयच्छति ॥ २७ ॥
महामोहस्तु तत्पुत्रो मनस्तस्य सुतोऽभवत् ।
तस्य पत्नी कल्पना स्यात्तत्सुताः पञ्च येऽभवन् ॥२८॥
ज्ञानेन्द्रियाणि ते पञ्च तत्स्थानं गोलकं भवेत् ।
विषयाणां प्रमोषस्तु संस्कारो मनसो भवेत् ॥ २९ ॥

युतम् ॥ २१ ॥ अनुग्रहशक्त्या ॥ २२ ॥ यतोऽयं बोधने कालस्ततः इति मत्वा प्राहेति शेषः । ते त्वया ॥ २३ ॥ अन्यथा भाग्याभावे कश्चित् कालादौ । एतत् वक्ष्यमाणम् लक्षणम् ज्ञापकम् । आदित इति । ईशानुग्रहे सत्यादावेव तज्जायत इति भावः ॥ २४ ॥ अपरम् द्वितीयम् । वृत्तिम् स्थितिम्, सदा स्थितामिति शेषः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ तद्भोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्भोगः स्वप्नभोगः स्यात् कल्पनायाः स्वसा तु या ।
महाशना भवेदाशा तस्या यौ तनुजावुभौ ॥ ३० ॥
क्रोधो लोभश्च तावुक्तौ तत्पुरन्तु शारीरकम् ।
मम यस्तु महामन्त्रः स्वरूपस्फुरणं हि तत् ॥ ३१ ॥
प्राणप्रचारः सम्प्रोक्तो मनसस्तु प्रियः सखा ।
कान्ताराद्यास्तु नवका एवं सर्वं प्रकीर्त्तितम् ॥ ३२ ॥
मया बुद्धेः सङ्गमस्तु समाधिराभिधीयते ।
मन्मातृलोकसंप्राप्तिर्मोक्षः प्रिय उदाहृतः ॥ ३३ ॥
एवं प्रोक्तः स्ववृत्तान्तस्त्वमप्येवम्विधौ ननु ।
तद्युक्त्यैतत् सुविज्ञाय परं श्रेयः समाप्नुहि ॥ ३४ ॥

इति श्रीमज्ज्ञानखण्डे हेमचूडोपाख्याने संसाराख्यायिकाविवरणे अष्टमोऽध्यायः ।

प्रसुषितविषयभोगः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ एतत् स्ववृत्तान्तम् ॥ ३४ ॥

इति श्री त्रि० ज्ञा० व्याख्यायां तात्पर्यदीपिकायामष्टमोऽध्यायः ।

Acc. No. 728

Q 25
Gol
1927

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमोऽध्यायः ।

श्रुत्वेत्थं प्रियया प्रोक्तं हेमचूडोऽतिविस्मितः ।
हर्षगद्गदया वाचा पुनर्वक्तुं प्रचक्रमे ॥ १ ॥
धन्या प्रियेऽसि निपुणा अहो ते ज्ञानवैभवम् ।
किं वर्णयामि यत् प्रोक्तमाख्यारूपतयाऽखिलम् ॥२॥
एवम्विधं स्ववृत्तं मे नाभवद्विदितं क्वचित् ।
त्वदुक्त्याऽहं सम्प्रति तत् करामलकवत् स्फुटम् ॥३॥
स्मराम्यनुभवाम्यन्तरहो लोकक्रिया ऽद्भुता ।
का सा परा चिति र्माता कथं तस्यास्तु नो जनिः॥४॥
के वा वयं स्वरूपं किमस्माकं तद्ब्रवीहि मे ।
इति पृष्टा हेमलेखा रामोवाच प्रियं प्रति ॥ ५ ॥

अत्र नोनाङ्कपद्यैः स्वमात्मतत्त्वं विविच्य वै ।
हेमचूडः स्वात्मसंस्थां प्राप्त इत्येतदुच्यते ॥ १ ॥

पुनः हेमलेखां वक्तुम् ॥ १ ॥ ज्ञानस्य वैभवं माहात्म्यम् । यत् यस्मात् । स्वात्मवृत्तमखिलमन्यापदेशेनाख्यानतया मोक्तम् अतः किं वर्णयामि ॥ २ ॥ क्वचित् काले । तत् स्वात्मवृत्तं क्रोधलोभादिना दुःखानुभवरूपम् ॥ ३ ॥ स्फुटमतीतं स्मरामि वर्त्तमानमनुभवामि । अन्तः स्वात्मनि । लोकानां क्रिया व्यवहारः ॥ ४ ॥ महासती मे जननीत्याद्याख्यानेन परचित्तेरूपेयतोक्ता स्वस्य तदंशात्मत्वं चोक्तम् । तत्र का सा परेत्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाथ शृणु प्रवक्ष्यामि गूढार्थमिदमादरात् ॥
विचारयात्मनो रूपं बुद्ध्याऽत्यन्तविशुद्धया ॥ ६ ॥
न दृश्यं नापि तद्वाच्यमतो वक्ष्यामि तत् कथम् ।
ज्ञातस्वात्मस्वरूपो वै ततो ज्ञास्यसि मातरम् ॥७॥
न ह्यादेशस्वरूपेऽस्ति तत आदेष्टृवर्जितम् ।
स्वं रूपं स्वात्मना पश्य शुद्धबुद्धिसमाश्रयम् ॥ ८ ॥

पेयस्वरूपं पृष्ट्वा स्वात्मरूपं पृच्छति—के वा वयमिति । देहस्य पुरत्वश्रवणेन प्राणादेः परीवारत्वश्रवणेन च देहादेरनात्मत्वनिश्चयात् पुरुषादिसंज्ञायाः सङ्घातनिष्ठत्वेन क इत्यात्मनः सञ्ज्ञाविषयोऽयं प्रश्नो ज्ञेयः ॥ ५ ॥ गूढार्थमिति । अयं प्रश्नार्थो गूढः वक्तुमशक्य एव । तथापि किञ्चिदुत्तरं वक्ष्यामि । तदेवाह—विचारयेति । आत्मनः शुद्धस्वरूपे विदिते परा चितिर्विदितप्रायैवेति प्रथमप्रश्नमुपेक्ष्य द्वितीये उत्तरं क्रियत इति भावः । स्वयमेव विचार्य तत्रोपायमाह—अत्यन्तविशुद्धयेति । बुद्धेरन्तःकरणस्येन्द्रियादिद्वारा बहिर्मुखत्वमशुद्धिः । तत्परित्यागेनान्तर्मुखत्वं हि शुद्धिः । तथा च बाह्यदेहादावनात्मत्वं निश्चित्य बुद्धेरन्तर्मुखतासम्पादनेनात्मस्वरूपं स्वयमेव ज्ञातुं शक्यमिति भावः ॥ ६ ॥ ननु त्वया विदितमात्मतत्त्वं कुतो नोच्यत इति चेदशक्यं वक्तुमित्याह—न दृश्यमित्यादि । नज्ञेयमित्यर्थः । ज्ञेयमन्यापदेशेन ज्ञातुं शक्यमिति भावः । तस्य निर्धर्मत्वेन वचनप्रवृत्तिनिमित्तधर्माभावान्नापि तद्वाच्यमिति तात्पर्यम् । ननु तर्हि परा चिति र्या माता तां वदेति चेदाह—ज्ञात इति ॥ ७ ॥ यतो न दृश्यं न वाच्यमात्मरूपमतस्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवादितिर्यगन्तानां भान्तं भानैरभासितम् ।
भान्तं सर्वत्र सर्वस्य सर्वदा भानवर्जितम् ॥ ९ ॥

न साक्षादुपदेश इत्याह—न हीति । आदेश उपदेशः । ननु तर्हि तत् ज्ञेयं कथमिति चेदाह—स्वात्मनेति । शुद्धात्मरूपेण स्थितमित्यर्थः । विषयविनिर्मुक्तं शुद्धचिद्रूपेण स्थितमिति भावः । यद्वा स्वात्मना स्थितम् दृश्याऽनात्मव्यावृत्तद्रष्टृमात्रात्मना स्थितमिति भावः । एवंविधं क्क पश्यामीति चेदाह—शुद्धेति । शुद्धायां विषयाकाररहितायां बुद्धौ करणव्यापारानपेक्षमेव स्वरूपं ज्ञेयमिति भावः ॥ ८ ॥ ननु अदृश्यं तत् कथं पश्यामीति चेदाह—देवेति । देवः सदाशिवो हिरण्यगर्भः । तिर्यग्गतिः सूक्ष्मः स्तंबाख्यः कृमिः देवादितिर्यगन्तानां आत्मत्वेन भासमानः । ननु तर्हि मम कुतो न भासते इति चेदाह—भानैरभासितम् । भानैः परिच्छिन्नै दृश्याकारै ज्ञानैः । नास्ति भासितं यस्य । बुद्धेर्दृश्याकारैराच्छादितत्वान्नात्यन्तं भासते किन्तु घनाच्छन्नार्कवद्भासतएव । दृश्याकाररहितायां बुद्धौ तु निरभ्रनभोगतार्कवदत्यन्तं भासत इति भावः । ननु बुद्धावेव भासमानत्वापरिच्छेदः प्राप्त इति चेदाह—सर्वत्रेति । सर्वस्य सर्वत्र सर्वदा घटादिकं भासमानं तद्भासैव भासते । सर्वत्र भासमानः सूर्यो लोकस्य भित्तावत्यन्ताभिव्यक्तिवच्छुद्धबुद्धावभिव्यक्तिरिति भावः । ननु ब्रह्मणि व्यापारोपरमे न तस्य भासनं स्यात्तत् कथं सर्वदेति चेदाह—भानवर्जितमिति । प्रमाणव्यापाराविषयमित्यर्थः । कारणव्यापारस्य कर्त्तर्यप्रवृत्तेरतएवादृश्यमपीति भावः ॥ ९ ॥ तत्र प्रमाणाप्रवृत्तेः कथं केन रूपेण कुत्र देशे कदा काले केन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं कुत्र कदा केन निरूप्येतापि लेशतः ।
मन्नेत्रं दर्शयेत्येवमुक्तमेतत् प्रियाधुना ॥ १० ॥
नात्राचार्यस्योपयोगो यथा नयनदर्शने ।
निपुणोऽपि महाचार्यः कथं नेत्रं प्रदर्शयेत् ॥ ११ ॥
अतो गुरुरुपायोऽत्र तदुपायप्रदर्शनात् ।
तत्ते वक्ष्याम्युपायन्तच्छृणु संयतमानसः ॥ १२ ॥
यावत्त्वमात्मनि ममेत्येवन्तु प्रतिपश्यसि ।
ततः परं निजं रूपं यन्ममेति न भाति ते ॥ १३ ॥
गत्वैकान्ते विविच्यैतद्यद्यद्भाति ममत्वतः ।

प्रमाणेन लेशतोऽपि निरूप्यते । प्रमाणाविषयत्वादत्रेदानीं मादृशोऽयमिति निरूपयितुमशक्य एवेति तात्पर्यम् । अत्र दृष्टान्तः मन्नेत्रमिति । एतत् । आत्मानं निरूपयेति ॥ १० ॥ आत्मनो निरूपणीयत्वादेवात्मदर्शनेन साक्षादाचार्यस्योपयोग इत्याह—नाऽत्रेति । निपुणः कुशलः महान् तपोमाहात्म्यादियुक्तः ॥ ११ ॥ नन्वेवं चेद् गुरुः शिष्यस्य किं कुर्यात्तदाह—अत इति । निरूपणासमर्थत्वात् । उप समीपे अयति गच्छति येन सः । शिष्यस्य परागृदृशोऽतिदूरायितमात्मानं प्रत्यग्दृष्ट्युत्पादनेन समीपीकरोति गुरुरिति तात्पर्यम् । अत्र आत्मावगमे । गुरावुपायपदं योजयति—तदुपायेति । तस्यात्मदर्शनस्योपायः साधनं तस्य दर्शनात् । तत्तस्मात् । गुरोरुपायप्रदर्शकत्वात् । उपायमहं वक्ष्यामि ॥ १२ ॥ आत्मविषये यावन्ममेति पश्यति ततः परं तेभ्यो भिन्नं यत्तत्र ममेति न भाति तन्निजं रूपं विविञ्चेति सम्बन्धः ॥ १३ ॥ एकान्तस्थाने गत्वा । एतत् मयोक्तं यन्ममेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तत् परित्यज्य परं स्वात्मानमभिलक्षय ॥ १४ ॥
यथाहं ते ममत्वेन भासनान्नात्मता मयि ।
सम्बन्धमात्रादात्मीया न स्वरूपगता ह्यहम् ॥ १५ ॥
ममार्थमखिलं त्यक्त्वा यत्त्यक्तुं नैव शक्यते ।
तथात्मानं समालक्ष्य परं श्रेयः समाप्नुहि ॥ १६ ॥
इत्युक्तः प्रियया हेमचूड उत्थाय वै द्रुतम् ।
ययावश्वं समारुह्य तत्क्षणे नगराद्बहिः ॥ १७ ॥
उद्यानं नन्दनसमं प्रविश्य क्षणमात्रतः ।
वनान्तसौधमुन्नभ्रं स्फाटिकं प्रविवेश ह ॥ १८ ॥
विसृज्यानुचरान् सर्वान् द्वारपालानशासयत् ।
न कोऽप्यत्र प्रविशतु मय्येकान्तविचारणे ॥ १९ ॥
राजामात्याश्च गुरवो राजा वाऽप्यत्र सङ्गतः ।
अप्रवेश्या एव यावदहमाज्ञां दिशामि वः ॥ २० ॥

न भाति तत् । विविच्य विवेचय । एवं विवेचनकाले ममत्वेन यद् यद् भाति तत्तत् परित्यज्य अनात्मेति निश्चित्य ततः परं यन्ममत्वानाक्रान्तं तत् स्वात्मत्वेनाभिलक्षय ॥ १४ ॥ एतदेव विविच्योपपादयति यथेति । न स्वरूपगता न स्वरूपान्तर्भूता ॥१५॥ एवं ममेति भासमानमखिलमर्थं नाहमिति निश्चयेन त्यक्त्वा यत्त्यक्तुं स्वरूपं केवलचित्प्रकाशरूपं अखिलत्यागावधिभूतं त्यक्तुं न शक्यते ॥ १६ ॥ १७ ॥ उद्यानं क्रीडावनम् । उन्नभ्रमुच्चम् । अत्र मत्समीपे । एकः अद्वितीयः । अन्तः सर्वनिषेधावधिभूत आत्मा तस्य विचारणं विवेचनम् । तत्परे मयि सती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वाऽऽरुह्य सौधाग्र्यं नवमीं भूमिमाविशत् ।
तत्र वातायने चित्रे सर्वलोकावलोकने ॥ २१ ॥
आसने मृदुतूलाढ्ये विवेशान्यविवर्जितः ।
मनः समाधाय दृढं विचारमकरोत्तदा ॥ २२ ॥
नूनमेते जनाः सर्वे कथमेवं विमोहिताः ।
न कोऽप्यत्र विजानाति स्वात्मानं लेशतोऽपि च॥२३॥
सर्वोऽपि स्वात्मनो हेतोः करोति विविधाः क्रियाः ।
केचित् पठन्ति शास्त्राणि साम्नायानि च नित्यशः ॥२४॥
केचिद्धनान्यर्जयन्ति केचिच्छासति चावनिम् ।
अन्ये युध्यन्ति रिपुभिरन्ये भोगैकलम्पटाः ॥ २५ ॥
कुर्वन्त्येतत् स्वार्थमेते स्वस्वात्मा कतमो भवेत् ।
नैनं जानाति कोऽप्यत्र कुत एवमयं भ्रमः ॥ २६ ॥
अहो यथावदात्मानमविदित्वैव वै कृतम् ।
व्यर्थं स्वप्ने कृतमिव तदद्य विमृशामि तम् ॥ २७ ॥
गृहधान्यराज्यधनयोषित्पश्वादिकश्च न ।
न मे स्वरूपं भवति त्वनहन्ताश्रयत्वतः ॥ २८ ॥
मदर्थं भूनता हेतोर्देहोऽहं स्यां हि सर्वथा ।

ति यावत् ॥१९॥२०॥ उपर्युपरि विद्यमानभूमिषु नवमींभूमिम् । सर्वलोकानामवलोकनं यत्र । अत्युच्चामिति यावत् ॥ २१ ॥ ॥ २२ ॥ २३ ॥ स्वात्मनः सुखहेतोः । आम्नायो वेदः ॥२४॥ ॥ २५ ॥ २६ ॥ मया कृतम् । यस्माद ज्ञानात् कृतं व्यर्थं तत् तस्मात् ॥ २७ ॥ विमर्शनप्रकारमाह–गृहेत्यादि । अनहन्तेति । अहमित्यभासनेनाहन्ताश्रयत्वाभावात् ॥ २८ ॥ मदर्थेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नूनं क्षत्रियदायादो गौराङ्गोऽहं न संशयः ॥ २९ ॥
अहन्तया समाक्रान्ता तथैतेऽपि जनाः परे ।
इति निश्चित्य दध्यौ तं देहं राजकुमारकः ॥ ३० ॥
अथ देहस्य चात्मत्वं प्रतिषेद्धुं प्रचक्रमे ।
अहो कथं देह एष ममतायाः समाश्रयः ॥ ३१ ॥
रुधिरास्थ्यादिसंघातः प्रतिक्षणविकारवान् ।
मम रूपं भवेन्नूनं छिन्नमेतत्तु लक्ष्यते ॥ ३२ ॥
काष्ठलोष्ठसमत्वेन स्वप्नादौ चान्यथा स्थितः ।
नाहं देहोऽन्य एव स्यां प्राणोऽप्येष तथाविधः ॥३३॥
मनो बुद्धिश्च नाहं स्यां यत एतन्ममेरितम् ।
अतो देहादिबुद्ध्यन्तस्तदन्य एव न संशयः ॥ ३४ ॥

अहमित्यसमत्प्रत्ययविषयभूतत्वाद्धेतोः देहः अहं स्याम् । एतदेव द्रढयति—नूनमिति ॥ २९ ॥ एतेषां जनानामप्यात्मदेह एवेति संभावयति—अहन्तेति । तथैते देहात्मान एव । देहमात्मत्वेन दध्यौ चिन्तयामास ॥ ३० ॥ अथ ध्यानानन्तरम् । देहस्वभावमुपलभ्य ममताश्रयस्याऽनात्मत्वमिति हेमलेखोक्तं स्मृत्वाह—अहो इति ॥ ३१ ॥ कथं मम रूपं भवेत् । हेत्वन्तरमप्याह—छिन्नमिति । ॥३२॥ देहैकदेशरूपं हस्ताद्यङ्गं छिन्नं सदहन्तानाश्रयत्वेन काष्ठलोष्ठसमत्वेन यस्माल्लक्ष्यते अतो मम रूपं देहः कथम् । अथ च स्वप्नादौ अन्यथैवायं देहः स्थितो लक्ष्यते । अनुसन्धानेन जाग्रत्स्वप्नयोरेकात्मत्वनिश्चयाद्देहस्य पृथग् रूपत्वान्नात्मत्वमिति भावः। आदिपदेन सुषुप्तिर्जन्मान्तरं वा । तथाविधो ममत्वाद्याश्रयः ॥ ३३ ॥ ममेरितम् ममत्वेनोक्तम् । अतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहं कदाचिन्नास्मीति भासनाभावहेतुतः ।
सर्वदाहं भासमानः स्थित एव न संशयः ॥ ३५ ॥
भासमानस्य तु मम केन भानमिति स्फुटम् ।
न हि जानामि तत् कस्मादेतन्न विदितं मया ॥ ३६ ॥
घटादिकं चक्षुराद्यैर्भासते स्रुचि नान्यतः ।
प्राणस्त्वचा विभात्येव मनो ज्ञानेन चेहितम् ॥३७॥
एवं बुद्धिः केन च मे भासनं नाविदं त्विदम् ।
अथैषां भासनादेव नात्मा भासेत मे यदि ॥ ३८ ॥

देहादेर्ममत्वाश्रयत्वात् ॥ ३४ ॥ देहादीनां ममत्वाश्रयत्वेनाऽनात्मत्वादन्यस्याऽनुपलम्भात् सुषुप्तौ शून्योपलम्भाच्च शून्यमात्मेति प्राप्ते आह—अहमिति । अहं नास्मीति कदाचिदपि भासनाभावाद्धेतोः सर्वदा भासमानोऽहं स्थित एव सद्रूप एव न शून्यरूप इत्यर्थः । सुषुप्तावपि नास्मीति न प्रामाणिकः प्रत्ययः । तदाऽनुभवितुरभावे व्युत्थितस्य "न किञ्चिदवेदिषं" इति दृश्यसामान्यादर्शनस्मृत्यनुपपत्तेः । तथा चात्मा ऽशून्यरूपः सर्वदास्मीति भासत एव । कदाचिदपि नाहमस्मीति भासनाभावादिति भावः ॥ ३५ ॥ केन हेतुना । घनाच्छन्नार्कवत् सामान्येन भासमानस्य केन विशेषहेतुना स्फुटं भानं अयमहमस्मीति विज्ञानं स्यादिति नहि जानामि तदेतत् कस्मान्निमित्तान्न विदितम् ॥ ३६ ॥ ज्ञानेन ज्ञानात्मककार्यहेतुना । ऊहितम् । कार्यकरणत्वेनानुमितम् ॥ ३७ ॥ एवं बुद्धिः कार्येणानुमितेत्यर्थः । मे मम । अथेति निमित्तसम्भवनाद्योतकम् । यथा हि प्रतिबिम्बभासनकाले शुद्धदर्पणो न भासते एवं एषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हि नो विमृशाम्येतांस्ततो मे भासनं भवेत् ।
इति निश्चित्य मनसा जहौ मानसगोचरम् ॥ ३९ ॥
अथाऽपश्यदन्धकारं गाढं तत्क्षणमात्रतः ।
इदं ममाऽऽत्मनो रूपमिति निश्चितमानसः ॥ ४० ॥
प्रहर्षतुमुलं लेभे चाऽथ भूयो व्यचिन्तयत् ।
नूनं पुनः प्रपश्यामीत्येवं चित्तं रुरोध वै ॥ ४१ ॥
चञ्चलं हठयोगेन निरुद्धं समवैक्षत ।
तेजःपुञ्जमनाद्यन्तं भास्वरं क्षणमात्रतः ॥ ४२ ॥

मनात्मनां भासनादात्मा न भासत इति सम्भावयति—एषां इति ॥ ३८ ॥ एवं दृश्यभासनसामान्याभावं आत्मविज्ञाने निमित्तं निश्चित्याह—तर्हीति । यदि अनात्मभासनादात्मा न भासते तर्ह्येताननात्मभावान्न विमृशामि न ह्येते स्वतो भासन्ते । अविमृष्टानवभासनात् । यथा हि घटविमर्शनकाले ततोऽन्यन्न भासते तथा अन्यविमर्शनकाले आत्मा न भासत इति । अन्याविमर्शनेन आत्मभासनं भवेदिति भावः । विमर्शोऽयमीदृश इत्यादि मनसोल्लेखः । मनसा मननात्मकेन सूक्ष्मबुद्धिरूपेणान्तःकरणेन सोऽगोचरः मानसोल्लेखः ॥ ३९ ॥ अथ यत्किञ्चिद्भावमात्रानुल्लेखानन्तरं तत्तमः तदिदमात्मनो रूपमिति योजना । क्षणमात्रतः अन्धकारदर्शनोत्तरक्षणे । निश्चितमानसः निश्चितं मानसं मनो विकारात्मकं तमो येन ॥ ४० ॥ प्रहर्षं आत्मा दृष्ट इति भ्रमजनितम् ॥ ४१ ॥ चञ्चलं मनः हठयोगेन किञ्चिदनुल्लिखामीति दृढसङ्कल्परूपाभिनिवेशमात्रेण । ननु प्राणायामनिरोधाद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रबुद्धश्चिन्तयामास किमेतदिति विस्मितः ।
अहो पश्यामि विविधं किमात्मानं कथन्त्विदम् ॥४३॥
भूयः पश्यामि चेत्येवं रुरोध स्वमनस्तदा ।
विलीनं निद्रया चित्तं बभौ चिरतरं दृढम् ॥ ४४ ॥
तत्राऽपश्यत् स्वप्नजालं विचित्रानेकदर्शनम् ।
अथ प्रबुद्धोऽत्यन्तं वै चिन्तां प्राप महत्तराम् ॥४५॥
किमहं निद्रयाच्छन्नः स्वप्नान् समवलोकयम् ।
तमस्तेजश्चापि दृष्टमहो स्वप्नात्मको भवेत् ॥ ४६ ॥
स्वप्नस्तु मानसोल्लासस्तदेतं वर्जये कथम् ।
भूयो निगृह्य पश्यामीत्येवं निश्चित्य वै दृढम् ॥ ३७ ॥
रुरोध चित्तं तु हठात्तदेतदभवत् स्थिरम् ।
तदानन्दसमुद्रान्तर्निमग्न इव सोऽभवत् ॥ ४८ ॥
पुनश्चित्तप्रचलनात् प्रबुद्धो ऽभवदञ्जसा ।

भ्यासेन भास्वरं प्रकाशैकनिविडम् ॥४२॥ क्षणमात्रतः प्रबुद्धः । निरोधात् परावृत्त्य । एतन्मे तेज इदं विरुद्धरूपत्वमात्मनः कथमिति विस्मितः ॥ ४३ ॥ तदा रोधानन्तरं निद्रया परिपक्वकर्मसामान्याभावरूपया । हेतौ तृतीया निद्राहेतुना चित्तं विलीनम् । ॥ ४४ ४५ ॥ तमःप्रमुखं दृष्टमपि स्वप्नात्मकमेव स्यादिति सम्भावयति तम इति ॥ ४६ ॥ मनो निग्रहीतुं प्रवृत्तस्य मे मानसं प्रसरत्येव तत् कथमत्र कर्त्तव्यमिति चिन्तयति–स्वप्न इति। एतं स्वप्नम् ॥ ४७ ॥ चित्तं दृढं रुरोधेत्यन्वयः । तदा रोधानन्तरम् । ईषत् किञ्चित्कालं चित्तं स्थिरमभवत् । तदा निरुद्धचित्तदशायाम् ॥ ४८ ॥ प्रबुद्धः निरोधच्युतः । निरोधका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमेष मेऽभवत् स्वप्नश्चाऽथ वा चित्तविभ्रमः ॥४९॥
आहोस्वित् सत्य एष स्यादविचिन्त्यं विभाति मे ।
नाऽन्वभूवं किञ्चिदपि सुखमाप्तं कथं मया ॥ ५० ॥
अहोऽस्य सुखलेशस्य तुल्यं नास्त्यत्र किञ्चन ।
अहं सुषुप्तवन्मूढः कथमेतत् सुखं स्थितम् ॥ ५१ ॥
नात्र हेतुं कञ्चिदपि लक्षये तत् कथं भवेत् ।
आत्मावगमनायाऽहं प्रवृत्तोऽप्यद्य नाऽविदम् ॥ ५२ ॥
आत्मानमन्यच्चान्यच्च पश्यामि किमिदं भवेत् ।
प्रकाशो वाऽन्धकारो वा सुखं वाऽन्यदथापि वा॥५३॥
आत्मा भवेन्मम तथा क्रमिकैतत्स्वरूपकः ।
नाऽन्तमेम्यत्र भूयस्त्वां पृच्छामि विदुषीं प्रियाम्॥५४॥
इति निश्चित्य द्वारेशमाहूयाज्ञां समाविशत् ।
स्वसन्निधानमानेतुं हेमलेखां नृपात्मजः ॥ ५५ ॥
अथ प्राप्ता मुहूर्त्तेन द्वारिकस्य निदेशतः ।

लिकं सुखमात्ररूपं स्वात्मानमविदन्निव कल्पयति किमेष इति ॥ ४९ ॥ विषयानुभवेन सर्वत्र सुखानुभवः तत् कथं किञ्चिदप्यननुभूय निरोधकाले सुखानुभव इति शङ्कते—नान्वभूवमिति ॥ ५० ॥ किञ्चन सुखम् । सुषुप्तवत् बाह्यान्तराग्रहणेन मोहग्रस्तोऽहं स्थितः । तत्र कथमेष सुखानुभवः ॥५१॥ अत्र सुखोपलब्धौ तत् सुखं हेतुं विना कथं भवेत् ॥ ५२ ॥ आत्मानं नाविदमित्यन्वयः । अन्यच्चान्यच्च । तमःप्रकाशादिरूपम् । अपिरेवार्थे । अथ प्रकाशादिभ्योऽन्यदेव वेत्यर्थः ॥ ५३ ॥ अथवा तथा अनुभूततमःप्रभृतिभावक्रमयुक्तसङ्घस्वरूपक आत्मा भवेत् । अत्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुरोह महासौधं मेरुमिन्दुप्रभेव सा ॥ ५६ ॥
अथाऽपश्यद्राजसुतं प्रियं शान्तात्ममानसम् ।
निश्चलं निर्विकारञ्च संहृतेन्द्रियमण्डलम् ॥ ५७ ॥
समीपमुपसृत्याशु तद्विष्टरमुपारुहत् ।
एकासनोपविष्टायां तस्यां स निमिषार्द्धतः ॥ ५८ ॥
उन्मील्य नयने पार्श्वे समालोकयदास्थिताम् ।
आलोकिता प्रियं शीघ्रं प्रणयात् परिषस्वजे ॥ ५९ ॥
ततः प्राहाऽमृतस्यन्दि सुन्दरं वचनं प्रिया ।
नाथ किं भवताऽऽहूता कच्चित्ते नीरुजं तनौ ॥ ६० ॥
यदाऽऽहूतौ कारणं मे यदर्थमहमागता ।
एवं प्रियानुयुक्तः स बभाषे स्वात्मनः प्रियाम् ॥६१॥
प्रिये त्वयाऽनुशिष्टोऽहं विविक्तेऽत्र समास्थितः ।
विचारपरमः स्वात्मरूपलक्षणहेतवे ॥ ६२ ॥
तत्परेणापि चित्तन्तु लाञ्चितं तत् पृथक् किमु ।
आत्मनः सर्वदा प्राप्तेर्भासमानत्वतोऽपि च ॥ ६३ ॥

न्तं निश्चयं नैमि न प्राप्नोमि ॥ ५४-५५-५६ ॥ हेमलेखा अपश्यत् । शान्तं निश्चेष्टम् । आत्मा शरीरं मानसञ्च । चलनं प्राणचारः । विकारः कामादिः ॥ ५७ ॥ भर्तृसमीपम् । तस्यां हेमलेखायां स हेमचूडः ॥ ५८ ॥ प्रियां समालोकयत् । आलोकिता सा ॥ ५९-६०-६१ ॥ विचारः परम उपादेयो यस्य तत्पर इति यावत् । स्वात्मरूपस्य लक्षणं विज्ञानम् । तद्धेतुर्यस्य मोक्षस्य तदर्थं विचारपरम इति सम्बन्धः ॥ ६२ ॥ तत्परेणापि अनन्यमानसेनापि । चित्रम् अनेकविधम् । पृथक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असम्यग् भासनञ्चान्यभासनस्य निमित्ततः ।
इति मत्वा निरुध्यान्यभासनं सुव्यवस्थितः ॥ ६४ ॥
अपश्यमन्धकारञ्च प्रकाशमन्यदेव च ।
क्वचित् सुखं महत् प्राप्तं किमेतद्वद मे प्रिये ॥ ६५ ॥
इदमेवात्मनो रूपमथवाऽन्यद्भवेत् क्वचित् ।
सम्यग् विविच्य कथय यथा तमभिलक्षये ॥ ६६ ॥
इत्युक्ता साब्रवीद्धेमलेखा ज्ञातपरावरा ।
शृणु प्रिय प्रवक्ष्यामि समाहितधिया ऽखिलम् ॥६७॥
यस्त्वया बाह्यसंरोधे व्यवसायः समेधितः ।
स शुभः सम्मतः सर्वैः सुमुख्यश्चात्मवेदिभिः ॥ ६८ ॥
विना तेन न तत् प्राप्तं केनापि कुत्रचित् क्वचित् ।
न तत् कारणतामेति तत्प्राप्तौ प्राप्तभावतः ॥ ६९ ॥

अत्यन्ताभिन्नम् प्रकाशान्धकारादिरूपम् । स्वेन यथा विचारितं तदाह–आत्मन इति । आत्मत्वादेव प्राप्तत्वं प्रकाशरूपत्वाद्भासमानत्वम् ॥६३॥ एवंविधस्याप्यसम्यग्भासनमन्यभासननिमित्तात् । अन्येषां भासनं भासनकरणमिन्द्रियादिनिरुक्तम् ॥६४–॥६५॥ इदमेव प्रकाशान्धकाराद्यन्यतमम् । अन्यत् प्रकाशान्धकारादिभ्यः । क्वचित् समाधेरन्यत्र ॥ ६६–६७ ॥ व्यवसायः यत्नः । शुभफलप्रदत्वाच्छुभः । अनन्तरसाधनत्वात् सुमुख्यः ॥ ६८ ॥ तेन निरोधेन । तत् अद्वैतात्मविज्ञानम् । कुत्रचित् काले क्वचिद्देशे । नन्वेवमात्मज्ञानस्य साधनसाध्यत्वेन घटादिज्ञानतुल्यत्वे घटवदात्मनो जडत्वमनात्मत्वञ्च स्यादित्यत आह–न तदिति । तत् निरोधनम् । तत्प्राप्तौ आत्मविज्ञानप्राप्तौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्राप्तावात्मता न स्यादात्मत्वेनाप्तता कुतः ।
अप्राप्यः सर्वथैवात्मा प्राप्तिस्तस्य न विद्यते ॥७०॥
अप्राप्तस्य भवेत् प्राप्तिरात्मत्वान्नाप्तिरस्त्यतः ।
तन्निरोधोऽपि नाप्त्यर्थस्तत्र पश्य निदर्शनम् ॥७१॥
अन्धकारसमाच्छन्नं किञ्चित्तस्य निरोधतः ।
दीपाद्यैराप्यते प्राप्तमिव लोके यथा तथा ॥ ७२ ॥
यथा कश्चिद् भ्रान्तचित्तः कश्चिद्विस्मृतनिष्कक: ।
अन्यचिन्तानिरोधेन समाहिततया पुनः ॥ ७३ ॥
आसादयति तन्निष्कं नष्टं प्राप्तं यथा तथा ।
न निरोधोऽत्र हेतुः स्यान्निष्काप्तौ तु यथा तथा ॥७४॥

प्रकृते आत्मरूपमेव विज्ञानं विवक्षितं न त्वात्मनो विज्ञानम् । अतस्तस्य प्राप्तत्वमिति भावः ॥ ६९ ॥ एतदेव साधयति—अप्राप्ताविति ॥ ७० ॥ तन्निरोधः मनोनिरोधः । निदर्शनं दृष्टान्तम् ॥ ७१ ॥ किञ्चित् घटादि । तस्य अन्धकारस्य दीपसूर्यादिभिः निरोधतः परिहारतः घटाद्याप्यते । अत्र स्थितमपि घटादि यथा तमोनिरोधात् प्राप्तमिव भवति तथा स्वप्रकाशचिदेकरूपमात्मतत्त्वं वासनोद्भूतविकल्पैराच्छन्नमिव स्थितं विकल्पनिरोधेन प्राप्तमिव भवति । तथा च निरोधस्य न स्वरूपप्रापकत्वमिति भावः ॥ ७२ ॥ नात्रान्धकारवत् स्वरूपातिरिक्तमाच्छादकं सम्भवतीत्याशयेन दृष्टान्तान्तरमाह । यथेति निष्कं सुवर्णम् ॥ ७३ ॥ प्राप्तं यथा प्राप्तमिवेति द्वितीयं यथापदं योजनीयम् । अत्र यथा अनष्टं निष्कं नष्टं प्राप्तमिति चोच्यते तथा अप्राप्त आत्मा प्राप्तो भवति । अत्र यथाऽन्यचिन्तानिरोधो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मलाभेन हेतुः स्यान्निरोधो बाह्यवस्तुनः ।
त्वया न लक्षितः स्वात्मा तत्र व्युत्पत्तिवर्जनात् ॥७५॥
यथा प्रकाशे व्युत्पन्नो रात्रौ राजसभां गतः ।
पश्यन् सभ्यांश्च दीपांश्च न जानाति प्रकाशकम् ॥७६॥
शृणु प्रिय निरोधान्ते ह्यन्धकारो विलोकितः ।
अन्धकारावलोकादौ शेषभावस्तव स्थितः ॥ ७७ ॥
यं भावं भावय सदा परमानन्ददायकम् ।

न निष्कमाप्तौ हेतुस्तथा प्रकृतेऽपि निरोधो न हेतुः ॥ ७४ ॥ बाह्यवस्तुनो निरोधः । ननु तर्ह्यात्मा मया निरोधेनापि कुतो न लक्षित इति चेदाह—तत्रेति । व्युत्पत्तिः वस्तुपरिचयः ॥७५॥ अव्युत्पत्त्या दृश्यमानमपि नोपलक्षयतीत्यत्र दृष्टान्तमाह—यथेति । अव्युत्पन्नः । प्रकाशो हि प्रदीपप्रसृतः भास्वररूपवान् भात्रावभासक इति परिचयहीनः । एवं त्वया न लक्षित इति योज्यम् । ॥७६॥ एवं स्वरूपानुपलक्षणेऽव्युत्पत्तिं निमित्तमुक्त्वा तद्व्युत्पत्त्यर्थमाह—शृण्विति । निरोधो ह्यविकल्पदशा । तत्रान्धकारावलोकनरूपविकल्पासम्भवान्निरोधान्ते इत्युक्तम् । तादृशान्धकारावलोकनस्यादौ पूर्वदशायां निर्विकल्परूपायाम् । यस्तव शेषभावः स्थितः परिशिष्टं रूपं स्थितम् । यथा हि देहाद्यतिरिक्तं ज्ञानमात्मनो रूपं तच्च विकल्पकाले दृश्यं संवलितमेव प्रकाशते । निरोधकाले दृश्यपरिच्युतौ यत् ज्ञानमात्रं स्थितं तत्परिशिष्टं रूपं शेषभाव इत्युच्यते । न च तादृशशेषभावः अपह्नोतुं शक्यः । स्वप्रकाशत्वेन तस्य प्रकाशमानत्वात् । व्युत्थितस्य तस्यैतावन्तं कालं किञ्चिदविदन्नासमित्यनुसन्धानाच्चेति ॥ ७७ ॥ तं भावम् । शेषभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र सर्वे महामोहग्रहग्रस्ताः पराग्दृशः ॥ ७८ ॥
अन्विष्यान्विष्य विहता न तां प्रापुश्च भावनाम् ।
सन्ति लोके शास्त्रविदः कुशलाश्च सुतार्किकाः॥७९॥
अविदित्वा भावममुं शोचन्त्येव दिवानिशम् ।
शब्दार्थशिल्पमात्रेण न हि तत् पदमाप्यते ॥ ८० ॥
यावदन्वेषणं कुर्याद्विचारं वापि पण्डितः ।
तावन्न प्राप्यते तद्वै यतो न ग्राह्यमेव तत् ॥ ८१ ॥

वम् । दृश्यरहितदृङ्मात्ररूपम् । सदा "अहमस्मी"ति भावय अनुसन्धिपरो भव । दृश्यमूलद्वैतामासनवैधुर्येण दृश्यादिरूपानन्दाच्छादकाभावादभिव्यक्तदृश्यपरमानन्दरूपत्वेन प्रकाशमानत्वात् परमानन्ददायकमिति । अत्र एवंविधे स्वरूपे सर्वे शास्त्रज्ञा योगिनश्च । यः सदृशः बहिर्मुखान्तःकरणः । "पश्यामी"ति परिच्छिन्नाभिनिवेशपर इति यावत् । यदुक्तं–पश्यामीति पराग्दृष्टेरलभ्यं तत् परं पदमिति ॥७८॥ यतः सर्वे तत्र महामोहग्रस्ताः अत आह–अन्विष्येति। तद्भावाप्राप्त्या विहताः श्रान्ताः ।तां भावनां शेषभावानुसन्धिरूपाम् । ननु मास्त्वेषा भावना शास्त्राभ्यासतर्कादिभिरेव लब्धपुरुषार्था भवाम इति चेन्नेत्याह–सन्तीति! शास्त्रविदः श्रवणपराः । कुशलाः तार्किका मननपराः । एवंविधा अपि पराग्दृशो निदिध्यासनराहित्येन पुरुषार्थाप्राप्त्या शोचन्त्येवेति भावः ॥७९॥ शब्दार्थे श्रुतार्थे शिल्पो मननं तन्मात्रेण ॥८०॥ ननु अतिसूक्ष्मोऽपि शास्त्रार्थो भूयःश्रवणमननाभ्यां चित्तमुपारोहति, एवमेष भावोऽपि श्रवणमननाभ्यामेव भूयः कृताभ्यां चित्तारूढो भवेत् किं रोधरूपानिदिध्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वा दूरं न तत् प्राप्यं स्थित्वा प्राप्तं हि सर्वदा ।
न तद्विचार्यं विज्ञेयमविचाराद्विभासते ॥ ८२ ॥
धावन् स्वमूर्द्धच्छायेव न प्राप्यं क्रियया क्वचित् ।
यथा हि निर्मलादर्शे प्रतिबिम्बसहस्रकम् ॥ ८३ ॥
पश्यन् बालोऽपि नाऽऽदर्शं पश्यत्येवं जनः खलु ।
पश्यन् स्वात्ममहादर्शे प्रतिबिम्बं हि जागतम् ॥८४॥
स्वात्मानं न विजानाति तद्व्युत्पत्तिविवर्ज्जनात् ।
यथाऽपरिचिताकाशः पश्यन्नाकाशसंश्रितम् ॥ ८५ ॥

सनेनेति चेन्नेत्याह—यावदिति । अन्वेषणं विचारं मननं कुत एवमिति चेदाह—यत इति । अस्याग्राह्यत्वेनालौकिकत्वान्न केवलश्रवणमननाभ्यां चित्तारूढतेति भावः ॥८१॥ अलौकिकत्वमेव तस्याह—यत इति । अत्र गमनमिन्द्रियप्रसारः । स्थितिस्तदप्रसरः । विचारश्चिन्तनं चित्तप्रसरोऽविचारस्तदभावः । पराग् वस्तु हि बाह्यमिन्द्रियव्यापारेणान्तरं विचारेण ज्ञातुं शक्यम्, अस्य तु प्रत्यग्रूपत्वेनेन्द्रियमनोनिरोधमन्तरा दुर्विज्ञेयत्वमिति भावः ॥ ८२ ॥ सव्यापारेण न प्राप्यमित्यत्र दृष्टान्तमाह—धावन्निति । प्रमाणव्यापारस्य प्रमातर्यप्रसर इति तात्पर्यम् । वस्तुन्यव्युत्पन्नेन निरोधवतापि तद्दुर्विज्ञयमिति, वस्तुव्युत्पत्तये भूयः सदृष्टान्तं निरूपयति-यथेति ॥८३॥ बालः आदर्शे अव्युत्पन्नः पश्यन्नपीति सम्बन्धः । न पश्यति एष आदर्श इति न विजानाति । दार्ष्टान्तिके योजयति—एवं जन इति । जागतं जगत्सम्बन्धि प्रतिबिम्बम् ॥८४॥ चित्तसमारोहाय दृष्टान्तान्तरमाह—यथेति । व्युत्पत्तिर्हि वस्तुपरिचयः । यथा ह्याकाशमवकाशात्मकमिति कथञ्चित् परिचिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगन्नावैति चाकाशं तथा स्वात्मस्वरूपकम् ।
नाथ सूक्ष्मदृशा पश्य ज्ञानज्ञेयात्मकं जगत् ॥ ८६ ॥
तत्र ज्ञानं स्वतःसिद्धं तदभावे न किञ्चन ।
प्रमाणानां प्रमाणं तदप्रमाणं स्वतो भवेत् ॥ ८७ ॥

काशः पुरुषः सर्वत्र जगत् पश्येत्तदाश्रयमाकाशं च पश्यति । कथञ्चिदप्यपरिचिताकाशस्तु सर्वमाकाशाश्रितं जगत् पश्यन्नपि नाकाशं पश्यति । एवमपरिचितात्मस्वरूपः स्वात्मप्रतिबिम्बितं जगत् पश्यन्नपि नात्मानं पश्यतीति भावः ॥ ८५ ॥ अव्युत्पन्नस्य निरोधेनात्मा नोपलक्षित इति तत्र व्युत्पादनाय शेषभावस्तत्र स्थित इत्याद्युक्तं, तथापि तत्र प्रियस्याव्युत्पत्तिमालक्ष्य प्रकारान्तरेण तत्र व्युत्पादयितुं भूय आह—नाथेति । जगदस्तीति शेषः ॥ ८६ ॥ अनेकविधमपि जगत् संक्षेपेण ज्ञानं ज्ञेयमिति द्विरूपं तत्र ज्ञेयं प्रत्यक्षादिप्रमाणैः सिद्धमनात्मरूपञ्चेति तन्निरूपयति—तत्रेति । तयोर्मध्ये इत्यर्थः । स्वतःप्रमाणमनपेक्ष्य तदभावे न किञ्चनेति प्रतिबिम्बानां दर्पणवत्तस्य सर्वाधिष्ठानत्वेन तदभावे न किञ्चिद् भूयादतस्तदपन्होतुमशक्यमिति तात्पर्यम् । ननु तदभावे न किञ्चनेत्यनुपपन्नं प्रमाणं, प्रमेयस्य सिद्धत्वादित्याशङ्क्य प्रमाणानां प्रमाणत्वे सिद्धे प्रमाणैः प्रमेयं सेत्स्यति प्रमाणत्वं च प्रमेयेऽव्यावृत्तिक्रियामन्तरा न सिध्यति तस्याश्च क्रियायां न प्रमाणस्य स्वातन्त्र्यं करणत्वात् कुठारवत् । अतः प्रमाणानां प्रमातारमन्तरा प्रमाणत्वासिद्धौ प्रमेयं न सिध्यतीति तात्पर्येणाह—प्रमाणानामिति । प्रमाणानां प्रमाणं स्वरूपसाधकमित्यर्थः । ननु प्रमाणं प्रमितं ह्यस्ति तथा च प्रमातरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतः प्रमाणानपेक्षमादिसिद्धमतस्तु तत्।
सिद्धिसाधकभावेन न तत्सिद्धिः कदाचन ॥ ८८ ॥
तत्र विप्रतिपन्नस्य न प्रश्नो नापि चोत्तरम्।
अनपन्हवनीयं तन्महादर्शतलं भवेत् ॥ ८९ ॥

प्रमाणापेक्षायां तत्रापि प्रमात्रन्तरापेक्षायामनवस्थानं स्यादित्या-शङ्क्याह—अप्रमाणमिति। न प्रमाणं यस्य तत्। ननु तर्हि कथं तदस्ति तदाह—स्वत इति। स्वसत्तायामनन्यापेक्षमिति भावः ॥८७॥ कुत एवमिति चेदाह—यत इति, प्रमाणानपेक्षमिति। प्रमातुश्चिद्रू-पत्वेन सदा प्रकाशमानत्वान्न हि वैकर्तनज्योतिर्दीपालोकमपेक्षत इति रीत्याऽप्रकाशितप्रकाशकप्रमाणस्य तत्रानुपयोग इति ता-त्पर्यम्। अतः साधनानपेक्षणात् सिद्धसाधकेति सिद्धिस्तत्प्र-तिज्ञप्तिर्वा साधकं, तयोः साधनं उत्पत्तिसाधनं ज्ञप्तिसाधनं वेत्य-र्थः। सिद्धसाधकस्य भावः सत्त्वं उत्पत्त्यादिसाधकसत्त्वेन कदाचिदपि न तत्सिद्धिः चिदात्मन उत्पत्तिर्ज्ञप्तिर्वा न सा-धनान्तरेण युज्यत इति भावः। चिदात्मन उत्पत्तौ ज्ञप्तौ वा कर्त्तृ-करणयोरपेक्षास्ति। तथा च चितिभेदासम्भवेनैक्यात् स्वस्य स्वसिद्धिकर्त्तृत्वकरणत्वानुपपत्तिः। अचिदात्मा तु चितिमन्तरा स्वयमेवासिद्धः कथं परसिद्धिं कुर्यादिति तात्पर्यम्। एतच्च "श्रीप्रत्यभिज्ञायां कर्त्तरि ज्ञातरि"इति सूत्रे वितानितम् ॥ ८८ ॥ तत्र ज्ञानस्वरूपे विप्रतिपन्नस्य नास्ति ज्ञानमित्याक्षेपपरस्य न प्रश्नो नापि चोत्तरं सिध्यतीति शेषः। ज्ञेयस्य जडस्य स्वरूप-मात्रपरिनिष्ठितस्वभावस्यान्यत्रास्ति नास्तीति विकल्पनसामर्थ्या-भावात्। ज्ञानाधीनत्वादखिलसिद्धेः तदाक्षेपे न प्रश्नादिकं सि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र सर्वं भासते वै दर्पणप्रतिबिम्बवत् ।
देशेन वापि कालेन परिच्छित्तिर्न विद्यते ॥ ९० ॥
तदन्तर्भासमानत्वात् कथं ताभ्यां परिच्छिदिः ।
परिच्छेदस्य भानन्तु गगने वस्तुभिर्यथा ॥ ९१ ॥

द्ध्यतीति तात्पर्यम् , यतस्तदपह्नवे अस्ति नास्ति वेति प्रश्नाद्यसिद्धिरत आह–अनपह्नवनीयमिति । ननु ज्ञानं ज्ञेयमिति वस्तुद्वयन्तत्र ज्ञानापह्नवे ज्ञेयस्य प्रकाश एवोपहतः स्यात् न तु ज्ञेयस्वरूपस्योपहातिस्तथा च तदभावे न किञ्चनेति कथमित्याशङ्क्य ज्ञेयं ज्ञानान्न पृथगिति वक्तुमाह- तन्महादर्शेति ॥ ८९ ॥ तत्र महादर्शतलनिभे ज्ञानात्मनि । यथा हि दर्पणं विना प्रतिबिम्बं न किञ्चित् , एवं ज्ञानं विना ज्ञेयं न किञ्चिदिति भावः । ननु न तदन्तः सर्वं भासते येन सर्वं प्रतिबिम्बात्मकं भवेत् । देशकालयोस्तत्परिच्छेदकयोस्तदनन्तर्गतत्वादित्याशङ्क्य नेत्याह–देशेनेति ॥ ९० ॥ देशकालाभ्यां ज्ञातस्य कुतो न परिच्छित्तिरिति चेदाह–तदन्तरिति। यथा हि दीपेन प्रकाशमानो घटादिर्दीपप्रकाशान्तर्निमग्न एव घटादेरंशो दीपप्रकाशाव्याप्तस्तावान्न प्रकाशमानः तथा ज्ञानेन प्रकाशमानं ज्ञानान्तर्निमग्नमेव निखिलं ज्ञेयम् । एवं घटाकारं ज्ञानमित्याद्यनुभवादपि भासमानो घटाद्याकारो ज्ञानान्तर्गत एव। न हि ज्ञानान्तर्भासमानघटाद्याकारादन्यो घटादिर्ज्ञानाद्बहिरभ्युपेयते प्रमाणाभावात् प्रयोजनाभावाच्च । प्रतिबिम्बानुमितबिम्बात्मकघटादेरनुमितिज्ञानभास्यत्वेन तदन्तर्निमग्नत्वेन ज्ञानान्तर्गतत्वासिद्धेश्च । तथा च देशकालयोरपि ज्ञेयत्वेन ज्ञानान्तर्गतत्वे सिद्धे स्वान्तर्गतेन न स्वपरिच्छेद इति भावः । परिच्छि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजपुत्र सूक्ष्मदृशा तल्लक्षय निजं वपुः ।
यत्र सामान्यचैतन्ये जगदेतद्विराजते ॥ ९२ ॥
तत्समावेशसंसिद्ध्या सर्वकर्तृत्वमाप्नुयात् ।
तस्योपलब्धिं वक्ष्यामि यतः प्राप्नोति तत् पदम् ॥९३॥

दिः, परिच्छित्तिः। ननु कथं तर्ह्यत्रेदानीमेतदज्ञानमिति परिच्छेद-भानमिति चेद् व्यापकस्याकाशस्य स्वान्तर्निमग्नैर्घटाद्यैरिव परि-च्छेदाभास एवेत्याह–परिच्छेदस्येति । वस्तुभिः घटाद्यैः ॥९१॥ एवमखण्डमपरिच्छिन्नं स्वप्रकाशं ज्ञानं निष्कृष्य तदेव समाधौ लक्षणीयं तव निजं वपुरित्याह–राजपुत्रेति। सूक्ष्मदृशेति विषया-काररहितयान्तर्मुख्येत्यर्थः। यथा हि घटादेः स्थूलरूपमा-कारः। सूक्ष्मन्तु निखिलपार्थिवविकारानुस्यूतं पृथिवीसामान्यम्। एवं तत्तदाकाराखिलदृगनुस्यूता सामान्याचितिः सामान्यचैतन्यं तद्रूपं निजं वपुर्लक्षय। जगदिति। समाधौ सामान्यचिद्रूपं यत् प्रकाशते व्युत्थाने विकल्पदशायां तदेवप्रातिविम्बानां दर्पणवत् जगदाश्रयमिति भावः ॥ ९२ ॥ नन्वेवं महता प्रयासेन स्वरूपे उपलक्षितेऽपि न किञ्चित् फलं दृश्यत इति चेदाह–तत्समावेशे-ति । तस्य जगत्प्रकाशाधिष्ठानसामान्यचैतन्यस्योपलक्षितस्य समावेशः। "सोऽहमस्मी"त्यविच्छेदेनानुसन्धानं निदिध्यासन-मिति यावत् । तस्य सिद्धिः परिपाकः अयत्नेनानुवृत्तिरित्ये-तत् । सर्वकर्तृत्वं परमेश्वरतन्मयत्वं यदुक्तं ख्यातिमपूर्णां पूर्णख्या-तिसमावेशाद्दार्ढ्यतः क्षपय । सृज भुवनानि यथेष्टं भज शम्भुं भवगुरुं जगत इति। ननु सामान्यचैतन्यमित्यपि सुषुप्तिवद्दशा-विशेषः, तत् कथं तस्य सर्वदशानुस्यूतत्वमिति चित्तस्य सर्वत्रोपल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निद्राजाग्रन्मध्यभागे संविद्भेदान्तरे तथा ।
मध्ये संविद्द्वयोश्च सूक्ष्मबुद्ध्याऽभिलक्षय ॥ ९४ ॥

ब्धिरस्तीत्याह—तस्येति । सामान्यचैतन्यस्येत्यर्थः । उपलब्धि उपलब्धिस्थानं यतः यस्मान्मद्वचनात् तत्पदं सामान्यचैतन्यस्थानम् ॥९३॥ तदेवाह—निद्रेत्यादि । सामान्यचैतन्यं नाम विषयाकाररहितनिर्विकल्पं ज्ञानं, तच्च निद्राजाग्रन्मध्यभागे स्थितमभिलक्षयेति सम्बन्धः । निद्रा सुषुप्तिः । जाग्राद्विकल्पज्ञानधारा, अन्तःकरणात् पृथग्भूतैः स्थूलैरिन्द्रियैर्जाग्रति विषयग्रहणं स्वप्ने अनुमनोऽन्तःप्रविष्टैः प्राप्ततदैक्यकल्पैर्जलनिर्मग्नकरकासदृशैः संस्कारात्मकमानसविषयग्रहणम् । सुषुप्तौ पुनरिन्द्रियविशिष्टं मनः स्वयोनौ प्रकृतौ विलीयते । प्रकृतिश्च तदा उन्मिषत्तमोंऽशेन सत्वांशं रजोंशं चाच्छाद्य तिष्ठति । तदा घनच्छन्नार्कवदात्मापि तमसाच्छन्नः स्वयं मन्दं प्रकाशते । तथा च जाग्रत्सुषुप्त्योर्मध्यक्षणे मनसो विलयाभिमुखत्वान्न विषयग्रहणम् । प्राकृततमसोऽत्यन्तमनुन्मेषान्न स्वरूपाच्छादनमिति चिदात्मा विषयाकारसमाप्तः प्रकाशमानः सामान्यचैतन्यरूपः । एवं संविद्भेदान्तरे संविदां भेदो घटाकारता पटाकारेत्यादि । एवं भिन्नसंविदामन्तरे मध्ये न हि ज्ञानस्य घटाकारतेव पटाकारता तद्भेदस्य प्रसिद्धत्वात् । सिद्धे च तद्भेदे घटाद्याकारशून्या शुद्धान्तरदशाऽनिवार्यैव । एवं संविद्द्वयोर्मध्ये संविदित्यहङ्कारात्मा द्रष्टा यथा मुक्तद्वारेण तडाकोदकं कुल्याद्वारा केदारोदकेनैकीभवति । तथा विषयग्रहणकाले द्रष्टृसंविद् दृश्यसंवित्पर्यन्तं करणद्वारैकीभवति । तत्र द्रष्टृस्थाने शरीरादि द्रष्ट्राकारं चैतन्यं नभसि दृश्ये सूर्यमण्डले च तदाकारं मध्ये तु शुद्धमाकारवर्जितमिति । विषया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत् पदं निजं रूपं यत् प्राप्य न विमुह्यसि ।
एतदज्ञानमात्रेण प्रवृत्तं जगदीदृशम् ॥ ९५ ॥
नात्र रूपं रसो वापि न गन्धस्पर्शशब्दकम् ।
न दुःखं न सुखं वा तु न ग्राह्यं ग्राहकश्च न ॥९६॥
सर्वाश्रयं सर्वरूपमपि सर्वविवर्जितम् ।
एष सर्वेश्वरो धाता विष्णुरीशः सदाशिवः ॥९७॥

कारवर्जितं चैतन्यमात्मनो वास्तवं रूपं तस्योपलब्धिस्थानान्येतानीति भावः ॥ ९४ ॥ नन्वेतदात्मोपलब्धिस्थानं तथा आत्मा कीदृश इति चेदाह—एतदिति । एतत्पदमेव निजं रूपं न ततोऽतिरिक्तं किञ्चित् परित्यक्तदृश्याकारं शुद्धचैतन्यमेव द्रष्टुर्वास्तवं रूपमिति भावः । यत् प्राप्य अहमस्मीति दृढमुपलभ्य । एतदज्ञानमात्रेण अहमस्मीत्यनुपलम्भेन । ईदृशं महादुःखमयं शुद्धचैतन्यं वास्तवमात्मनो रूपमिति ज्ञाते तत्तदाकारस्य दर्पणे प्रतिबिम्बवत् कल्पितत्वानिश्चये प्रतिबिम्बव्याघ्रादेर्यथा न दुःखदत्वमेवं दृश्यभासस्यापीति भावः ॥९५॥ यत एवं विधदशासूपलभ्यं शुद्धचैतन्यमेवात्मनो वास्तवं रूपमतो विषयाकाराभासदशायामपि दर्पणे प्रतिबिम्बवत् स्वरूपातिरिक्तं न किञ्चिदित्याह—नेति । अत्र आत्मनि । शब्दनं शब्दः । न ग्राह्यमिति विशेषरूपेण निषिद्धानां रूपादीनां सामान्यरूपेण निषेधः । ग्राहकमिन्द्रियादि ॥९६॥ प्रतिबिम्बानां दर्पण इव सर्वस्य दृश्यस्याश्रयं तथा सर्वरूपम् । एवमपि वस्तुतः सर्वविवर्जितम् । दर्पणस्य यथा सर्वप्रतिबिम्बाश्रयादित्वेऽपि वस्तुतः सर्ववर्जितत्वं तथेति भावः । का सा परा चितिर्मतेति के वा वयमिति च पृष्टम् । ततः ज्ञाते स्वात्मस्वरूपे वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्येषदन्तः संरुध्य स्वात्मानं स्वात्मना सता ।
त्यक्त्वा बहिः प्रसरतामन्तःप्रसरणोद्यतः ॥ ९८ ॥

ततां ज्ञास्यसि मातरमित्युत्तरमुक्तं प्राक् । तत्र पुनः पृष्टा हेमलेखा महता प्रबन्धेन स्वात्मरूपं विविच्य प्रोवाच । संप्रति एवंविधं शुद्धं स्वात्मरूपमेव पराचिदात्मकं मातृरूपमित्युपदिशति–एषेति । शुद्धः सामान्यचैतन्यरूप आत्मेत्यर्थः । सर्वेषां ब्रह्मादीनाम् ईश्वरः तुर्य ईशः तिरोधानक्रियः ईशो रुद्रः सदाशिवः पञ्चमोऽनुग्रहकारी । यथा हि दर्पणे तत्तत्प्रतिबिम्बपरिच्छिन्नदर्पणांशानां तत्तद्रूपेण भेदेऽपि दर्पणसामान्यरूपेणाऽखिलदर्पणानुस्यूतता तस्य यथा प्रतिबिम्बकल्पतत्तद्देहाद्यवच्छिन्नचैतन्यरूपेण भेदेऽपि समाध्याद्युपलब्धसामान्यचैतन्यरूपेण सर्वानुस्यूतत्वादेष एव सर्वेश्वरादिरिति भावः ॥९७॥

एवंविधमात्मतत्त्वं मदुपदेशैर्व्युत्पन्नस्य न दुर्लक्ष्यमित्याह–पश्येति । ईषदिति न चिरं संरोधापेक्षा, किन्तु क्षणं दृश्याकारानुल्लेखेन मनः संरुध्य तद्रूपं पश्येति भावः । तद्रूपस्यादृश्यत्वात् कथं पश्यामीति चेदाह–स्वात्मना सतेति । न हि तदिदमीदृशमिति द्रष्टुं शक्यं, किन्तु निरोधावधिभूतस्वात्माभिन्नसामान्यसद्रूपेण सद्योजनितशिशोर्जडव्यावर्त्तकान्तरुल्लसत्स्वरूपाभिन्नविशेषवदस्मीति सामान्याभ्युपगमरूपेणेति भावः । कथं मनः संरोद्धव्यं तदाह–त्यक्त्वेति । बहिःप्रसरता दृश्याभिमुखता । अन्तःप्रसरणे उद्यत उद्यमवान् सन्नित्यर्थः । अत्रान्तः प्रसरणं, वहिः प्रसरणत्यागस्य दृढावष्टम्भरूपोऽभिनिवेश एव नान्यत् व्यापारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यक्त्वा पश्यामीति भावमन्धवन्निश्चलात्मना ।
दर्शनादर्शने त्यक्त्वा योऽसि सोऽसि द्रुतं भज ॥९९॥
इत्युक्तः प्रियया हेमचूड आलक्ष्य तत् पदम् ।
चिरं विश्रान्तिमालभ्य बहिर्विस्मरणं ययौ ॥ १०० ॥

इति श्रीज्ञानखण्डे हेमचूडविश्रान्तिर्नवमोऽध्यायः ॥

न्तरं स्वरूपं व्यापारानुपपत्तेः ॥ ९८ ॥ एवमपि अहं मां पश्यामीत्यभिनिविशतः स्वरूपं दुर्लक्ष्यमित्यत आह–त्यक्त्वेति । पश्यामीति भावमभिमानम्, अत्र दृष्टान्तः–अन्धवदिति । निश्चलात्मना वृत्तिसामान्यशून्यरूपेण स्थितं पश्येति सम्बन्धः । यदुक्तम्–पश्यामीत्यपि यावत्ते द्रष्टृभावो विजृम्भते । तावद्यत्नशतैश्चापि न पश्यस्यात्मवैभवमिति । एतदेव विविच्य पुनराह,–दर्शनेति । दर्शनं जाग्रत्स्वप्नरूपविकल्पज्ञानं, अदर्शनं सुषुप्तिरूपं मूढत्वं, तदुभयं व्यावृत्तरूपं त्यक्त्वा "नाहमस्मीति" दृढं निश्चित्य स्थितस्त्वं योऽसि यद्रूपोऽसि परिशेषादवस्थात्रयानुगतया दृशा सामान्यचैतन्यतुर्यरूपोऽसि सोऽसि तद्रूप एवासि तमेवात्मत्वेन भज । अवस्थात्रयसाक्षितुर्यरूपमात्मत्वेन कालविलम्बमपहाय द्रुतं भजेति भावः ॥९९॥ तथा कृत्वा तत् पदमालक्ष्य विश्रान्तिर्निर्विकल्पसमाधिः ॥ १०० ॥

इति श्रीत्रिपुरारहस्ये ज्ञानखण्डे तात्पर्यदीपिकायां
नवमोऽध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमोऽध्यायः ।

अथाऽपश्यद्धेमलेखा प्रियं प्राप्तपरःस्थितिम् ॥
न चालयत्परपदात्ततः सोपि मुहूर्ततः ॥ १ ॥
प्रवुद्ध उन्मील्य नेत्रे सोऽपश्यत्सप्रियं जगत् ॥
भूयस्तत्पदविश्रान्तिमीहमानोऽतिवेगतः॥ २ ॥
नेत्रे निमीलयद्यावदब्रवीत्तावदेव सा ॥
प्रियं हस्ते समादाय सुधासुन्दरभाषिणी ॥ ३ ॥
नाथ किं ते व्यवसितं ब्रूहि नेत्रनिमीलनात् ।
उन्मीलनाद्वा किं स्यात्ते लाभालाभौ समीरय॥४॥
उन्मील्य न प्राप्यते किं निमील्य प्राप्यते च किम् ।
तन्मे ब्रूहि प्रियतम श्रोतुमिच्छामि ते स्थितिम्॥५॥
एवं पृष्टस्तया प्राह मदमत्त इवालसः ॥
अनिच्छन्नपि वक्तुं तामालस्यभरमन्थरः ॥ ६ ॥
प्रिये विश्रान्तिमत्यन्तं प्राप्तवानस्मि वै चिरात् ।

अत्राध्याये धातुपद्यैः प्रियया बोधितः पुनः। प्राप्य बाह्य-समाधिं स जीवन्मुक्तोऽभवद्दृढम् ॥१॥ प्राप्ता परस्मिन् सामान्य-चिद्रूपे स्थितिर्येन। न चालयत् नोद्बोधयत् ॥१॥ सप्रियं प्रिया-सहितम् । तत्पदविश्रान्तिः समाधिः ॥ २ ॥ सा हेमलेखा ॥३॥ व्यवसितं निश्चितम् । निमीलनादिना यद्भवेल्लाभः अलाभो वा तौ समीरय ॥ ४ ॥ एतस्यैव विवेचनम्—उन्मील्येति । स्थितिम् अभ्युपगमम् ॥ ५ ॥ मन्थरः मन्दव्यहारः॥६॥विश्रान्ति विश्रमणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न बाह्ये दुःखभूयिष्ठे विश्रमोऽस्ति क्वचिन्मम ॥७॥
अलं ऋजीषरोमन्थप्रायव्यवहृतैर्बहिः ।
दौर्भाग्यान्धो नाद्य यावदविदं स्वात्मसत्सुखम्॥८॥
यथा कश्चिददृग्भिक्षां निधानं स्वं न वेद वै ।
तथाहं स्वसुखाम्भोधिमविदित्वा पुनःपुनः ॥ ९ ॥
सुखं वैषयिकं श्रेष्ठं दुःखसंघाभिसंप्लुतम् ॥
विद्युद्विलयनं मत्वा स्थिरं तत्परतावशात् ॥१०॥
दुःखैरभिहतो नूनं विश्रान्तिं न तु लब्धवान् ।
अहो जना दुःखसुखविवेकज्ञानवर्जिताः ॥ ११ ॥
सुखार्थिनो दुःखसंघं साश्रिन्वन्ति मुधा सदा ॥
तदलं दुःखभोगेन स्वयत्नासादितेन वै ॥ १२ ॥
प्रिये कृपां मयि कुरु प्रार्थयामि कृताञ्जलिः ।
विश्रान्तिमभिवाञ्छामि चिरं स्वस्मिन्सुखात्मनि॥१३॥

दुःखासम्भिन्नसुखमित्येतत् । बाह्ये व्यवहारे ॥७॥ ऋजीषम् । हृतरसेक्षुखण्डांशः । रोमन्थः चर्वितचर्वणं पशुषु प्रसिद्धम् । तदेवान्नं च पानं च प्रियाङ्गमोहकं च तत् एतदास्वादनं नूनं पशुरोमन्थवत्सदेत्युक्तरीत्या न ह्यपूर्वं किञ्चिदिति भावः । अनन्धोपि दौर्भाग्येनान्धप्रायः। स्वात्मसम्बन्धि सत्सुखम्। न तु वैषयिकसुखवदसत्क्षणिकमिति भावः ॥ ८ ॥ स्वात्मसम्बन्धि सुखाम्भोधिम् ॥९॥ श्रेष्ठं स्थिरं च मत्वेति योजना । विद्युद्विलयनं विद्युदिव क्षणमात्रेण विलयनं नाशो यस्य । तत्परता तदाश्रयणम् ॥ १० ॥ विश्रान्तिं दुःखासम्भिन्नसुखम् । जनास्तु दुःखेषु सुखाभिमानात् दुःखमेवानुभवन्तीत्याह–अहो इति ॥ ११ ॥ दुःखसङ्घं दुःखसाधनजालं धनगृहादिकम् ॥१२॥ विश्रान्तिं मोक्षसुखात्मकस्वस्वरूपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो दैवहता भासि ज्ञात्वापि त्वमिदं पदम् ।
तद्विश्रान्तिं परित्यज्य मुधा दुःखाय चेष्टसे ॥१४॥
इत्युक्त्वा सा प्रियं प्राह स्मयित्वेषन्मनीषिणी ॥
नाथ ते तन्न विदितं पदं परमपावनम् ॥ १५ ॥
यत्र स्थिता न मुह्यन्ति पण्डिताः पावनाशयाः ।
तत्पदं दूरतस्तेऽस्ति भूस्थस्येव नभस्तलम् ॥ १६ ॥
त्वया किञ्चित्सुविदितं भवेदविदितोपमम् ।
निमील्योन्मील्य वा नेत्रे तत्पदं न समीक्ष्यते॥१७॥
अकृत्वा वापि कृत्वा वा न तल्लभ्येत कर्हिचित् ।
अगत्वा चापि वा गत्वा न तदासादयेत्पदम् ॥१८॥
निमील्य कृत्वा गत्वा वा प्राप्तं पूर्णं कथं भवेत् ।

वस्थानात्मकं समाधिम् ॥१३॥ चेष्टसे व्यवहारपरासि ॥१४॥ स्मयित्वा स्मितं कृत्वा । तत् अपरिच्छिन्नं सामान्यसंविद्रूपम् । न विदितम् अहमस्मीति न प्रत्यभिज्ञातम् । परमपावनं द्वैतमलःलेशरहितम् ॥१५॥ यत्र अद्वैतचिद्रूपे पूर्णे पदे । स्थिताः अहमस्मीति दृढाभिनिवेशङ्गताः । न मुह्यन्ति नेत्रोन्मीलननिमीलनाभ्यां स्वरूपे विशेषं नाधिगच्छन्तीति भावः । पावनाशयाः द्वैतवासनोक्रान्तचित्ताः । तत्पदं पण्डितासादितम् ॥१६॥ त्वया निरोधपरतन्त्रेण किञ्चित्परिच्छिन्नं विदितमपि तत्र परिच्छेदस्यावस्तुत्वेन शुद्धन्न विदितमिति अविदितोपममेव। कुत एवमिति चेदाह—निमील्येति ॥ १७ ॥ अकृत्वेति । स्वप्रकाशत्वान्नित्यत्वात्सर्वगतत्वाच्च । तत्स्वरूपे निमीलनकरणगमनादिभिर्न विशेष इति भावः ॥ १८ ॥ अन्यथा पूर्णत्वादिहानिरित्याह—नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यवाष्टकमितेनैव पक्ष्मणोन्मीलितेन तु॥ १९ ॥
अन्तर्हितं यदि तदा ननु पूर्णं भवेत्पदम् ।
अहो ते मोहमाहात्म्यमाश्चर्यं किमहं ब्रुवे ॥ २० ॥
यस्मिन्ब्रह्माण्डकोटीनां कोटयः कोणसंस्थिताः॥
पक्ष्मणोङ्गुलिमानस्योन्मीलनात्तत्तिरोहितम् ॥२१॥
शृणु राजकुमारैतत्तत्त्वसारं वदामि यत् ।
यावद् ग्रन्थिविभेदो न न तावत्सुखमृच्छति॥२२॥
ग्रन्थयः कोटिशः सन्ति मोहरज्जुविवर्त्तिताः ।
तत्र स्वरूपासंवित्तिर्मोहरज्जुरुदीरिता ॥ २३ ॥
यत्र ता ग्रन्थयः सन्ति विपरीतग्रहात्मकाः ।
तत्राद्या देहमुख्येषु भवेदात्मत्वनिश्चयः ॥ २४ ॥

मीलयेति। पूर्णमिति स्वप्रकाशं नित्यमित्यनयोरुपलक्षणम्। पूर्णस्य नेत्रोन्मीलनेन तिरोहितताऽत्यन्तविरुद्धेति सोपहासमाह—यवाष्टकेति॥१९॥ अन्तर्हितत्वे पूर्णं भवेत्, नन्विति सावहेलं वाक्यम् । एतदेव स्पष्टमाह—अहो इति॥२०॥ यस्मिन्सामान्यचिद्रूपे आत्मनि । तिरोहितमित्याश्चर्यमिति संबन्धः ॥ २१ ॥ एवं मोहे हेतुं वक्तुमाह—शृण्विति । तत्त्वसारमिति । तत्त्वस्य सामान्यसंविदात्मनः सारं निष्कृष्टं रूपम् । यदेतद्वदामि तच्छृण्विति सम्बन्धः । ग्रन्थिभेदाभावाद्विदितमप्यविदितप्रायमित्याह । यावदिति॥२२॥ रज्ज्वादिविवर्त्तनेनोद्ग्रथिता ग्रन्थिरित्युच्यते । प्रकृतग्रन्थयः मोहरज्जोर्विवर्त्तनोद्ग्रन्थनात्मिकाः। कतमा मोहरज्जुरितिचेदाह—तत्रेति ॥२३॥ यत्र यस्यां मोहरज्जौ तत्र । तासु ग्रन्थिषु मध्ये । देहमुख्येषु देहेन्द्रियादिषु देहादावात्मत्वनिश्चयस्य स्वरूपाज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वशादेष संसार आततो दुष्प्रतिक्रियः ।
तथा जगत्यनात्मत्वबुद्धिर्भानसमाश्रये ॥ २५ ॥
एवं जीवेशभेदादिनिश्चया ग्रन्थयो मताः ।
एतच्चिरात्समुद्भूतं भूयः संवर्त्तितं च वै ॥ २६ ॥
ग्रन्थिरूपसमापन्नं पुरुषः पाशितस्ततः ।
तद्ग्रन्थिविस्रंसनतो बन्धान्मुक्तिः समीरिता ॥ २७ ॥
यत्त्वं निमील्य नेत्रे स्वे पदमासादयस्यलम् ।
तत्पदं निजरूपं ते शुद्धसंविदनुत्तरम् ॥ २८ ॥

मूलकत्वेन तदाश्रयत्वं यथा सुदृढग्रन्थेः स्वाश्रयरज्जुच्छेदनमन्तरा न विस्रंसनम् । एवं स्वरूपाज्ञानरज्जुच्छेदमन्तरा देहाद्यात्मभावो दुष्परिहर इत्यस्य ग्रन्थित्वं ज्ञेयम् ॥२४॥ यद्वशात् । देहाद्यहंभाववशात् । एषः प्रसिद्धः संसारः सुखदुःखानुभवप्रवाहः । द्वितीयां ग्रन्थिमाह—तथेति । दर्पणप्रतिविम्बाद्भानसमाश्रये भानमात्रात्मके जगति अनात्मबुद्धिर्द्वितीयेत्यर्थः । देहाद्यात्मकद्रष्ट्रभासनपूर्वकत्वादनात्मदृश्यभासनस्य द्वितीयग्रन्थित्वं ज्ञेयम् ॥ २५ ॥ आदिना जीवपरस्परभेदनिश्चयादिः । एतत् स्वरूपाज्ञानम् । चिरात् अनादिकालात् । भूयः संवार्त्तितं ग्रन्थिरूपं समापन्नमिति सम्बन्धः । यथा रज्जुरेव भूयःसंवर्त्तनेन ग्रथिता ग्रन्थिरित्युच्यते । एवं स्वरूपाज्ञानमेव देहाद्याश्रयचिदात्मप्रदेशसंवर्त्तनेन परिच्छेदाद्याभासत्वेन ग्रथितं ग्रन्थिरित्युच्यत इति तात्पर्यम् ॥ २६ ॥ ततः अज्ञानरज्ज्वा यथा रज्जुग्रन्थिविस्रंसनतः पाशिताः पशवो मुक्ताः एवं पुरुषा अपीति भावः ॥ २७ ॥ ननु केयं ममाज्ञानग्रन्थिर्या विस्रंसनीयेत्याशङ्क्यान्तःकरणनिरोधे मम न स्वरूपविश्रान्तिरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवाखिलसंसारचित्रादर्शतलं महत् ।
कदा क्व केन रूपेण नास्ति तन्मे निरूपय ॥ २९ ॥
यदा यद्रूपतो यस्मिन्नेति ब्रूयाः स्वसंविदम् ।
तर्हि तत्कालदेशादेर्वन्ध्यापुत्रत्वमेव हि ॥ ३० ॥
प्रतिबिम्बो निरादर्शो यथा नाथ तथैव तत् ।
तस्मात्तत्पदसंत्यागान्नास्ति कुत्रापि किंचन ॥३१॥
तत्ते नेत्रोन्मीलनेन किमन्तरितनामिषात् ।
यावदेवं विजानामीत्येवं ग्रन्थिर्दृढा भवेत् ॥ ३२ ॥
तावन्न तत्पदं प्राप्तं यत्प्राप्तं स्यान्न तद्भवेत् ।

त्येषैव भ्रमरूपेति वक्तुमाह—यत्त्वमिति । अलं पर्याप्तं पूर्णं पदमित्यर्थः । तदेव पदं ते निजरूपम् । अनुत्तरं सर्वनिषेधावधिभूतम् ॥२८॥ चित्रस्यादर्शतलम् । महत् अपरिच्छिन्नम् । कदा क्व केनेति । कालदेशाकारपरिच्छेदनिरासः ॥२९॥ कुत एवमिति चेदाह—यदेति । स्वसंविदम् सामान्यचितिम् । इदानीमत्रैतद्रूपेण संविन्नास्तीति यदि ब्रूयाः तर्हि तत्कालादीनां वन्ध्यापुत्रत्वमेव । यस्मिन्काले देशे वा यदाकारेण संविन्नास्ति तत्कालादिकं प्रकाशते न वा? आद्ये कालादीनां जडत्वेनास्वप्रकाशानां संवित्तादात्म्यमृते प्रकाशानुपपत्तेः सिद्धा संवित् । द्वितीयेऽप्रकाशमानानां तुच्छत्वं दुरपोहमित्यभिसन्धिः ॥ ३० ॥ संवित्तादात्म्यरहितानां कालादीनां निरादर्शप्रतिबिम्बवदसत्त्वमेवेत्याह—प्रतिबिम्ब इति। तत्पदं सामान्यचैतन्यम् ॥ ३१ ॥ तत् तस्मात्संविदात्मनोऽपरिच्छिन्नत्वादित्यर्थः। एवं क्रियया आत्मानं विजानामि इत्येवमभिमानरूपा ग्रन्थिः ॥३२॥ प्राप्तं न भवति । नन्वनुभूयमानस्य क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमील्योन्मील्य वा नेत्रे यत्प्राप्तं मन्यसे पदम्॥३३॥
तन्न पूर्णपदं यस्मात्परिच्छेदात्क्रियादितः।
कुत्र नाथ महासंविन्नास्ति कालानलप्रभा ॥ ३४ ॥
स्वात्मीकरोति यानल्पकल्पनेन्धनसंचयम्।
न ते कर्त्तव्यसंशेषो विज्ञाय परमं पदम् ॥ ३५ ॥
त्यज ग्रन्थिं सन्निरुध्य पश्यामीति हृदि स्थिताम्।
इदं नाहमिति ग्रन्थिमुन्मूलय परां दृढाम् ॥ ३६ ॥
पश्य सर्वत्र चात्मानमखण्डानन्दबृंहितम्।
पश्यात्मन्यखिलं लोकं दर्पणप्रतिबिंबवत् ॥ ३७ ॥

थमपलाप इति चेदाह—यत्प्राप्तमिति । न तद्भवेदिति । सर्वत्रानुपलभ्यमानस्य परिच्छिन्नत्वेन सामान्यचैतन्यात्मकपूर्णपदत्वाभावत्वादिति तात्पर्यम्। एतदेव विशदयति—निमील्येति॥३३॥ क्रिया निरोधरूपा । आदिना कालः । निरोधक्रियया तत्कालेऽबाह्ये भासमानत्वेन परिच्छेदइति भावः ॥ ३४ ॥ कालानलत्वमेव निरूपयति—स्वात्मीति । यथा कालानलः स्वात्मनि पतितं सर्वं स्वात्मीकरोति तथा स्वात्मनि तादात्म्येन भासमानमखिलं स्वात्मीकरोतीति भावः। मनो निरोद्धव्यमिति योयं भ्रमः स परिहर्त्तव्य इत्याह—न ते इति। शेषो भवेदिति शेषः ॥३५॥ सन्निरुध्यैव स्वरूपं पश्यामि नान्यथेति भ्रमरूपां ग्रन्थिं त्यज। एतद्ग्रन्थिमूलभूतामपरां ग्रंथिं त्यजेत्याह। इदमिति। तथा निरोधकाले भासमानं दृश्यासंभिन्नमात्मरूपम् एवमनिरोधकाले भासमानमपि विषयसंभिन्नरूपं स्वात्मन एव रूपम्। तच्चापि शुद्धमेव दृश्यस्य प्रतिबिम्बतुल्यत्वादिति भावः ॥ ३६ ॥ एतदेवोपपादयति—पश्येति । सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्राखिलमात्मानमिति भूयो न भावयन् ।

त्र दृश्यावभासजाले आभासमानस्यासिद्धेर्भासमानस्य सर्वस्य भानव्याप्तत्वात् भानस्यैवात्मत्वादिति भावः । ननु सर्वत्र भानात्मा भासते तथाप्ययं निरोधे भासमानइव नानन्दैकरूप इति चेदाह—अखण्डानन्दबृंहितमिति । अपरिच्छिन्नानन्देन बृंहितं भरितमित्यर्थः । इदमत्राकूतम् । स्वात्मनः संविद्रूपतैवानन्दरूपता, नातिरिक्ता द्वैतापत्तेः । अखण्डैकवस्तुन्यात्मनि निर्धर्मके जडात्मत्वव्यावृत्तये यथा संविच्छब्दव्यवहारः तथा दुःखरूपताव्यावृत्तये आनन्दशब्दव्यवहारः । यश्च निरोधकाले आनन्दानुभवः स न स्वरूपविशेषकृतः स्वरूपस्य निर्विशेषत्वात् । अपि तु काम एव महद् दुःखं निष्कामस्य कुतस्तु तदिति नीत्या कामवासनानन्तसन्ततिसमाक्रान्तस्वभावो दावाग्निसंकीर्ण इव दुःखभागयं जनः । निरोधकाले पुनरयमेव द्वैतभासाभावात्तन्मूलककामवासनानामनुन्मेषान्मस्तकन्यस्तभारत्याग इव सविशेष एव सुखी संवृत्तो भवति। तथा च कामवासनाहानमूलैव निरोधे सुखात्मतानुभूतिरिति अनिरोधेपि कामवासनाहाने प्रजहाति । यदा कामानिति भगवदुक्तनीत्या आनन्दरूपतानुभूतिरनिवार्यैवेति । नन्वनिरोधे कामवासनामूलस्य द्वैतभासस्यानपोह्यत्वेन कामवासनानामुन्मेषावश्यम्भावात्तन्निमित्तं दुःखं कथं न भवेदित्याशङ्क्याह–पश्येति । अनिरोधे भासमानमखिलं द्वैतं न स्वात्मनः पृथगस्ति । दर्पणप्रतिविम्बवदित्यर्थः । यथा हि प्रतिविम्बत्वेन दृष्टे वस्तुनि न कामवासनोदयः, तथा निखिलस्य दृश्यस्य स्वात्मादर्शप्रतिविम्बत्वनिश्चये सति न कामवासना नापि दुःखमिति भावः ॥ ३७ ॥ ननु सर्वमात्मनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषमभ्युपगम्यान्तःस्वस्थो भव निजात्मना ॥३८॥
इति प्रियोदितं श्रुत्वा हेमचूडः सिताशयः।
विदित्वा पूर्णमात्मानं सर्वत्र भ्रान्तिवर्जितः॥३९॥
क्रमात्पूर्णसमावेशासादनात्स्थिरभावनः।
विहरन्सर्वदा हेमलेखादियुवतीगणैः ॥ ४० ॥
शासन् राज्यं समृद्धं स्वं जित्वा शत्रुगणं रणे।
शास्त्राणि श्रावयन् शृण्वन्नर्जयन्धनसंचयम्॥४१॥

प्रतिबिम्बात्मकं चेत् सर्वत्राखिलमात्मानमेव पश्यामीति मन्त्रानं प्रत्याह—सर्वत्रेति। आन्तरे बाह्ये चेत्यर्थः। अखिलमिति। भासमानमखिलं सुखादिकं घटादिकं चेत्यर्थः। सर्वत्राखिलमात्मानं पश्यामीति शेषः। तथा च सर्वत्र भासमानमखिलमात्मानं पश्यामीति प्रथमं निश्चित्य भूयः सर्वत्र अखिलमात्मानमित्याद्यंशं न भावयन्। शेषं रूपं भाव्यांशरिक्तं भावकरूपं सामान्यचैतन्यं अहमस्मीत्यन्तरभ्युपगम्य चेत्यातिरिक्तचितिमात्ररूपोऽहमस्मीति संस्कारशेषः सन्निति भावः। एवंविधेन निजात्मना अकृत्रिमस्वस्वरूपेण स्वस्थो भव। एवंविधस्वस्वरूपावष्टम्भादप्रच्युतो भवेत्यर्थः। यदाह वसिष्ठः—चेत्यनिर्मुक्तता या स्यादचेत्योन्मुखतापि वा। अस्य सा भरितावस्था तां ज्ञात्वा नानुशोचतीति ॥३८॥ सिताशयः सर्वभ्रान्त्यपगमाच्छुद्धान्तःकरणः। पूर्णमात्मानं निरोधेतरदशयोरेकरूपेण भासमानम्। निरोधे एव शुद्धात्मा भासत इतिभ्रान्तिविवर्जितः ॥३९॥ प्रोक्तरूपाहंभावभावनाक्रमात् पूर्णे प्रोक्तरूपे समावेशो निष्पकंपाभिमानः। प्राग्स्थितदेहसमावेशवत्। यदाहुः—देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्। आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्वमेधराजसूयाद्यैर्यजन्क्रतुमुख्यकैः ।
वर्षाणामयुते द्वे वै जीवन्मुक्तो भुवि स्थितः॥४२॥
जीवन्मुक्तदशासंस्थं निशाम्य तनयं नृपः ।
मुक्ताचूडश्च तद्भ्राता मणिचूडोप्यचिन्तयत् ॥४३॥
किमयं पूर्ववन्नेह लक्ष्यते सर्वथा किल ।
सुखे न हृष्यत्यत्यन्तं दुःखे नोद्विजते तथा ॥ ४४ ॥
लाभालाभौ शत्रुमित्रे साम्यात्पश्यति वै कुतः ।
करोति राजकार्याणि नटवद्रङ्गमण्डले ॥ ४५ ॥
कापिशायनपायीव सदा मत्तोऽभिलक्ष्यते ।
सदान्यत्र गतस्वान्त इव कृत्यङ्करोत्यलम् ॥ ४६ ॥
तत्केन हेतुना चेति तमासाद्य रहः क्वचित् ।
अपृच्छतां हेमचूडं कुत एवं भवानिति ॥ ४७ ॥
ततः स्वस्थितिमाचख्यौ हेमचूडस्तयोः क्रमात् ।
तावुभौ भ्रातृपितरौ हेमचूडेन बोधितौ ॥ ४८ ॥
आसादितपरतत्त्वौ जीवन्मुक्तौ बभूवतुः ।
अथ मन्त्रिगणोऽप्येवं राज्ञः श्रुत्वा जगद्गतिम् ॥४९॥

त इति । स्थिरभावन इति । समावेशसिद्ध्युत्तरं स्थिरतत्संस्कार इत्यर्थः । विहरन्भुवि स्थित इति दूरस्थेन संबन्धः ॥४०॥४१॥४२॥ हेमचूडपिता मुक्ताचूडो नृपः ॥४३॥ तच्चिन्तनप्रकारमाह—किमयमिति । अयं हेमचूडः ॥४४॥ नटवच्छन्नान्तराभिप्रायः ॥४५॥ कापिशायिनं मद्यम् ॥ ४६ ॥ तं हेमचूडम् । मुक्ताचूडमणिचूडावपृच्छताम् ॥४७॥ तयोः पितृभ्रात्रोः ॥४८॥ जगद्गतिं जगत आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचार्य स्वात्मनो भावं ज्ञातज्ञेयोऽभवत्तदा ।
एवं विशालनगरे क्रमेणैव परस्परम् ॥ ५० ॥
उपदेशाद्विदुः सर्वे तत्त्वमाबालगोपकाः ।
नरा नार्यो बालवृद्धा दासा दासीगणा अपि ॥५१॥
ज्ञातज्ञेयास्त्यक्तदेहाहंभावा अभवन्खलु ।
न तत्र कस्यचित्कामः क्रोधो वा लोभ एव वा॥५२॥
अनाहृतोऽस्ति बालस्य स्थाविरस्यापि वा क्वचित् ॥
आहृतक्रोधकामाद्यैर्व्यवहारपरायणाः ॥ ५३ ॥
बालं माता खेलयति परतत्त्वस्य वार्तया ।
दासा दास्यः स्वामिनं स्वं सदा परिचरन्ति वै ॥५४॥

त्मव्यतिरिक्तरूपत्वेन स्थितिम् ॥४९॥ आत्मनस्तादृशं भावं विचार्य निश्चित्य । परस्परमुपदेशाद्विदुरिति संबन्धः ॥ ५० ॥ तत्त्वं वस्तुयाथात्म्यम् ॥ ५१ ॥ ज्ञातं ज्ञेयं शास्त्रेषु मुख्यज्ञेयत्वेनाभिमतं यैः लोभ एव वा अनाहृतो नास्तीति संबन्धः ॥५२॥ बालस्येति । बालवृद्धयोरविचारस्वभावयोः प्रायः सदा क्रोधादिसंभवस्तथापि सम्यक्तत्त्ववेदनामाहात्म्येन कामादिमूलदेहाहंभावस्योन्मूलितत्वान्न तन्मूलकामादिरनाहृतोऽस्तीति तात्पर्यम्। किमर्थं कामादेराहरणमिति चेद्व्यवहरार्थमित्याह । आहृतेति । यथा हि नटानां आहृतकामाद्यैः प्रासङ्गिको नाट्यव्यवहारः एवं तत्र सर्वेषामिति भावः ॥५३॥ ननु सदा व्यवहारपराणां केषांचिदपरिपक्वचित्तानां तत्त्वानुसंधानं शिथिलीभवेदित्याशङ्क्य तद्व्यवहारस्य तत्त्वानुसंधानानुकूलत्वान्नेत्याह—बालमित्यादि। परतत्त्वस्य वार्तया । मा रुद त्वं महेश्वरोऽसि न ते वस्तुतो दुःखमित्यादिरूपया । एवमग्रेपि ज्ञेयम् ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परतत्त्वपरैर्वाक्यैर्व्याहरन्तः परस्परम् ।
नटा नाट्यं वितन्वन्ति पात्रैस्तत्त्वप्रसङ्गजैः॥५५॥
विवेकवार्तापरमं वचो गायन्ति गायकाः ।
विदूषका दूषयन्ति लोकव्यवहृतिं सदा ॥ ५६ ॥
शास्त्राणि पाठयन्ति स्म विद्वांसः पाठकान् जनान् ।
परतत्त्वविचाराढ्यैरुदाहरणमण्डलैः ॥ ५७ ॥
एवं तत्र नरा नार्यो दासा दास्यो नटा विटाः ।
भृत्या भटा मन्त्रिणश्च शिल्पिनो वारयोषितः॥५८॥
सर्वे वेदितवेद्यास्ते विशालनगरेऽभवन् ।
प्राक्संस्कारबलेनैव व्यवहारपरायणाः ॥ ५९ ॥
न संस्मरति संवृत्तं शुभं वाप्यशुभं तथा ।
भविष्यं नानुसन्धत्ते हर्षशोकादिसाधनम्॥६०॥
वर्तमाने स्मयन्हृष्यन्खिद्यन् क्रुध्यन्निवान्वहम् ।
मधुक्षीब इवात्यन्तं व्यवहारपरो जनः ॥ ६१ ॥
एवंविधं तन्नगरं ऋषयः सनकादयः ।

तत्त्वप्रसंगजैःपात्रैः विवेकमोहादिवेषैः ॥ ५५ ॥ ५६ ॥५७ ॥५८॥ ननु सर्वेषां तत्र विदितवेद्यत्वे कथं तत्र भूपालादेः सर्वो राज्यादिव्यवहार इत्याशङ्क्याह—प्रागिति । यथा हि मदिरामत्तः शूरः प्राक्संस्कारमात्रेण शस्त्रवर्त्मस्वस्खलन्युध्यति तथेति भावः ॥ ५९ ॥ ननु तत्रत्यजनस्य कथं संस्कारमात्राद्व्यवहारः कीदृशश्चेति चेदाह -न संस्मरतीति। संवृत्तम् अतीतम् । दुःखादिसाधनं प्राप्तं दृष्ट्वा भविष्यशोकादि नानुसंधत्ते ॥ ६० ॥ वर्त्तमाने हर्षसुखादौ ॥ ६१ ॥ सनकादयः सनकवामदेवाद्याः । नगरमागता इति संबन्धः ॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धविद्यानगरमित्याख्यमूचुरागताः ॥ ६२ ॥
यत्र कीराः पञ्जरस्था अपि वाचो वदन्ति वै ।
चितिरूपं स्वमात्मानं भजध्वं चेत्यवर्जितम् ॥६३॥
नास्ति चेत्यं चितेरन्यद्दर्पणप्रतिबिम्बवत् ।
चितिश्चेत्यं चितिरहं चितिः सर्वं चराचरम् ॥६४॥
यतः सर्वं चितिमनु भाति सा तु स्वतन्त्रतः ।
अतश्चितिं जनाः सर्वभासिनीं सर्वसंश्रयाम् ॥६५॥
भजध्वं भ्रान्तिमुत्सृज्य चितिमात्रं सुदृष्टयः ।
तिर्यञ्चोऽप्येवमत्यन्तं यत्र वाचो वदन्ति वै ॥ ६६ ॥
प्रसिद्धविद्यानगरं तदद्यापि प्रचक्षते ।
एवं तत्र पुरा हेमलेखया खलु बोधितः ॥ ६७ ॥
हेमचूडोऽभवद्विद्वान्जीवन्मुक्तस्तथेतरे ।
स्त्रीबालप्रमुखाः सर्वे जाता ज्ञातपरावराः ॥६८ ॥
तस्माच्छ्रेयोनिदानं तु सत्सङ्गः प्रथमं भवेत् ।
तस्माच्छ्रेयोवाञ्छने तु सत्संश्रयपरो भवेत् ॥६९॥

इति श्री० ज्ञानखण्डे हेमचूडोपाख्याने दशमोऽध्यायः१०

यत्रेत्यादिश्लोकचतुष्टयं चतुर्थाध्यायान्तर्गतं प्राग्व्याख्यातम् ॥६३॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ यस्माद्धेमलेखासंगात्सर्वे मुक्ता जातास्तस्मात् सज्जनसंश्रयपरः ॥६९॥

इति श्रीत्रिपुरारहस्यज्ञानखण्डे तात्पर्यदीपिकायां दशमोऽध्यायः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशोऽध्यायः ।

श्रुत्वैवं हेमचूडस्य कथामत्यद्भुतां तदा ।
भार्गवः सन्दिग्धमनाः प्रष्टुं समुपचक्रमे ॥ १ ॥
भगवन् श्रीगुरो यत्ते प्रोक्तं ज्ञानं महाद्भुतम् ।
भाति मे विषमं ह्येतदसाध्यं चापि सर्वतः ॥ २ ॥
कथमेतज्जगत दृश्यं चितिमात्रस्वरूपकम् ।
अदृष्टं केवलं ह्येतच्छ्रद्धोपेयं न चान्यथा ॥ ३ ॥
चितिश्चेत्यविनिर्मुक्ता नानुभाव्या कथंचन ।
नोपपन्नं सर्वथैतत्कथं चित्तं समारुहेत् ॥ ४ ॥
कृपया बोधनीयोऽहमत्र सर्वात्मना खलु ।
इत्यापृष्टो दत्तगुरुरवदद्भार्गवं प्रति ॥ ५ ॥

अत्राध्याये मोदपद्यैर्दत्त आह भृगूद्वहम् ॥
उपलब्ध्युपपत्तिभ्यां चेत्यं नान्याच्चितेरिति ॥ १ ॥

ते त्वया। ज्ञानं शुद्धाद्वयात्मरूपम् । विषमं सर्वानुभवविरुद्धम्। सर्वतः साधनैः असाध्यं च ॥१॥२॥ विषमत्वमेवाह—कथमिति । दृग्दृश्ययोर्द्वित्वस्य प्रामाणिकत्वेन चितिमात्रत्वमदृष्टम् ।एतच्च श्रद्धामात्रेणाङ्गीकर्त्तव्यं नोपलब्ध्युपपत्तिभ्यामिति तात्पर्यम् ॥३॥उपलब्ध्यभावमेवाह—चितिरिति । कथंचन केनापि प्रमाणव्यापारेण। नानुभाव्या नानुभवविषयीकार्या ।एवंविधा चितिरस्तीति सर्वथा नोपपन्नं न युक्तियुक्तम् । कथमिति ।एवं चैवंविधा चितिरस्तीति कथं निश्चेतव्यमिति भावः॥४॥ एवमाक्षेपेण स्वस्मिन्गुरोर्धार्ष्ट्यश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणु राम प्रवक्ष्यामि दृश्यतत्त्वं यथास्थितम् ।
एतत् दृश्यमशेषं तु दृशिमात्रं न चेतरत् ॥ ६ ॥
अत्रोपपत्तिं वक्ष्यामि शृणु सम्यक्समाहितः ।
एतत् दृश्यं कार्यभूतमुत्पत्तेरुपलम्भतः ॥ ७ ॥
उत्पत्तिर्नूतनाभासः प्रतिक्षणमिदं जगत् ।
नूतनत्वेनैव भाति तत्क्षणोत्पत्तिमज्जगत् ॥ ८ ॥
केचित्प्राहुर्जगदिदमखण्डैकक्षणोद्भवम् ।
अन्ये पदार्थसंघातमयं स्थिरचरात्मकम् ॥ ९ ॥

ङ्का भवेदिति मत्वाह—कृपयेति । अत्र शुद्धचितिविषये ॥५॥ चेत्यस्य चिदतिरेकेण नरशृङ्गप्रायत्वाच्चेत्यनिर्मुक्ता चितिरुपपन्नैवेति वक्तुं दृश्यतत्त्वं निरूपयति—शृण्विति । दृश्यस्य चेत्यस्य तत्त्वं स्वरूपम् । यथास्थितम् अनन्यथेत्यर्थः । तदेवाह-एतदिति ॥६॥ अत्र दृश्यस्य चितिमात्रत्वे । उपपत्तिं युक्तिम् । उपलब्धिप्रकारस्य हेमचूडोपाख्यानेन सम्यगुक्तत्वेन प्रकृते उपपत्तिरेवोच्यत इति ज्ञेयम् । तत्रादौ दृश्यस्य कार्यतां साधयति—एतदिति । कार्यं कर्तृव्यापारविषयम् ॥७॥ ननु केयमुत्पत्तिरिति चेदाह—नूतनाभास इति । नूतनत्वेनाभासनमित्यर्थः । लोके हि नूतनत्वेनाभासमानमेवोत्पन्नमित्युच्यते । यस्मादिदं जगन्नूतनत्वेनैव प्रतिक्षणं भाति तत्तस्मादित्यर्थः । एतच्चाग्रे भविष्यति ॥ ८ ॥ ननु घटादिदृश्यसमुदायो हि जगदिति व्यवह्रियते समुदायातिरिक्तं न किंचिदेकं वस्तु जगदित्याशङ्क्य विज्ञानवाद्यभ्युपगतां जगतः क्षणिकैकरूपतां स्वाभिमतां प्रदर्शयति—केचिदिति । अत्र विज्ञानवादिनामयमभ्युपगमः । क्षणिकविज्ञानसंतानरूपाःप्रमातारः पूर्वपूर्वसंस्कारजन्ये एवोत्तरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वथा तु समुत्पत्तिमदित्येव विनिश्चितम् ।
तत्र स्वभाववादस्तु नोचितोऽतिप्रसङ्गतः ॥ १० ॥

त्तरविज्ञाने दृश्याकाराः । घटाकारं ज्ञानं पटाकारं ज्ञानमित्याद्यनुभवेन विज्ञानेषु आकारस्यावश्याभ्युपेयत्वेन तावतैव व्यवहारोपपत्तौ बाह्यं नाभ्युपेयम् । यस्मिन्ज्ञाने हि यावान्देशकालवस्त्वाकारो भासते तावानखण्डैकरसस्तत्क्षणे कुण्डक्षणो बदरक्षणः कुण्डबदरक्षण इति क्रमेण जगत्क्षणिकं तत्तत्कालदेशाकारात्मकमखण्डैकरसं विज्ञानमेवेति॥ अन्ये हि काणादप्रभृतयः पदार्थसंघात एव जगत्, तच्चाकाशादिरूपं स्थिरं नित्यं, घटादिरूपं चरमनित्यम् । स्थिरचरोभयवस्तुसमुदाय एव जगदित्याहुः । अत्र काणादप्रमुखवादिभिर्बाह्यार्थे न किञ्चित्प्रमाणं वक्तुं शक्यम् । सर्वव्यवहारस्यावश्याभ्युपेयज्ञानाकारमात्रपर्यवसितत्वात् । एवमपि कथंचिद्व्यवहारास्पृष्टं बाह्यं कल्पितमजागलस्तनायितमेवाह । विज्ञानवादिमतन्तु चिदात्मनि जगत्प्रतिबिम्बवादिनः स्वस्यानुकूलमंशेन प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तिमित्याद्यन्यमताविरुद्धश्चेति तस्य प्रथममुपपादनमिति ध्येयम् ॥९॥ अन्यैर्यथेच्छमुक्तमपि जगत् दृश्यत्वहेतुकानुमानेन वह्वागमानुकूलेनोत्पत्तिमदेव सिद्ध्यतीत्याह— सर्वथेति । स्थिरं क्षणिकमित्युभयं यथास्थितमपीत्यर्थः । दृश्यस्य नित्यत्वपक्षव्यावर्त्तकस्तुशब्दः । जगतो नरविषाणतुल्यतां सम्पादयितुं प्रवृत्तस्य तत्क्षणिकत्वाक्षणिकत्वसाधनं वध्यमण्डनतुल्यमिति तदुपेक्षणं सर्वथेत्यनेन सूचितम् । अथ जगतः न किञ्चिदुपादानं प्रमाणेन सिध्यतीति निरुपादानैन्द्रजालिकसृष्टिभावतुल्यतां वक्तुमादौ जगतः सत्यत्वं सोपादानत्वं च व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्वयव्यतिरेकाभ्यां कार्यकारणनिश्चयात् ।
संवादतः प्रवृत्तीनां कथमाकस्मिकं भवेत् ॥ ११ ॥
क्वचित्तु कारणेऽदृष्टेप्यदृष्टं कल्प्यमेव तत् ।
बहूनामनुरोधो हि न्यायः सर्वैरुदाहृतः ॥ १२ ॥

इतां मतं क्रमेण प्रतिक्षेप्तुमुपक्रमते—तत्रेति । कार्यत्वे सिद्धेति । स्वभाववाद इति । कारणमनपेक्ष्यैव कार्यमुत्पद्यते तथा स्वभावात्कार्यस्य उत्पत्तेः पूर्वं कार्यस्यासत्त्वादेव कः कमपेक्षेत । उत्पन्नश्च स्वयंसिद्धोन्यं किमित्यपेक्षेत । तस्माद्यथा कारणस्य कार्यानपेक्षत्वं स्वाभाविकमुच्यते एवं कार्यस्यापीति हि चार्वाकः स्वभाववादमाह तं दूषयति—नोचित इति । न युक्त इत्यर्थः । अतिप्रसङ्ग इति । कारणमनपेक्ष्य जायमानो घटः पटोपि भवेदिति भावः ॥ मम तु घटपटकारणयोर्वैचित्र्यान्न घटः पटो भवेत् । ननु घटकारणमेव पटकारणं कुतो न भवेदिति चेत्स्वकारणवैचित्र्यादिति गृहाण ॥ १० ॥ ननु कपालः कार्यं घटः कारणमिति कुतो न भवेदिति चेदाह—अन्वयेति । अन्वयो हि कार्ये समग्रकारणव्याप्तिः । व्यतिरेकस्तु कारणाभावे कार्याभावव्याप्तिः । एतज्ज्ञानेन कार्यकारणयोर्नियतरूपतानिश्चयात् । ननु अन्वयव्यतिरेकयोर्ज्ञानस्य भ्रमत्वसम्भवात् कथमुक्तनिश्चयः प्रमाणं स्यादिति चेदाह—संवादत इति । तज्ज्ञानस्य भ्रमत्वे कारणमुपादाय कार्यार्थं प्रवृत्तो विसंवाद्येतेति सम्बन्धः । तस्मात्कार्यमाकस्मिकं निष्कारणं कथं भवेत् ॥ ११ ॥ नन्वाकस्मिकदुःखादिसमागमे न किञ्चित्कारणं दृष्टमिति चेदाह—क्वचिदिति । अदृष्टं कारणम् । ननु दृष्टकारणदृष्टान्तेनादृष्टकारणे कारणं कल्पनीयं अथवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूयो दृष्टं सपूर्वं हि कार्यं क्वचिददर्शने ।
दृष्टवत्परिकल्प्यं स्यादन्यथा सार्वलौकिकी ॥१३॥
सम्प्रवृत्तिर्विरुध्येत तस्मात्सर्वं सकारणम् ।
अत एव कार्यहेतोः किंचित्कारणतत्परः ॥ १४ ॥
सर्वत्र दृश्यते लोकस्तस्मादेतन्न किंचन ।
केचिदाहुरसत्कल्पैरणुभिः कार्यमुद्यतम् ॥ १५ ॥
तेभ्योत्पन्नं विभिन्नं चाप्यसदुत्पन्नतो भवेत् ।
असत्सतोरेकता हि विरुद्धा न कुतो भवेत् ॥१६॥

दृष्टकारणाभावेनाकारणमेव कारणं कल्पनीयं वेति चेदाह–बहूनामिति ॥ १२ ॥ ननु कस्य बहुत्वमिति चेदाह–भूय इति ॥ बहुश इत्यर्थः ॥ प्रायः सर्वं हि जगत् दृष्टकारणकमेवेति भावः । विपरीते दोषमाह–अन्यथेति । आकस्मिकत्वाभ्युपगम इत्यर्थः ॥ सार्वलौकिकी संप्रवृत्तिरित्यन्वयः ॥१३॥ कार्यार्थकारणोपादाने समीचीना फलपर्यवसायिनी प्रवृत्तिर्विरुद्ध्येत विसंवाद्येत । नियमेन फलपर्यवसायिनी न भवेदिति यावत् । क्वचित्प्रवृत्तेः फलापर्यवसानं तु समग्रकारणवैकल्यादिति तात्पर्यम् । यस्मात्प्रवृत्तेः फलपर्यवसानं तस्मात् । कार्यार्थं कारणे प्रवृत्तिं निदर्शयति । अत एवेति । तत्परा दृश्यत इति सम्बन्धः ॥ १४ ॥ एतत् चार्वाकाभ्युपगतं न किञ्चन विचारसहमित्यर्थः । अथात्र काणादमतमुत्थापयति निराकर्तुम्—केचिदिति । असत्कल्पैरदृष्टैः । उद्यतम् उत्पन्नम् ॥ १५ ॥ तेभ्यः अणुभ्यः विभिन्नं कार्यम् । परमाणवो हि जालमरीच्युपलभ्यत्रसरेणोरारम्भककारणभूताः कार्यस्य द्व्यणुकस्य सावयवत्वहेतुनानुमिताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न हि पीतमपीतं च प्रकाशं चाप्रकाशकम् ।
एकं भवेद्विरुद्धत्वात्साङ्कर्यादिप्रसक्तितः ॥ १७ ॥

तत्रायं सृष्टिक्रमः–परिपक्वप्राग्दृष्टसहकृतेश्वरेच्छया विशरारुषु स्थिरेषु परमाणुषु क्रियोत्पद्यते ततः क्रमेण परमाणुद्वयं संयुज्यते। तस्मात्संयुक्ताद् द्व्यणुकम् । पुनरीश्वरेच्छयैव द्व्यणुकेषु क्रिया ततःक्रमेण त्रिभिर्द्व्यणुकैः संयुक्तैः त्र्यसरेणुरिति रीत्या घटाद्यन्तकार्योत्पत्तिः। द्व्यणुकादि कार्यं च परमाण्वादिकारणेभ्योत्यन्तभिन्नम्। नाशानन्तरं चात्यन्तमसत् नरशृङ्गतुल्यमिति तन्मतम् । एतन्निराकरोति–असदिति । नह्येक एव घटः उत्पत्तेः पुरा असन् ततःसन्नाशोत्तरमसन्निति युक्तम् । सत्त्वासत्त्वयोर्विरोधात्॥ १६॥ ननु सत्त्वासत्त्वयोर्भावाभावत्वेपि संयोगतदभावयोरिव न विरोध इत्याशङ्क्याह । न हीति । संयोगस्याव्याप्यवृत्तित्वान्न तदभावविरोधः । सत्त्वं तु घटादौ समवायेन सत्तावत्त्वम् । तच्च व्याप्यवृत्तीति स्वभावविरुद्धमेव । पीतमिति । अत एव पीतमपीतं चैकं न भवेदिति भावः । ननु वस्तुस्वभावो ह्यनुभवानुरोधेन कल्पनीयः तथा च समवायिनामवयविनां दैशिकव्याप्यवृत्तित्वेपि घटोऽस्ति नास्तीत्यनुभवानुरोधात्कालिकाव्याप्यवृत्तित्वमिष्यत इति चेदाह–प्रकाशमिति । अप्रकाशकमिति स्वार्थे कः । प्रकाशमप्रकाशं च वस्तु नैकं भवेत् । अन्यथानुभवमात्रानुरोधेनैकस्य विरुद्धोभयरूपत्वाभ्युपगमे नीलं तमश्चलतीत्यनुभवानुरोधेन तमसो द्रव्यत्वे एकस्मिन्नेव द्रव्ये भास्वरशुक्लरूपोत्पत्त्या प्रकाशत्वं कृष्णरूपोत्पत्त्या तमस्त्वमिति वक्तुं शक्यत्वेन तमःप्रकाशयोरैक्यप्रसंगादिति भावः। पीतमपीतं प्रकाशमप्रकाशं च वस्तु नैकं भवेद्विरुद्धत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरेच्छादितो वापि कथमादिक्रियोद्भवः ।
गुणसाम्यप्रकृतिकं जगदित्यप्यसंभवि ॥ १८ ॥
वैषम्यहेतोर्मृग्यत्वात्साम्यहेतोश्च हीनतः ॥

दिति सम्बन्धः तस्माद्भावाभावयोः कालदेशभेदेनापि विरोध इति सिद्धम् । ननु तमसो द्रव्यत्वे द्रव्यचाक्षुषमालोकसहकृतमिति नियमभङ्गप्रसङ्ग इति चेन्न । अनुभवानुरोधेन नियमस्यैवान्यथा कल्पयितुं युक्तत्वात् । अथ चावयविवादे दूषणान्तराण्यप्याह—साङ्कर्यादिप्रसक्तित इति । सत्त्वासत्त्वादिरूपविरुद्धधर्माध्यासात्मकसाङ्कर्यप्रसक्तेरित्यर्थः । आदिना परमाणोरवयवसिद्धिः । तत्संयोगस्याव्याप्यवृत्तित्वभङ्ग इत्यादिदोषो ऽवसेयः । ननु प्रोक्तसाङ्कर्यादिदोषाणां सर्वमतसाधारण्येन नेदृशैर्दोषैरहमेव पर्यनुयोज्य इति चेत्सत्यमुक्तम् । अत एव द्वैतसत्त्ववादिनः सर्वानधिक्षेप्तुमेवाणुवादनिरसनमिषेणेमानि दूषणानि वासुदेवस्य भगवत्प्रयुक्तवैष्णवास्त्रवदनदूषणान्येवेति ज्ञेयम् ॥ १७ ॥ एवं परैः साधितं जगदभ्युपगम्य साङ्कर्यादिभिर्दूषयित्वा सम्प्रति जगदुत्पत्तिरेव न सम्भवतीति मूलच्छेदकं दूषणमाह—ईश्वरेति । ईश्वरेच्छया हि परमाणुषु कथमादौ क्रियोद्भवः । क्वचिदपि कस्यचिदिच्छया कस्मिंश्चिदचेतने क्रियोत्पत्त्यदर्शनात् । यदि प्रभोरिच्छामचेतना अनुरुन्ध्येरन् तर्हि भटान्विना राजेच्छामनुरुध्य शस्त्राण्यपि शत्रुभिर्युध्येरन् तस्मान्नैष आरम्भवादो युक्त इति भावः । एवमारम्भवादं प्रक्षिप्य परिणामवादमधिक्षेप्तुं तन्मतमनुवदति—गुणसाम्येति । अनीश्वराः साङ्ख्यास्तु सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः स्वत एव गुणवैषम्यद्वारा जगदाकारेण परिणमत इत्याहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेतनेनानधिष्ठानात् दृष्टान्तानुपलम्भतः ॥ १९ ॥
तस्माज्जागतकार्यस्य कारणं नोपलभ्यते ।
अदृष्टे तु श्रुतिर्मूलं नान्यमानसुमङ्गमः ॥ २० ॥
प्रमातॄणामपूर्णत्वात्प्रमाणस्यानवस्थितेः ।

एतन्मतमप्यसम्भवि ॥ १८ ॥ कुत इति चेदाह—वैषम्येति । प्रकृतिर्हि प्रलये गुणसाम्यरूपा । प्रलयान्ते च निर्हेतुकं तद्गुणवैषम्ययुक्तम् । नापि प्रकृतेरन्यत्प्रलये किञ्चिदस्ति यद्गुणवैषम्ये हेतुतामियात् । कथंचिद्विषमगुणाया प्रकृतेः पुनः सृष्ट्यन्ते प्रलयानिमित्तसाम्यहेतोरसम्भवश्च ।नन्वस्ति हेतुर्गुणानां साम्ये वैषम्ये च । यद्धि सेश्वरैः परैरीश्वरस्य वैषम्यनैर्घृण्यपरिहाराय कर्माभ्युपगतं तदेव गुणवैषम्यादौ हेतुरिति चेदाह–चेतनेनेति । चेतनेनानधिष्ठानात्प्रकृतेः परिणामो नोपपद्यत इति शेषः । सर्वत्र चेतनव्यापारमन्तरा जडेषु क्रियाऽदर्शनात्स्वतः प्रकृतेर्जगद्रूपेण परिणतिर्बन्धाय पुरुषं प्रति प्रवृत्तिर्मोक्षाय निवृत्तिश्च नोपपद्यते । चेतनप्रेरणं विना जडेष्वदृष्टमात्रेण प्रवृत्तिर्निवृत्तिर्वा न क्वचिद् दृष्टेति दृष्टान्ताभावानुमानेनाप्येतत्सिद्धिरित्याह—दृष्टान्तेति ॥ १९ ॥ यस्मादेवं जगतः कारणनिरूपणं नोपपद्यते तस्मात् उपपन्नमुपादानं कारणं नोपलभ्यते । ननु जगद्रूपं कार्यं प्रमाणसिद्धमनपह्नवनीयम् । तस्याकारणकत्वाभ्युपगमे परमतप्रवेशः तस्मात्कारणोपपादने चास्मदुक्तमार्गेणैव भवितव्यमिति चेदाह–अदृष्टे त्विति । परोक्षे विषये इत्यर्थः । श्रुतिः आगमः । मूलम् । निश्चायकं प्रमाणमित्यर्थः ॥ कुत एवमिति चेदाह–अन्यस्य प्रत्यक्षादेर्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यकर्तृविनाभावो भूयोदर्शनहेतुतः ॥ २१ ॥
सकर्तृकं जगदिदं सम्भवाचेतना हि सः ।
कार्यस्याचिंत्यरूपस्य कर्ता साधारणः कथम् ॥२२॥

सङ्गमो न प्रवृत्तिरित्यर्थः ॥ २० ॥ कुत एवमिति चेदाह–प्रमातॄणामिति ॥ इन्द्रियसंनिकृष्टे हि प्रत्यक्षं प्रमाणं तथा च प्रमातॄणां परिच्छिन्नत्वेनापूर्णत्वात्स्वर्गेन्द्रादौ तदिन्द्रियसन्निकर्षासम्भवान्न प्रत्यक्षप्रवृत्तिः ॥ अनुमानस्य प्रत्यक्षमूलकत्वादेव नित्यपरोक्षे न प्रवृत्तिः । कथंचित्प्रवृत्त्युपपादने वा अनुमानप्रमाणस्य बुद्धिकौशल्यायत्तत्वेनान्यथाप्यनुमानप्रवृत्त्या अनवस्थितेर्न किञ्चिदनुमानेन प्रकृतं सेत्स्यति। दृश्यते तर्कमात्रसाधितेऽर्थे तैर्थिकानां पृथगभ्युपगम इत्यभिप्रेत्याह–प्रमाणस्येति । अनुमानस्येत्यर्थः । नन्वागमो हि शब्दः सोऽपि परिच्छिन्नप्रमातृप्रयुक्तः स्वर्गादिपरोक्षे कथं प्रमाणमित्याशङ्क्य नादृष्टेर्थे शब्दमात्रस्य प्रामाण्यमुच्यते किन्त्वीश्वरस्यैव श्रुत्यादेरित्यभिप्रेत्य तस्यागमस्य प्रमाणेषु श्रेष्ठत्वं वक्तुं प्रसङ्गादीश्वरं साधयति–कार्यं कर्तृविनाभूतमिति । भूयोदर्शनाज्जगत्सकर्तृकमित्यर्थः ॥ २१ ॥ सकर्तृकमिति । नन्वनुमानेनेश्वरसाधनमनुपपन्नम् । अनुमानं हि नित्यपरोक्षसाधकमित्यनुपदमुक्तत्वादिति चेदुच्यते–कार्यस्य नोपादानाविनाभूतत्वनियमः योगिनिर्मितकार्ये व्यभिचारात् । ननु तत्रापि योगीच्छया झटिति सङ्घटितपरमाणव एवोपादानतां भजन्तीति चेन्न। नियतशिवकस्तूपककापालिकाकपालात्मकक्रमोल्लङ्घनेन व्यभिचारानपोहात् । नियतशिवकादिक्रमोल्लङ्घनं योगसामर्थ्यजनितमनपह्नवनीयम् । तेनैव सामर्थ्येन कार्यनिर्वाहे अपरमाणुसङ्घटनक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादचिंत्यशक्तिः स आगमस्तद्विमर्शनम् ।
पूर्णस्य त्वप्रतिहतं प्रमाणं सर्वतोऽधिकम् ॥ २३ ॥
तत्रैकस्तु महेशानः पुरा सृष्टेरुदाहृतः ।
स्वतन्त्रो ह्यनुपादानः स्वातन्त्र्यभरवैभवात् ॥२४॥

त्पनस्य निर्युक्तिकत्वात् । प्रसिद्धकारणादिक्रमेणैव घटं निर्मिमाणो योगी कुलाल एव भवेदिति च ज्ञेयम् । न हि कार्यस्य कर्तृविनाभूतत्वानियमः । अव्यभिचारात् । तस्मात्कार्यस्य सकर्तृकत्वानुमानं नानवस्थितम् । एवं साधितोऽपि कर्त्ता न जडः उपादानागोचरापरोक्षज्ञानादिमत्त्वरूपकर्तृत्वस्य जडेऽसम्भवादित्याह—सम्भवादिति ॥ २२ ॥ यस्मादचिन्त्यरूपकार्यस्य प्राकृतः कर्त्ता न सम्भवति तस्मादचिन्त्यशक्तिर्जगत्कर्त्ता ॥ तदिति लुप्तषष्ठ्यन्तं तस्य पूर्णस्याचिन्त्यशक्तेः ॥ जगत्कर्तुर्विमर्शनं तत्त्वावगमको व्याहारात्मा व्यापारः आगमः अस्याचिन्त्यशक्तित्वादेवाशरीरिणोऽपि व्याहारात्मा व्यापारः आगमः । अस्याचिन्त्यशक्तित्वादेवाशरीरिणोऽपि व्याहारात्मा व्यापार इति ज्ञेयम् । तस्मादेवंविधोयमागमः तस्मादप्रतिहतं सर्वथान्यैरबाधितं प्रमाणम् । अत एव सर्वतः प्रमाणेभ्योऽधिकं श्रेष्ठं प्रबलमित्येतत् ॥ २३ ॥ इत्थं दृशिमात्रमित्यत्रोपपत्तिं वक्ष्यामीति प्रतिज्ञाय महता प्रबन्धेनागमस्य प्रमाणमूर्धन्यत्वं संसाध्य प्रतिज्ञातार्थनिर्वाहायागमोक्तार्थमनुवदति श्लोकदशकेन—तत्रेति । आगमे इत्यर्थः । उपादानरहित इत्युदाहृतः । तथाचागमः । आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् । नासदासीन्नो सदासीत्तदानीम् । निरुपादानसम्भारः स्वात्मभित्तौ हि ली-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वात्मभित्तौ जगच्चित्रं विलासायावभासयत् ।
तथा स्वप्नमनोराज्ये कल्पितं स्वेन केवलम् ॥२५॥
अहंत्वेनैव गृण्हाति देहं तद्वदयं जगत् ।
न ते रूपं यथा देहः स्वप्नव्यावृत्तिहेतुतः ॥ २६ ॥
तथास्य न जगद्देहो व्यावृत्तेः प्रलये ननु ।
देहादिव्यतिरिक्तस्त्वं यथा केवलचिन्मयः ॥२७॥
एवं देवो जगच्छून्यश्चिदेकवपुरव्ययः ।
तेनेदं स्वात्मनि जगच्चित्रमुन्मीलितं ननु ॥ २८ ॥
कोन्मीलयेज्जगच्चित्रं स्वान्यस्य काप्यसम्भवात् ।

लया । जगच्चित्रं समुल्लिख्य क्रीडत्येष महेश्वर इत्यादिः । स्वातन्त्र्यस्य भर उत्कर्षः तस्य वैभवान्माहात्म्यादवभासयदित्यन्वयः ॥ २४ ॥ विलासाय क्रीडनाय । यथा स्वप्ने मनोराज्ये स्वेन केवलमुपादानाद्यनपेक्ष्य परिकल्पितं देहम् ॥ २५ ॥ तत्कालेऽहंत्वेन गृण्हाति । तद्वत् अयं ईश्वरः स्वपरिकल्पितं जगदहंत्वेनैव गृण्हाति । यदुक्तम् । स्वाङ्गभूतेषु भावेषु प्रमाता कथ्यते यतिरिति। न ते इति । यथा हि मनोराज्यपरिकल्पितदेहो न ते स्वरूपं स्वप्नादौ व्यावृत्तेः ॥ २६ ॥ दार्ष्टान्तिके योजयति—तथेति । अस्य ईश्वरस्य । अहंत्वेन गृहीतमपि जगन्न देहः । प्रलये जगतो व्यावृत्तेः । यथा जाग्रदाद्यवस्थास्वनुवृत्तस्य चिदात्मनस्तत्तदवस्थाननुवृत्तदेहादिव्यतिरिक्तत्वमेवमीश्वरोपि प्रलयाननुवृत्तजगद्व्यतिरिक्तशुद्धचिन्मय इत्याह -देहादीति ॥२७॥ अव्यय इत्यनित्यजगद्व्यतिरिक्तत्वनिर्वाहकं विशेषणम् । तेन चिदेकवपुषा ईश्वरेण ॥२८॥पूर्णस्य स्वप्रतिहतमित्युक्तं पूर्णत्वं साधयति—केति । स्वस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋते चितिं कदाचिद्वा क्व किं भवितुमर्हति ॥२९॥
यत्राभावश्चितेर्ब्रूयात्स देशो नैव सिध्यति ।
अभावश्च चितेः केन सिध्येदस्माच्चितिः परा॥३०॥
महासत्ता जगद्ग्रासशीला पूर्णावभासते ।
समुद्रमंतराथं दिवानाथं विना प्रभाः ॥ ३१ ॥
यथा न सन्ति तद्वद्वै संविद्रूपं विना जगत् ।
तस्मादेष महादेवः शुद्धचैतन्यविग्रहः ॥ ३२ ॥
आसीत्सृष्टेः पुरा तस्मादुत्पन्नं तत्र संस्थितम् ।
तस्मिन्विलीयते चान्ते जगदेतच्चराचरम् ॥३३॥

दन्यस्य दृश्यस्य क्वापि स्वस्मादन्यत्रासम्भवाज्जगच्चित्रं कोन्मीलयेदित्यर्थः । कुतः क्वापि स्वान्यस्यासम्भव इति चेदाह—ऋत इति । कदा क्व किमिति कालदेशाकारप्रतिषेधः ॥२९॥ यत्रेति । यत्र चिदभावः तद्देशप्रकाशासम्भवान्न सिद्ध्येत् सिद्धेः प्रकाशायत्तत्वादिति भावः । अभावश्चेति । चितेः सर्वप्रकाशकत्वेन तदभावः केन सिध्येदिति भावः । तस्मात् चिदभावस्यासिद्धेः । परा अनिषेध्या । निषेधावधिभूतत्वात् ॥ ३० ॥ अत एव महासत्ता । महती अपरिच्छिन्ना सत्ता यस्याः अत एव जगतस्तया व्याप्तत्वाज्जगतः ग्रसनं शीलं यस्याः । अत एव पूर्णा अत एव तदविनाभूतं जगदिति सदृष्टान्तमाह–समुद्रमिति ॥३१॥ यथा हि समुद्राविनाभूतास्तरङ्गादयस्तथा संविद्रूपाविनाभूतं जगत्तस्मात् । शुद्धचैतन्यविग्रहः दृश्यलेशरहितः आसीदिति सम्बन्धः ॥ ३२ ॥ तस्मात् महादेवात् । यथा हि समुद्रादेरुत्पस्यादिमतान्तरङ्गादीनां समुद्रादिमात्राद्यात्मत्वं एवं जगतश्चिन्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यागमप्रसिद्धोऽर्थस्तन्न विप्रतिपद्यते ।
अदृष्टार्थेषु संवादात्प्रमाणं ह्यागमो भवेत् ॥३४॥
दृश्यन्ते मणिमन्त्रादिसिद्धयः सर्वतो यतः ।
नाल्पप्रज्ञो विजानीयान्मणिमन्त्रमहाफलम् ॥३५॥
तस्मात्सर्वज्ञगदितो ह्यागमः सर्वदर्शनः ।
तत्रोक्तो देव एवादौ सृष्टेर्जगत आस्थितः ॥३६॥
निरुपादान एवादौ सृष्टवानखिलं जगत् ॥
अस्मान्महेश्वरः पूर्णस्वच्छस्वातन्त्र्यसंयुतः ॥३७॥

त्रात्मत्वमिति भावः ॥ ३३ ॥ इतीति । तत्रैकस्त्विवत्यादिश्लोकद्वयोक्तः । तत् आगमोक्तम् । न विप्रतिपद्यते । संशयविषयतां न प्राप्नोति । कुत एवमिति चेदाह—अदृष्टेति । यत्प्रमाणं हि कचिद्विसंवादि तत्प्रमितोऽर्थो विप्रतिपद्यते । यत्प्रमाणं सर्वत्राविसंवादि तत्प्रमितोऽर्थो न विप्रतिपद्यते इति नियमः । आगमस्त्वदृष्टे एव प्रमाणं न कचिद्विसंवादि अतो न तत्सिद्धोऽर्थो विप्रतिपद्यते। अतः सर्वथा आगमः प्रमाणमेव भवेदिति भावः॥३४॥ ननु वेदाद्यागमो नेश्वरोक्तः प्रमाणाभावादिति चेदाह-दृश्यत इति। मणिमन्त्रौषधानामागमोक्तानां सिद्धयः फलोत्पत्तयः सर्वत्र साधकेषु यतो दृश्यन्ते तस्मादागमः सर्वज्ञगदित इति सम्बन्धः। यतो मण्यादिफलमीश्वरादन्यः अल्पप्रज्ञो दातुं न समर्थ इत्याह—नेति ॥ ३५ ॥ सर्वदर्शन इति । दृश्यते अनेनेति दर्शनं प्रमाणं व्यापारः सर्वत्र दर्शनं यस्य दृष्टादृष्टविषयक इति यावत् । देवश्चिन्मात्रमूर्त्तिरीश्वरः एवकारेण प्रधानादिव्यावृत्तिः ॥३६॥ आदौ स्वयमेकोऽपि सृष्टिकाले उपादानं कुतश्चित्संपादयतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिदात्मभित्तावखिलं चित्रमुन्मीलयज्जगत् ॥
न तज्जगत्सम्भवति बहिः कचिदत्र स्थितम् ॥ ३८ ॥
पूर्णत्वादीश्वरस्येह स्थानमन्यन्न विद्यते ॥
अन्यस्थानस्थितं तच्च कथञ्चिन्नैव सिध्यति ॥ ३९ ॥
तथा च दर्पणाभोगे प्रतिबिम्बवदेव हि ॥
जगदुन्मीलितं देवे चैवं सर्वं समञ्जसम् ॥ ४० ॥
जगदादेर्हि देवस्य योगीव जगतः क्रिया ॥

चेन्नेत्याह–निरुपादान इति । ननु कुलालादिर्हि कर्त्ता उपादानं मृदादिरूपे आश्रये घटादिकार्यमवभासयति ईश्वरो निरुपादानश्चेत्कथं क विभासयेदिति चेदाह–यस्मादिति । पूर्णमपरिच्छिन्नं स्वच्छमकृत्रिमं सहजं स्वातन्त्र्यं तेन युतः ॥ ३७ ॥ चिदात्मेति । यस्मात्स्वस्य पूर्णत्वेन स्वान्यस्यासम्भवः । पूर्णस्वातन्त्र्ययुतश्च तस्मात्स्वस्मिन् चिदात्मरूपभित्तौ अखिलं जगच्चित्रमुन्मीलयेदिति भावः । नन्वात्मभित्तावुन्मीलयतीति कुत एतदिति चेदाह–न तदिति । बहिः चिदात्मनोऽन्यत्र ॥ ३८ ॥ कुतो न सम्भवतीति चेदाह–पूर्णत्वादिति । व्रीहिभिः पूर्णे घटेऽन्यस्य स्थानाभाव इव दिगादीनामात्मना पूर्णत्वेन नान्यस्य स्थानमस्तीत्यर्थः । आत्मनोऽपूर्णत्वाभ्युपगमेऽपि न तदन्यत्र जगत्सिद्ध्यति चित्प्रकाशबहिर्गतस्याप्रकाशादित्याह—अन्यस्थानेति ॥ ३९ ॥ नन्वेतदसमञ्जसम् । अन्यस्वरूपान्तरेऽन्यात्रभासादृष्टेश्चिदात्मस्वरूपे जगदवभासानुपपत्तेरित्याशंक्याह—तथा चेति । दर्पणेति । दर्पणानां स्वरूपान्तःप्रतिबिम्बावभासवद्देवे चिदात्मस्वरूपे जगदुन्मीलितमवभासत इत्येवाभ्युपगमात्सर्वं समंजसमिति भावः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्कल्पनगरप्रख्या सृष्टिर्देवस्य सम्मता ॥ ४१ ॥
राम ते मानसी सृष्टिर्मनोमय्येव केवला ॥
अनेकमातृमेयादिप्रचुरा ह्यवभासते ॥ ४२ ॥
अनेकभेदभिन्नापि मनसोऽन्या न हि क्वचित् ॥
उत्पन्ना मनसस्तत्र स्थिता तत्रैव लीयते ॥ ४३ ॥
सा केवलमनोरूपा यथा तद्वज्जगच्छिवात् ॥
स शिवश्चितिमात्रैकरूपश्चितिरविग्रहा ॥ ४४ ॥
त्रिपुरानन्तशक्त्यैक्यरूपिणी सर्वसाक्षिणी ॥

ननु निरुपादानस्य कर्त्तुः कार्यक्रिया न क्वचिद् दृष्टेति चेदाह—जगदादेरिति। जगत्कर्तुरित्यर्थः। ननु तर्हि योगिनिर्मितवज्जगदपि स्वनिर्मातुर्भिद्येत। तथा च कथमुक्तं चिदतिरिक्तं जगन्नास्तीति चेदाह—संकल्पेति। देवस्य जगत्कर्तुः सङ्कल्पनगरवत्कर्तुरनतिरिक्ता सृष्टिरिति भावः ॥ ४१ ॥ ननु सङ्कल्पनगरमपि कर्तुर्भिन्नमेवेति चेन्नेत्याह—रामेत्यादि। मानसी सृष्टिः सङ्कल्पनगरप्रचुरा याऽवभासते सा मनोमयीति सम्बन्धः ॥ ४२ ॥ एतदेव साधयति—अनेकेति। भेदैर्व्यावृत्तधर्मैर्भिन्नापि मानसी सृष्टिः यतो मनस्युत्पन्ना तत्रैव स्थिता लीना च। ततो मनसो न ह्यन्येति सम्बन्धः ॥ ४३ ॥ सेति। मानसी सृष्टिः यथा मनस उत्पत्त्यादिना मानससृष्टेः मनोमयत्वं तथा चिदात्मनः शिवादुत्पत्त्यादिमज्जगच्चिन्मयमित्यर्थः। ननु शिवादुत्पन्नस्य जगतः शिवरूपतैव न चितिरूपतेति चेदाह—स इति। ननु चितेः कुलालवद्विग्रहः स्यादित्याशङ्कानेत्याह अविग्रहेति। नास्ति चिदतिरिक्तो विग्रहो देहो यस्याः ॥४४॥ सा चितिरेव प्रकरणप्रतिपाद्या त्रिपुरेत्याह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा चितिः सर्वतः पूर्णा परिच्छेदविवर्जनात् ॥४५॥
कालो देशश्च लोकेऽस्मिन्परिच्छेदकरः स्मृतः ॥
तत्राकारमयो देशः कालस्तु स्यात्क्रियामयः॥४६॥
यां चितिं समुपाश्रित्य स्यादाकारः क्रियापि वा ॥

त्रिपुरेति। "शक्तयोऽस्य जगत्सर्वम्" इत्युक्तनीत्या घटाद्याभासरूपाः अनन्ता याः शक्तयः तासामैक्यं सङ्घट्टः तद्रूपिणी। यथा हि दर्पणे प्रतिभासमानप्रातिबिम्बानां दर्पण एव सङ्घट्टमयं रूपं तथेति भावः। ननु तर्हि दर्पणवच्चितेर्जडरूपत्वमपि स्यादिति चेदाह—सर्वसाक्षिणीति। साक्षित्वं च साक्ष्यस्वरूपाभिज्ञत्वम्। तच्च ज्ञानशक्तिरूपं न जडस्य सम्भवतीति भावः। प्रागुक्तमपि पूर्णत्वं भूयः सम्यक्साधयितुमुपक्रमते—सा चितिरिति॥ ४५ ॥ ननु कथं परिच्छेदवर्जितेति चेदाह—काल इति। कालदेशयोरेव परिच्छेदकाऽभिमतयोर्देशकालयोः किं रूपमिति चेदाह—तत्रेति। तयोर्मध्ये इत्यर्थः। इहेदानीं घट इत्यत्रेहेति गृहादिरूपो देशः इदानीमिति प्रातरादिरूपः कालश्च भासते। तत्र गृहादिरूपो देशः पृथिव्यादेः संस्थानविशेषात्माकार एव। कालस्तु सूर्यादिपरिस्पन्दादिरूपा क्रियैव। यदुक्तं श्रीप्रत्यभिज्ञायां—मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ। क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः। इति। तथा कालः सूर्यादिसञ्चारस्तत्तत्पुष्पादिजन्मैवेति च नह्याकाराक्रियाभ्यां देशः कालो वान्यः उदयगिर्यादिरूपेण सूर्यादिक्रियारूपेण वोपाधिनोपहितः अखण्डः सम्भवति। यतः सर्वव्यवहारस्योपाधिनैव निर्वाहात्तत्कल्पने प्रमाणप्रयोजनयोरभावात् ॥४६॥ एवं देशकालयोः स्वरूपं विविच्य ताभ्यां परिच्छेदाभावं चिदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याः परिच्छेदकत्वमनयोः स्यात्कथं वद ॥४७॥
कस्मिन्देशे च काले च चितिर्नास्तीह तद्वद ॥
यत्र न स्याच्चितिः सोऽपि कथं स्यादिति वै भवेत् ॥४८॥
अस्तिता हि पदार्थानां प्रकाशो नापरः खलु ॥
प्रकाशस्तु चितिः प्रोक्ता नाऽचितः स्यात्प्रकाशता॥४९॥

त्मनः साधयति—यामिति । लोके हि शतायुषो गृहस्थस्य पुरुषस्य ततो महतः कलियुगात्मककालस्य जम्बुद्वीपात्मकदेशस्यैकांशेन शतवर्षकालेन गृहरूपदेशेन च परिच्छेदः एतावत्कालं स्थित एतद्देशे स्थित इति प्रसिद्धः । प्रकृते चिदात्मैकदेशाश्रयेण सतोर्देशकालयोराकारक्रियारूपयोः कथंचिदात्मपरिच्छेदकत्वमित्यर्थः ॥ ४७ ॥ ननु चिदात्माश्रितौ देशकालौ यस्तयोर्महत्तरयोरेकदेशस्थो घटादिवच्चिदात्मेति चेदाह—कस्मिन्निति । यत्रेति । देशे काले चेत्यर्थः । देशः कालोऽपीत्यर्थः । सोपीति । देशः कालोऽपीत्यर्थः । यथा हि—घटशरावादिकं मृदविनाभूतं मृदाश्रितं मृदं विना न भवति तथा च दर्पणाविनाभूतं प्रतिबिम्बवस्तु दर्पणाश्रितं दर्पणं विना न भवति तथा चिदविनाभूतौ देशकालौ न तां विना स्त इति तदाश्रितावेवेति भावः ॥ ४८ ॥ ननु सौरालोकवच्चितिर्वस्तुप्रकाशिका तथा च यथा सौरालोकराहितो घटादिरन्धकारेऽस्ति तथा चितिं विनापि देशादिभावोप्यस्त्विति चेदाह—अस्तितेति । सत्त्वमित्यर्थः । वस्तूनां सत्त्वं हि प्रकाशनमेव नेतरत् । सत्त्वात्मकप्रकाशो हि चितिरेव । नास्ति चितिर्यस्य सोऽचितिः चिदविषय इति तात्पर्यम् । तस्याऽचितेः प्रकाशता यतो नास्ति ततश्चितिरेव प्रकाश इत्यर्थः । तथा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशस्तु सुमुख्यः स्याद्यः स्वतन्त्रः प्रकाशते ॥
जडा न स्वप्रकाशा हि चितियोगप्रकाशनात् ॥ ५० ॥
अन्यानपेक्षणेनैव चितिः स्वस्मिन्प्रकाशते ॥
जडाश्चितिं समाश्रित्य प्रकाशन्ते न चान्यथा ॥५१॥
अप्रकाशेऽपि वस्तूनामस्तिता चेत्तदा शृणु ॥
अस्ति नास्तीति लोकेऽस्मिन्व्यवस्था न हि सेत्स्यति॥५२॥

सौरालोकं विनाऽन्धकारे घटादेर्भासनादालोकादन्यदस्तित्वं घटादेः अतः चित्प्रकाशं विना घटादेः कथञ्चिदपि व्यवहाराभावाच्चित्प्रकाश एवास्तित्वमिति भावः ॥ ४९ ॥ नन्वस्तु भावानां सत्त्वं प्रकाश एवेति, तथापि घटः प्रकाशते चितिः प्रकाशत इति व्यवहारसाम्यात्कथं चितिर्घटादेर्दृश्यस्याश्रयभूतेति चेदाह—प्रकाश इति । यः स्वतन्त्रः अन्यानपेक्षः प्रकाशते तस्य प्रकाश एव सुमुख्यः । जडा इति । जडाश्चिदात्मभिन्ना न स्वप्रकाशाः अन्यानपेक्षप्रकाशा न भवन्तीत्यर्थः । हि यस्माच्चितियोगेन चिद्विषयतापत्त्या प्रकाशनात् चित्तादात्म्यमप्राप्तानामप्रकाशनान्न जडानां स्वतन्त्रप्रकाश इति भावः ॥५०॥ चितिस्तु न तथेत्याह—अन्येति । स्वस्मिन् । अन्यतादात्म्यमनुपगते स्वरूपे । समाध्यादिदशासु प्रकाशते । तस्माच्चिज्जडयोः प्रकाशवैषम्याच्चितिमाश्रित्यैव जडाः प्रकाशन्ते न स्वातन्त्र्येणेत्यर्थः ॥ ५१ ॥ अस्तु भावानामाकाशाश्रितत्ववच्चिदाश्रितत्वम् । तथापि अस्ति प्रकाशते चेत्यादिव्यवहारादस्तिता प्रकाशवद्भिन्नैवेति चेदाह–अप्रकाशेपीति । नन्वस्तित्वं प्रकाश इत्युभयं समनियतयोर्घटत्वकलशत्वयोरिवाभेदः सिद्ध एवेति मत्वा द्वितीये दूषणमाह—अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्वस्त्वस्तिता लोके चित्प्रकाशो न चापरः ।
यथा हि प्रतिबिम्बानां सत्त्वं दर्पण एव हि ॥ ५३ ॥
तथा चितिर्जगत्सत्ता ततः सर्वं चितिर्भवेत् ॥
अधिकं भासते यत्तु तन्नैर्मल्यमहत्त्वतः ॥ ५४ ॥
काठिन्यनिर्मलत्वाभ्यां प्रतिबिम्बावभासनम् ॥
तयोस्तु तारतम्येन प्रतिबिम्बः स्फुटोऽस्फुटः ॥ ५५ ॥
दर्पणे च जले चापि स्पष्टमेतद्धि लक्ष्यते ॥

स्तीति । यद्यप्रकाशेऽप्यस्तित्वं घटादेस्तर्हि अयं नास्त्यप्रकाशमानत्वादित्यादि व्यवस्था न सेत्स्यतीति भावः । ननु तर्ह्ययं प्रकाशतेऽस्ति च यतः प्रकाशते ततोऽस्तीत्यादिव्यवहारः कथमिति चेदुच्यते—दृश्यः प्रत्यक्षत्वादित्यादिवज्ज्ञेय इति ॥ ५२ ॥ तस्मादिति । प्रकाशास्तित्वयोः समनियतत्वादित्यर्थः । अत्र दृष्टान्तः—यथेति । धर्मधर्मिणोस्तादात्म्याभिप्रायेणोक्तं—दर्पण एवेति । दर्पणसत्त्वमेव प्रतिबिम्बानां सत्त्वम् इत्यर्थः ॥ ५३ ॥ एवं चित्प्रकाशयोस्तादात्म्याच्चितिर्जगत्सत्तेति । सर्वं जगत् । ननु चितिरेव सर्वं चेत्तर्हि चितिरित्येव भासते घटः पट इत्यधिकावभासनङ्कथमिति चेदाह—अधिकमिति । तन्नैर्मल्येति । तस्याश्चितेर्नैर्मल्यस्य महत्त्वतो माहात्म्यादित्यर्थः ॥ ५४ ॥ ननु दर्पणे अधिकावभासः प्रतिबिम्बविधया भवेत् प्रकृते चिदात्मनि कथमधिकावभास इति चेत्प्रतिबिम्बविधयैवेति वक्तुं प्रतिबिम्बनिमित्तं विवेचयति—काठिन्येति । काठिन्यभरितात्मत्वे प्रतिबिम्बावभासनं भवेदिति शेषः । तयोः काठिन्यनिर्मलत्वयोः । तारतम्येन न्यूनाधिकभावेन ॥ ५५ ॥ काठिन्यनिर्मलत्वयोरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडत्वाद्दर्पणादेस्तु स्वातन्त्र्यपरिवर्जनात् ॥ ५६ ॥
बिम्बापेक्षा चितेः स्वच्छस्वातन्त्र्यादनपेक्षता ॥
निर्मलत्वं स्वतःसिद्धं चितेर्मालिन्यवर्जनात् ॥५७॥
अनेकरसतैव स्यान्मालिन्यं तत् चितेर्न हि ॥
ऐकात्म्यरूप्याच्चिच्छक्तेरखण्डत्वाच्च सर्वथा ॥ ५८ ॥

धिक्येन दर्पणे स्फुटः प्रतिबिम्बः । न्यूनत्वेन जले अस्फुटः प्रतिबिम्बः । एतच्च सर्वैः स्पष्टं लक्ष्यते । भित्तौ नैर्मल्याभावादाकाशे काठिन्याभावाच्च न प्रतिबिम्बावभास इति भावः । ननु चितेः स्वतः प्रतिबिम्बावभासने दर्पणवद्बिम्बापेक्षापि स्यादिति चेदाह—जडत्वादिति । परिवर्जनाद्बिम्बापेक्षेति सम्बन्धः । ॥ ५६ ॥ स्वच्छपरिच्छेदमलरहितं सार्वत्रिकं यत्स्वातन्त्र्यं तस्मात् चितेर्बिम्बानपेक्षता । यदुक्तम्—अन्तर्विभाति सकलं जगदात्मनीह यद्वद्विचित्ररचनामुकुरान्तराले। बोधः पुनर्निजविमर्शनसारयुक्त्या विश्वं परामृशति नो मुकुरस्तथा त्विति । ननु जलादेः कतकादिना नैर्मल्यं सम्भवति चितेः कथमिति चेदाह—निर्मलत्वमिति । आकाशवदसङ्गत्वेन मालिन्यवर्जनात् ॥ ५७ ॥ जलादिगतं मालिन्यं किम् यच्चितिरूपे नास्तीत्युच्यते इत्याशङ्क्याह—अनेकेति । अनेकरसत्वं वस्त्वन्तरसंमिलितत्वम् । यथा पार्थिवरजःसंमिलितत्वं जले मालिन्यम् । यथा च दर्पणे काचान्यांशसंमिलितत्वम् । नन्वेवंविधं मालिन्यं चितेः कुतो नेति चेदाह—ऐकात्म्यरूप्यादिति । अवयविनां स्वावयवान्तरालेषु स्वातिरिक्तांशमेलनान्मालिन्यसम्भवः । चिदात्मनो निरवयवत्वेनैकरूप्यान्न मालिन्यमिति भावः । एवं नैर्मल्ये निमित्तमुक्त्वा का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरिक्तात्मभावहेतोर्नैर्मल्यं सर्वतोऽधिकम् ॥
अस्वतो भासमानस्य भानमन्यानुषङ्गतः ॥ ५९ ॥

ठिन्येपि निमित्तमाह—अखण्डेति । अखण्डत्वादरिक्तात्मभावहेतो-रिति सम्बन्धः । रिक्तात्मत्वमवकाशात्मत्वम् । अवकाशवत्त्वमि-ति यावत् । लोके हि अवयवसंश्लेषतारतम्येन काठिन्यतारतम्यं दृष्टम् । यदवयवानां संश्लेषाधिक्यम् तत्र वा काठिन्याधिक्यम् । संश्लेषन्यूनत्वे काठिन्यन्यूनता । दृष्टं चैतत्पाषाणजलयोः । सं-श्लेषे आधिक्यं चावयवांशानां सम्बन्धाधिक्यनिमित्तम् । त-थाहि—यस्माद्यस्यावयवांशा यावन्तोऽधिकाः संयुक्तास्तस्य ताव-दधिकः संश्लेषस्तावदधिकं काठिन्यम् । तथा यस्य यावदवय-वांशा असंयुक्तास्तस्य तावदंशावच्छेदेनान्तरवकाशवत्त्वाद्रिक्तात्म-त्वाच्च तस्यानधिककाठिन्यवत्त्वमिति । चितेस्तु निरवयवत्वे-नाखण्डत्वादरिक्तात्मत्वमिति भावः ॥ ५८ ॥ अरिक्तात्मभाव-हेतोश्चितेर्नैर्मल्यं सर्वतोऽधिकम् । प्रकृतेर्नैर्मल्यमिति काठिन्यस्या-प्युपलक्षणम् । तथा च चितेर्नैर्मल्यं काठिन्यं च सर्वतो दर्पणादे-रधिकमित्यर्थः । अवयविनामवयवांशेऽवकाशतारतम्यसम्भवा-त्तदवकाशेषु वस्त्वंतरप्रवेशतारतम्यसंभवाच्च काठिन्यनैर्मल्यता-रतम्यं चितेरखण्डत्वेन सर्वथा रिक्तात्मत्वाद्धेतोर्नैर्मल्यं काठिन्यं च सर्वतोऽधिकमिति भावः । ननु जगतः प्रतिबिम्बत्वे प्रमाणा-भावान्न प्रतिबिम्बत्वमिति चेत्प्रातिबिम्बलक्षणायोगात्प्रतिबिम्बत्व-मिति वक्तुं प्रतिबिम्बलक्षणमाह—अस्वत इति । अन्यासम्ब-न्धेऽभासमानत्वे सति अन्यसम्बन्धेन भासमानत्वम् अन्य-प्रतिबिम्बत्वम् । यथा प्रतिबिम्बघटो दर्पणं विना अभासमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिबिम्बस्वरूपज्ञाः प्रतिबिम्बं प्रचक्षते ॥
जगदेतादृशं सर्वं सर्वैः समभिलक्षितम् ॥ ६० ॥
स्वतो न भासते क्वापि भासते च चिदाश्रयात् ॥
अतो जगत्स्यादादर्शप्रतिबिम्बसुसंमितम् ॥ ६१ ॥
चितिर्विचित्राऽन्यभावैरुपरक्तापि भासिनी ॥
स्वरूपादप्रच्युतैवाऽऽदर्शवल्लेशतोऽपि हि ॥ ६२ ॥
दर्पणप्रतिबिम्बानां दर्पणानन्यता यथा ॥
चिदात्मप्रतिबिम्बानां चिदात्मानन्यता तथा ॥६३॥
दर्पणे प्रतिबिम्बो हि बिम्बहेतुर्निरूपितः ॥
चितिः स्वातन्त्र्यहेतुः स्यात्प्रतिबिम्बो हि जागतः॥६४॥

नो दर्पणसम्बन्धेनैव भासते एवं चितिं विनाऽभासमानं चितिसम्बन्धेनैव भासते इति जगत्प्रतिबिम्बात्मकमेव ॥ ५९ ॥ प्रतिबिम्बमिति प्रतिबिम्बत्वमित्यर्थः । एतादृशं प्रतिबिम्बलक्षणवत् ॥६०॥ लक्षणं जगति योजयति–स्वत इति । सुसंमितं समम् ॥६१॥एवं जगतः प्रतिबिम्बलक्षणयोगात्प्रतिबिम्बत्वमुपपाद्य चितेर्दर्पणतुल्यतां वक्तुं प्रतिबिम्बग्राहिणो लक्षणं चिति योजयति–चितिरिति । अन्यस्वरूपोपरक्तत्वेन भासमानेत्यप्रच्युतस्वरूपत्वं प्रतिबिम्बग्राहित्वम् । भासतीति भासमानमात्ररूपा । अत एव लेशतोऽप्यप्रच्युतेत्यन्वयः ॥ ६२ ॥ एवं महता प्रयत्नेन जगतः प्रतिबिम्बत्वे साधिते फलितमाह–दर्पणेति ॥ ६३ ॥ स्वच्छस्वातन्त्र्यादनपेक्षतेति चितिप्रतिबिम्बेन बिम्बापेक्षेत्युक्तं तन्निर्वाहयितुमुपक्रमते–दर्पण इति । बिम्बं हेतुर्यस्य स बिम्बहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसङ्कल्पाद्राम पश्य स्वात्मनि प्रतिबिम्बितान् ॥
भावान् बिम्बविनाभूतान्निर्निमित्तावभासनान् ॥६५॥
सङ्कल्प एव स्वातन्त्र्यं चितेरुच्छूनमीर्यते ॥
असङ्कल्पदशायां सा चितिः स्वच्छैकरूपिणी ॥६६॥
एवं चितेर्विशुद्धैकरूपायाः सृष्टितः पुरा ॥
बृहत्स्वातन्त्र्यमभवत्सङ्कल्पात्मकमेव तत् ॥ ६७ ॥

तुः। स्वातन्त्र्यं हेतुर्यस्य स जागतप्रतिबिम्बः ॥ ६४ ॥ बिम्बं विना प्रतिबिम्बने दृष्टान्तमाह-स्वसङ्कल्पेति । स्वात्मनि अन्तःकरणपरिच्छिन्नचैतन्ये निर्गतं निमित्तं यस्य । निर्निमित्तमवभासनं येषां दर्पणप्रतिबिम्बे इव नालोकादिनिमित्तापेक्षापीति भावः । सङ्कल्पान्मनोराज्ये भासमाना भावाः प्रतिबिम्बलक्षणयोगात्प्रतिबिम्बभूताः, तेषामवभासनं बिम्बाद्यनपेक्षमेव प्रसिद्धम् । एवं परा चितिर्जगत्प्रतिबिम्बनमिति भावः ॥ ६५ ॥ सङ्कल्पपदार्थं विवृणोति-सङ्कल्प इति । चिदात्मनो यत्स्वातन्त्र्यं नाम शक्तिः तस्य शक्तित्वादेव चिदात्मानतिरेकत्वं सूक्ष्मरूपत्वं च तद्यदोच्छूनं पुष्टं भवति दृश्याकारत्वेन स्थूलतां प्राप्नोतीति यावत् । तदा तत्स्वातन्त्र्यमेव सङ्कल्परूपम् । तच्चमप्यनेकभावान्प्रतिबिम्बत्वेनावभासयति । एवमेवेश्वरस्य स्वातन्त्र्यमपि जगदवभासयतीति भावः । असङ्कल्पकाले च यथा तथा चात्मभूता चितिः प्रतिबिम्बवर्जनेन स्वच्छैकचिन्मात्ररूपिणी ॥ ६६ ॥ एवं सृष्टेः पुरा प्रलये विशुद्धैकरूपा या परा चितिः तस्या यद् बृहदपरिच्छिन्नं स्वातन्त्र्यं तदेव सृष्ट्यादौ सङ्कल्पात्मकमभवत् । शुद्धाचिद्दशायां स्वातन्त्र्यस्य तदेकरूपत्वेन स्थितस्य सृष्ट्यादौ जगद्रूपताप्राप्तिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत एतत्समाभातं प्रातिबिम्बात्मकं जगत् ॥
बृहत्सङ्कल्पसुस्थैर्याच्चिरमेतद्विभासते ॥ ६८ ॥
साधारणं जगद्भाति पूर्णस्वातन्त्र्यहेतुतः ॥
अन्येषां तदपूर्णत्वाद्भात्यसाधारणात्मना ॥ ६९ ॥
अभ्यासान्मणिमन्त्राद्यैः स्वातन्त्र्यं तु यथा यथा ॥
त्यजेत्सङ्कोचमात्मस्थं तथा तत्र हि भासनम् ॥७०॥
पश्यैन्द्रजालिकं राम निरुपादानयोगतः ॥

सङ्कल्पतत्त्वमिति भावः ॥ ६७ ॥ ततः सङ्कल्पादेतज्जगत्प्रातिबिम्बात्मकं समाभातं भवति। ननु यथास्मत्सङ्कल्पभासितभावानामस्थिरत्वमेवमीश्वरसङ्कल्पभासितस्याप्यस्थैर्यं कुतो नेति चेदाह—बृहदिति। बृहतः सङ्कल्पस्य स्थिरत्वेनैतज्जगच्चिरं भासते। सङ्कल्पजावभासस्य कल्पान्यूनकालत्वानियमादिति भावः ॥ ६८॥ ननु तथापि स्वसङ्कल्पजातं स्वात्मन एव भासते नान्यस्य। ईश्वरसङ्कल्पजातजगतः कथं सर्वसाधारण्येन भासनमिति चेदाह—साधारणमिति। ईश्वरस्य पूर्णस्वातन्त्र्यात्सर्वस्वातन्त्र्याद्धेतोरित्यर्थः। तदपूर्णत्वात् स्वातन्त्र्यापूर्णत्वात्सर्वस्वातन्त्र्याभावादित्यर्थः। ईश्वर इदमीदृशं जगत्प्रमात्रन्तरदृश्यमिति सङ्कल्पयति ततस्तथा भासते। जीवेन तथा सङ्कल्पितेपि जगति प्रमात्रन्तरदृश्यमित्यंशे अस्वातन्त्र्यान्न सोंऽशो भासत इति भावः ॥६९॥ जीवानामपूर्णं स्वातन्त्र्यमिति तत्सङ्कल्पितानामसाधारण्यमुक्तम्। तस्यैव स्वातन्त्र्यस्योपायैर्यावत्सङ्कोचहानिस्तावत्पूर्णत्वमित्याह—अभ्यासादिति। अभ्यासः शुद्धचिदात्मतत्त्वस्याहमित्यविच्छिन्नानुसन्धानम्। मणिमन्त्रौ प्रसिद्धौ। आद्यैरौषधिः। एतैः साधितैः। तत्र तत्स्वातन्त्र्यकल्पिते॥ ७० ॥ अत्रोदाहरणमाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासयन्तं जगच्चित्रं सङ्कल्पादेव सर्वतः ॥ ७१ ॥
साधारणं स्थिरं स्वार्थक्रियार्हं भूय एव तु ॥
स्वात्मन्युपसंहरेच्च जगदेवं विभासते ॥ ७२ ॥
योगिनः पश्य सृष्टिं तां पूर्णस्थैर्यसमावृताम् ॥
योगिनस्तु मितत्वेन सृष्टिर्बाह्या विभाविता ॥ ७३ ॥
अमितत्वात्सृष्टिरियं चिन्नाथस्यान्तरेव हि ॥
अत एव चिदात्मत्वव्यतिरेकादसत्यता ॥ ७४ ॥

पश्येति । ऐन्द्रजालिको हि साधितमणिमन्त्राद्यैर्गजतुरगादिरूपचित्रं जगदुपादानमनपेक्ष्यैव सङ्कल्पमात्रेण सर्वतो भासयतीति भावः । यद्वा मानससृष्टमसाधारण्यमस्थैर्यमर्थक्रियाभावश्चेति बाह्यसृष्टिवैसादृश्याद् दृष्टान्तान्तरमाह–पश्येति ॥ ७१ ॥ स्वीया याऽर्थक्रिया घटादेरुदकाहरणादिरूपा । तदर्हम् एवंविधं जगदैन्द्रजालिकः सृष्ट्वा भूयः स्वात्मनि स्वसृष्टं सर्वमुपसंहरेच्च । एवमीश्वरसृष्टमपि जगद्विभासते ॥ ७२ ॥ नन्वेवमपि ऐन्द्रजालिकसृष्टेरतिस्वल्पकालस्थायित्वेन वैसादृश्यमेवेति मत्वाह–योगिन इति । विश्वामित्रादेर्योगिनो नक्षत्रादिसृष्टिमाप्रलयस्थायित्वरूपपूर्णस्थैर्यसमावृतां पश्येत्यर्थः । ननु तथापि योगिनः सृष्टिरीश्वरसृष्टिवत्स्वस्वरूपे कुतो नेति चेदाह–योगिनस्त्विति । साधारणयोगिनः ईश्वरापेक्षया परिच्छिन्नत्वेन परिमितस्वरूपत्वेन बहिःस्थानलाभात् परिमितशक्तित्वाच्च बाह्या सृष्टिर्विभावितेत्यर्थः । यस्तु पूर्णयोगी स बाह्यमनपेक्ष्य श्रीकृष्णादिः स्वस्वरूपे एवाऽखिलविश्ववैचित्र्यमवभासायितुं समर्थ इति ध्येयम् ॥ ७३ ॥ नैवमीश्वर इत्याह–अमितत्वादिति । अत एव अन्तःसृष्टत्वादेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगतः प्रतिबिम्बस्यादर्शात्मत्वं विना यथा ॥
अत एव विचारेणासत्यतां याति नान्यथा ॥ ७५ ॥
सत्यं स्वभावं नो मुञ्चेदसत्यं तं परित्यजेत् ॥
जगत्पश्य भार्गवैतत् स्वभावादतिचञ्चलम् ॥ ७६ ॥
सत्यासत्ये विभागेन भासेते सर्वतोऽखिलम् ॥
प्रतिबिम्बादर्शभानमिव तत्प्रविचारय ॥ ७७ ॥
आदर्शो ह्यचलस्तत्र चलं हि प्रतिबिम्बकम् ॥
तथा जगच्चलं संविदचलं सर्वभावितम् ॥ ७८ ॥

अन्यान्तरान्यावभासनं प्रतिबिम्बस्य दर्पणात्मत्वव्यतिरेकेणासत्यत्ववज्जगतोऽपि चिदात्मव्यतिरेकादसत्यतामाह—चिदात्मत्वेति ॥ ७४ ॥ असत्ता जगत इत्यन्वयः । अत एवेति प्रतिबिम्बरूपत्वादेवेत्यर्थः । नान्यथेति । प्रतिबिम्बात्मकमेतज्जगदिति विचारे कृते न सत्यतां प्राप्नोतीत्यर्थः ॥ ७५ ॥ एवं प्रतिबिम्बत्वेनासत्यत्वं प्रसाध्यासत्यलक्षणवत्त्वादपि जगतोऽसत्यतां वक्तुं प्रसङ्गात्सत्यासत्यलक्षणमाह—सत्यमिति । अव्यभिचरितस्वभावं सत्यम्, अन्यदसत्यम् इति तदर्थः। एतत् प्रत्यक्षं जगत् अतिचञ्चलं क्षणिकम् ॥ ७६ ॥ कथमयं निश्चय इति चेद्विचारेण भवेदित्याह—सत्येति । सर्वतः सर्वत्र अखिलं तज्जगत् प्रविचारय । कथमिति चेदाह—प्रतिबिम्बादर्शभानमिवेति । प्रतिबिम्बादर्शयोरनियतनियतरूपत्वेन भानवत् जगच्चिदात्मनोर्भानं भवेदिति प्रविचारयेति भावः ॥ ७७ ॥ एतदेव दृष्टान्ते विचारपूर्वकं दार्ष्टान्तिके योजयति—आदर्श इति । यावत्प्रतिबिम्बेषु आदर्शस्याव्याहतत्वेनापरित्यक्तस्वभाववत्त्वेन सत्यता । घट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव हि भावानां विचारासहरूपता ॥
तथा हि सूर्यालोको हि वस्तूनामवभासकः ॥ ७९ ॥
उलूकादिदिवान्धानां विपरीतोऽन्धकारवत् ॥
प्रकाशत्वान्धकारत्वे न विविक्तेऽनयोः स्फुटे ॥८०॥
एवं विषं कस्यचित्स्यादविषं कस्यचिद्भवेत् ॥
मनुष्यादेः प्रतीघातकरी भीतिर्हि लक्ष्यते ॥ ८१ ॥
योगिनां गुह्यकादीनामप्रतीघातलक्षणा ॥

प्रतिबिम्बस्य पटादिप्रतिबिम्बकाले व्यावृत्तत्वेन परित्यक्तस्वभावत्वादसत्यतेति भावः । तथेति । घटादेर्जगतः परस्परं व्यावृत्तेः संविदः सर्वत्राऽव्यावृत्तेर्जगदसत्यं संवित्सत्येति ज्ञेयम् । जगत्संविदोश्चलाचलत्वं सर्वैर्ज्ञातमित्याह-सर्वेति ॥ ७८ ॥ अत एव असत्यत्वादेव । यद्धि असत्यं तन्मरुतोयकेशोड्रकादिवदविचारसहमेव । विचारेणेदमीदृशमिति निर्णीतं भवेदिति भावः । विचारासहत्वमेवोपपादयति भावेषु-तथाहीति ॥ ७९ ॥ विपरीतः अनवभासकः । न विविक्ते विवेकमप्राप्ते । अनयोः सौरालोकतमसोः । वस्त्ववभासकत्वं प्रकाशत्वम् । अनवभासकत्वं प्रकाशविरुद्धत्वं वान्धकारत्वम् । एवं च सौरालोकस्य मनुष्यादीन्प्रत्यवभासकत्वेन उलूकादीन्प्रत्यनवभासकत्वं, नैवं तमसोऽपि मनुष्यादीन्प्रत्यनवभासकत्वेनोलूकादीन्प्रत्यवभासकत्वेन कस्य प्रकाशत्वं कस्य वान्धकारत्वमिति विवेक्तुमशक्यत्वेन विचारासहत्वमिति भावः ॥ ८० ॥ एवमन्येषामपि स्वभावानवस्थितिमाह-एवमिति । विषं वत्सनाभादिर्मनुष्यादेर्मारकं स्यात् । तदुत्पन्नकृम्यादेरविषममारकम् । प्रतीघातो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालो देशश्च दीर्घो यो मनुष्यादिप्रभावितः ॥८२॥
स एव विपरीतो वै देवानां योगिनामपि ॥
दर्पणे भासमानस्य दूरादेर्दूरता यथा ॥ ८३ ॥
तथैवास्य स्वभावोऽपि विचारो न स्थिरीभवेत् ॥
अत आश्रयरूपेण विना नास्ति हि किञ्चन ॥ ८४ ॥
यदस्तीति भाति तत्तु चितिरेव महेश्वरी ॥
एवं जगच्चिदेकात्मरूपं ते सम्यगीरितम् ॥ ८५ ॥१०६॥
इति श्री० ज्ञानखण्डे जगत्तत्त्वनिरूपणे एकादशोऽध्यायः ॥ ११ ॥

गमनप्रतिबन्धः ॥ ८१ ॥ अप्रतीघातो लक्षणं यस्याः । प्रतीघातकरी न भवतीति तात्पर्यम् । यः कालो देशश्च मनुष्यादिभिर्दीर्घत्वेन ज्ञातः स एवं देवादीनामदीर्घ इत्याह–काल इति ॥ ८२ ॥ कथमेकस्यैव दूरत्वमदूरत्वं चेति चेत्सदृष्टान्तमाह–दर्पण इति ॥ ८३ ॥ तथैवेति । दर्पणे दृश्यमानो यः सुदीर्घोऽपि देशस्तस्य दर्पणानातिरिक्तत्वेन यथा न दीर्घत्वमेवमेवात्र चितिभासमानालोकादीनामप्रकाशत्वादिकं विचारितं सत् न स्थिरं भवतीत्यर्थः । अतः प्रतिबिम्बात्मकत्वाज्जगतः आश्रयरूपेण चिदात्मना विना नास्तीत्यर्थः ॥८४॥ यदिति । यथा दर्पणेऽस्तीति भासमानानां प्रतिबिम्बानां दर्पण एव स्वरूपमेवं चिदात्मनि यदस्तीति भाति तत्सर्वं चितिरेव महेश्वरीति स्वास्मिन् प्रतिबिम्बात्मकवैचित्र्यभासने स्वैश्वर्यमेव निमित्तं न तु दर्पणस्येव प्रतिबिम्बमिति सूचितम् । अध्यायादौ यत्पृष्टं कथं चितेरन्यचैत्यं नास्तीति तदीयता ग्रन्थेनोपपाद्योपसंहरति–एवमिति ॥ ८५ ॥

इति श्री० तात्पर्यदीपिकायामेकादशोऽध्यायः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशोऽध्यायः।

एवं दत्तात्रेयमुखाज्जगत्तत्त्वं निशम्य तु।
पप्रच्छ भार्गवो भूयः सन्देहकलिलान्तरः॥ १॥
भगवन् संश्रुतं प्रोक्तं भवता जागतं ननु।
यथा ब्रवीषि भगवंस्तत्तथैव न चाऽन्यथा॥ २॥
तथापि कुत एतद्धि भाति सत्यात्मकं सदा।
कुतो वाऽन्यैर्बुद्धिमद्भिः सत्यत्वेन विनिश्चितम्॥३॥
त्वत्तः श्रुतं चापि भूयो भाति मे सत्यवत् कुतः।
ब्रूह्येतत् कृपया नाथ यथा नश्येदयं भ्रमः॥ ४॥

अत्राऽध्याये चाधिपद्यैर्जगत्सत्यत्वभासनम्।
दृढभावनयेत्युक्तं शैलाख्यानेन वै स्फुटम्॥ १॥

एवं चितिरेवेति। सन्देहेन कलिकलुषितमान्तरं मनो यस्य॥ १॥ जागतं स्वरूपमिति शेषः। तथैव चितिमात्ररूपमेव॥ २॥ तथापि असत्यमपि। कुतः कस्मात् कारणात्। सदा सत्यात्मकं भाति। रज्जुसर्पादेरसत्यस्य कदाचिदसत्यत्वेन भानं दृष्टम्। इदं हि जगत् कथं सदा सत्यात्मकं भातीति भावः। नन्वेतद् गगननैल्यतुल्यं मूढैरेव सत्यत्वेन विदितमिति चेदाह—कुतो वेति। अन्यैः परैर्द्वैतवादिभिः। बुद्धिमद्भिस्तर्कनिपुणैः॥३॥ अथ च त्वत्तः गुरोराप्ततमात् असत्यमिदमिति सोपपत्तिकं श्रुतमपि भूयः कुतो मे जगत् सत्यत्वेन भाति एतद् ब्रूहि॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यापृष्टो भार्गवेण दत्तात्रेयो महाशयः।
जगत्सत्यभ्रान्तिमूलं प्रवक्तुमुपचक्रमे ॥ ५ ॥
शृणु राम जगद्भ्रान्तेर्मूलमेतत् सनातनम्।
वस्त्वविद्यापूर्वकं यद् दृढा भावनमेव तत् ॥ ६ ॥
पश्यात्मानमविज्ञाय स्वात्मबुद्धिं शरीरके।
क्व मांसरुधिरास्थीनि क्व चिदात्माऽतिनिर्मलः ॥ ७ ॥
केवलं भावनादार्ढ्याच्चिदात्मा देहकोऽभवत्।
ज्ञातेऽप्यात्मनि चिद्रूपे भूयो भ्रान्तिः शरीरके ॥८ ॥
एवमेव भावनया सत्यं भाति जगत् खलु।
विपरीतं भावयन् वै दृढं भ्रान्तिं निवर्त्तयेत् ॥ ९ ॥

महाशयेति; महान् अपरिच्छिन्नः चिदाकार आशयश्चित्तं यस्य। जगत् सत्यमिति या भ्रान्तिः तन्मूलं तन्निमित्तम् ॥ ५ ॥ एतद्वक्ष्यमाणम्। सनातनम् अनादि। तदेवाऽऽह–वस्त्विति। वस्तुनोऽविद्याया अयथावद्ग्रहणमेतत्पूर्वकं यद्वस्तुनोऽन्यरूपेण दृढभावनम्। भावनाया दृढत्वं श्रद्धावत्त्वम्। तत् प्रोक्तभ्रमनिमित्तम् ॥६॥ तत्रोदाहरणमाह–पश्येति। आत्मानमपरिच्छिन्नचिद्रूपमविज्ञाय अयथावत् परिच्छिन्नत्वेन विज्ञाय। शरीरमात्मेति दृढभावनादिति शेषः। स्वात्मबुद्धिमिति। शरीरमात्मेति बुद्धिम्। शरीरं कुतो नात्मेति चेदाह–क्वेति। अतिनिर्मलः चिदेकरसः ॥ ७ ॥ आत्मत्वेन दृढभावनाद्देहात्मनिश्चयः। एवं भावनादेव आत्मा चिद्रूपो न देह इत्युपपत्त्युपलब्धिभ्यां ज्ञातेऽपि पुनर्भ्रान्तिः ॥ ८ ॥ एवमेवेति। अनात्मनि देहे भावनयाऽऽत्मबुद्धिवदेवेत्यर्थः। दृढसत्यत्वभावनया असत्यमिति सम्यग्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो यथा भावयेदेतज्जगत्तस्य तथा भवेत् ।
योगिनां धारणाध्यानैः पश्य तद्रूपसङ्क्रान्तिम् ॥ १० ॥
अत्र ते वर्त्तयिष्यामि पुनरावृत्तमद्भुतम् ।
अस्ति वङ्गे सुन्दराख्यं पुरं परमपावनम् ॥ ११ ॥
तत्राऽऽसीन्नृपतिर्धीमान् सुषेण इति विश्रुतः ।
तस्य भ्राता महासेनो यवीयान् प्रियकृत् सदा ॥ १२ ॥
शशास राज्यं नृपतिर्धर्मतः सर्वसम्मतः ।
कदाचिदश्वमेधैः सोऽयजद्देवं महेश्वरम् ॥ १३ ॥
तत्र राजकुमारास्तु महाबलपराक्रमाः ।
महत्या सेनया यज्ञांश्च सर्वेऽप्यनुसंययुः ॥ १४ ॥
अश्वस्य रोधकान् सर्वान् विजित्य बलिनो बलात् ।
ययुरैरावतीतीरमन्वश्वं नृपतेः सुताः ॥ १५ ॥

ज्ञातमपि जगत् सत्यमिति भाति । नन्वेवं सति जगति सत्यत्वबुद्धिरनिवार्यैव इति चेन्नेत्याह–विपरीतमिति । एतज्जगत् असत्यमिति सदा विपरीतं दृढं भावयन् सत्यत्वभ्रान्तिं निवर्तयेत् ॥ ९ ॥ कुत एवमिति चेदेवमेव भावनासामर्थ्यमित्याह–यो यथेति । क्वैतद् दृष्टमिति चेदाह–योगिनामिति । धारणा ध्यानञ्च भावनापरिपाकविशेषः । बहुवचनं धारणादेरवान्तरभेदाभिप्रायम् । तद्रूपसङ्क्रान्तिम् जगतो भावनानुरूपताप्राप्तिम् ॥ १० ॥ अत्र जगतो भावनानुरूपताप्राप्तौ । वर्त्तयिष्यामि उपक्रमिष्यामि । परमपावनं तीर्थभूतम् ॥ ११ ॥ यवीयान् कनिष्ठः भ्राता प्रियकृत् ॥ १२ ॥ १३ ॥ तत्र यज्ञे । अश्वचर्यायामश्वमनुगतः ॥ १४ ॥ रोधकान् शत्रून् । ऐरावती नदी । अन्वश्वम् अश्वपृष्ठतः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददृशुस्तत्र राजर्षिं तङ्गणाख्यं तपोनिधिम् ।
बलोद्धता अवज्ञाय तमसङ्गम्य ते ययुः ॥ १६ ॥
तद्वीक्ष्य तङ्गणसुतः पित्रवज्ञां रुषान्वितः ।
जग्राहाश्वं यज्ञियं तं राजपुत्रान् हि भर्त्सयन् ॥१७॥
अथ राजकुमारास्ते रुरुधुः सर्वतो हि तम् ।
तावत्तङ्गणपुत्रोऽपि गण्डशैलं पुरःस्थितम् ॥ १८ ॥
विवेशाश्वं समादाय पश्यत्सु राजसूनुषु ।
साश्वं शिलाविलीनं तं दृष्ट्वा राजकुमारकाः ॥१९॥
बिभिदुर्गण्डशैलं तं शस्त्रैरुच्चावचैः पृथक् ।
चूर्णिताद् गण्डशैलात् स महत्या सेनया वृतः ॥२०॥
निर्गत्य तङ्गणसुतो जिगाय युधि तान् क्षणात् ।
निहत्य सेनां सौषेणीं बध्वा राजकुमारकान् ॥२१॥
प्रविवेश गण्डशैलं भूयस्तङ्गणसम्भवः ।
अथ सेनाभटाः शिष्टा गत्वा राज्ञे न्यवेदयन् ॥२२॥
साश्वराजकुमाराणां हरणं गण्डशैलके ।
सुषेणो विस्मितोऽत्यन्तमुवाचाऽवरजं स्वकम् ॥ २३ ॥
वत्साऽऽशु गच्छ तं देशं यत्राऽऽस्ते तङ्गणो मुनिः ।
तपस्विनोऽचिन्त्यवीर्या अजेया देवमानुषैः ॥२४॥

तत्र ऐरावतीतीरे । अवज्ञाकार एव । सङ्गम्येति प्रणामादिपूर्वकं समीपमगत्वेत्यर्थः । ते राजकुमाराः ॥ १६ ॥ १७ ॥ तं मुनिपुत्रम् ॥ १८ ॥ तं मुनिपुत्रम् ॥ १९ ॥ उच्चावचैरुत्तमैरधमैश्च । चूर्णितात् चूर्णितैकदेशात् ॥ २० ॥ तान् राजकुमारान् ॥२१॥ सुन्दरपुरं गत्वा ॥ २२ ॥ तच्छ्रुत्वा विस्मितः ॥ २३ ॥ यतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं प्रसाद्य सुतानश्वं चाऽऽसाद्याऽऽयाहि सत्वरम् ।
न कालोऽतिव्रजेदेष वसन्तो यज्ञसम्मतः ॥ २५ ॥
अभिमानो न कर्त्तव्यस्तपस्विषु कदाचन ।
क्रुद्धास्तपस्विनो लोकान् भस्मीकुर्युः क्षणेन वै ॥ २६ ॥
अतः प्रसादनपरो भूत्वा स्वार्थं प्रसाधय ।
इत्यादिष्टो महासेनस्तं देशं शीघ्रमाययौ ॥ २७ ॥
अपश्यत्तङ्गणं तत्र समाहितमतिं दृढम् ।
काष्ठकुड्यात्मतां प्राप्तं शान्तेन्द्रियमनोधियम् ॥२८॥
निर्विकल्पदशाम्भोधिनिलीनस्वात्मभावनम् ।
प्रणम्य दण्डवद् भूयः कृताञ्जलिपुटस्तदा ॥ २९ ॥
तुष्टाव विविधैः स्तोत्रैर्महासेनो मुनीश्वरम् ।
तथा तस्य संस्तुवतो व्यत्यगाद्धै दिनत्रयम् ॥३०॥
अथाऽऽजगाम तत्पुत्रः सन्तुष्टः पितृसंस्तवात् ।

ऽजेया अतः प्रसाद्य । अश्वमेधस्य कालः ॥२४॥ २५ ॥ २६ ॥ स्वार्थं अश्वादिमोचनम् । तं देशम् तङ्गणेनास्थितम् ॥ २७ ॥ दृढं यथा तथा सम्यक् स्वात्मन्यप्रकम्पतयाऽऽहिता स्थापिता मतिर्येन । अत एव काष्ठेत्यादिदेहचाञ्चल्याभावः शान्ते-त्यादिना वाह्यान्तःकरणयोश्चाञ्चल्याभाव उक्तो ज्ञेयः ॥२८ ॥ निर्विकल्पदशा निर्गता विषयाकारैः परिच्छेदात्मिका विकल्पदशा यस्याश्चितेस्तस्या अपरिच्छिन्नत्वेनाम्भोधिरूपता तत्र नितरां लीनं सूक्ष्मत्वेन स्थितमात्मनो भावनं महत्त्वेन स्फुरणं यस्य । निर्विकल्पस्वरूपस्यापि व्युत्थानानुरोधेन सूक्ष्माहंविमर्शनाभ्यु-पगम इति ध्येयम् । एवंविधं तङ्गणं प्रणम्य ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोवाच तं महासेनं राजंस्तुष्टोऽस्मि संस्तवात् ॥३१॥
ब्रूहि किं तेऽभिलाषितं साधयाम्यविलम्बितम् ।
अहं पुत्रोऽस्म्यस्य विभोस्तङ्गणस्य महामुनेः ॥३२॥
नैतस्य मे पितुः कालो भाषणे शृणु भूमिप ! ।
समाहितस्वान्त एष द्वादशाब्दादनन्तरम् ॥ ३३ ॥
समाधितः समुत्तिष्ठेत्तत्र पञ्चाब्दका गताः ।
सप्ताऽवशेषा एवं हि समयोऽस्य पुरातनः ॥ ३४ ॥
तत्तेऽभिवाञ्छितं ब्रूहि यत्तस्मात्तत् करोम्यहम् ।
न मां बालं विजानीहि पितृतुल्यं तपस्विनम् ॥ ३५ ॥
नाऽसाध्यं विद्यते लोके योगिनां हि तपस्विनाम् ।
श्रुत्वा मुनिकुमारोक्तं महासेनोऽतिबुद्धिमान् ॥ ३६ ॥
प्राह तं तङ्गणसुतं प्रणम्य च कृताञ्जलिः ।
मुनिपुत्र ! प्रियं मेऽद्य करोषि यदि सत्यतः ॥ ३७ ॥
तत् पितुस्तेऽद्य वाञ्छामि समाधेर्व्युत्थितस्य वै ।
सह सम्भाषणं किञ्चिदेतदत्यन्तवाञ्छितम् ॥ ३८ ॥
अनुकम्प्यो यद्यहं ते द्रुतमेतत् प्रसाधय ।
श्रुत्वैतद्वचनं राज्ञः प्राऽऽह तापसजः पुनः ॥ ३९ ॥

अथ चतुर्थदिने ॥ ३१ ॥ ३२ ॥ अनन्तरं समुत्तिष्ठेदित्यन्वयः ॥ ३३ ॥ समयः सङ्केतः सङ्कल्प इति यावत् । अस्य मे पितुः ॥ ३४ ॥ तत् तस्मात् । यदस्मात्तेऽभिवाञ्छितं तदहं करोमि । अत्र बालं मामसमर्थं न विजानीहि ॥ ३५ ॥ अतिबुद्धिमानिति । बालानाप्यनवास्थितत्वज्ञ इति भावः ॥ ३६ ॥ ३७ ॥ पितुरित्यादि षष्ठ्यन्तं तृतीयया विपरिणेयं सहयोगात् ॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजन् न साध्यं ह्येतत्ते वाञ्छितं सर्वथा भवेत् ।
तथाऽपि ते करोमीति प्रतिश्रुत्याऽन्यथा कथम् ॥४०॥
ब्रवीमि भूयस्तत् किञ्चित् प्रतीक्षस्वाऽभियाचितः ।
मुहूर्त्तमात्रं मे पश्य सामर्थ्यं योगसम्भवम् ॥ ४१ ॥
एष मेऽद्य गुरुः शान्तपदे परमपावने ।
संस्थितस्तं वाह्ययत्नैरपि को वै प्रबोधयेत् ॥ ४२ ॥
पश्याऽहं बोधयाम्येनं योगयुक्त्यैव सूक्ष्मया ।
इत्युक्त्वाऽथ समाविश्य समाहृत्येन्द्रियाण्यलम्॥४३॥
प्राणेऽपानं सुसंयोज्य मुख्यप्राणेन निर्गतः ।
देहं पितुः प्रविश्याऽऽशु प्रलीनं तस्य मानसम् ॥४४॥

॥ ३९ ॥ कथं ब्रवीमीति सम्बन्धः ॥ ४० ॥ ४१ ॥ शान्तपदे निर्विकल्परूपे ॥ ४२ ॥ सर्वथाऽशक्यं चेत्त्वमेनं कथं बोधयिष्यसीति चेदाह–सूक्ष्मयेति । मादृशसूक्ष्मयोगं युक्तिविदां नाशक्यमिति भावः । समाविश्य उपविश्य । अलमत्यन्तमिन्द्रियाणि समाहृत्य संरुद्ध्य ॥ ४३ ॥ प्राणो बहिर्निर्गच्छन्नान्तरो वायुः तस्मिन् । अपानं बाह्यमन्तर्गच्छन्तं वायुम् । सुसंयोज्य एकीकृत्य । अपानं निरुद्ध्य निःशेषेण प्राणवायुविरेचनानन्तरं बाह्यकुम्भकं कृत्वेति भावः । मुख्यप्राणोऽहङ्कारात्मान्तःकरणम् । तेन रूपेण देहान्निर्गतः । तस्य पितुः । मरणे ह्यन्तःकरणं प्रलीनं संस्कारमयप्राणेन सह निर्गच्छति । तदन्तःकरणस्य लीनत्वादेव स न किञ्चिज्जानाति । परकायप्रवेशे तु नान्तःकरणस्य विलयः । किन्तु बाह्यकुम्भकाभ्यासपरिपाकेन स्वेच्छ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोधयामास चाऽऽकृष्य प्रबोध्याऽऽशु विनिर्गतः ।
देहं स्वमाविशद् यावत्तावत् स बुबुधे मुनिः ॥४५॥
अपश्यदग्रगं भूयः स्तुवन्तं प्रणतं तदा ।
किमेतदिति सञ्चिन्त्य सर्वं योगदृशाऽविदत् ॥ ४६ ॥
प्रसन्नचित्त आमन्त्र्य पुत्रं प्राह सुशान्तधीः ।
वत्स ! नैवं पुनः कार्यं क्रोधस्तु तपसो रिपुः ॥४७॥
राज्ञा हि रक्षिते लोके तपो निर्विघ्नमेधते ।
यज्ञविघ्नक्रिया दैत्यस्वभावो न मुनेः क्वचित् ॥४८॥
प्रयच्छाऽश्वं राजपुत्रायास्मै सुमना द्रुतम् ।
शीघ्रं यात्वेष यज्ञस्य न कालातिक्रमो भवेत् ॥४९॥

यैव प्राणमवष्टभ्यान्तःकरणं तेन सह स्वनिर्गमादिकं विदन्नेव निर्गच्छतीति ज्ञेयम् ॥ ४४ ॥ पितुरात्मनि प्रलीनं निरुद्धं मन आकृष्य बोधयामास । अन्तःकरणस्य तमोमयत्वसम्पात्तिर्लयः । रजोमयत्वसम्पत्तिः प्रबोधः । सत्त्वमयतासम्पत्तिर्निरोधः । इत्यन्तःकरणसुषुप्तिजाग्रत्समाधिषु दशात्रयं ज्ञेयम् । यद्यप्यन्तःकरणस्यातीन्द्रियत्वेन तदाकर्षणमशक्यम् , तथापि योगिनामतीन्द्रियज्ञानं योगसामर्थ्यादिति ज्ञेयम् । पितृदेहाद्विनिर्गतः । सः तद्गणः ॥ ४५ ॥ सर्वं पुत्रादिचेष्टितम् ॥ ४६ ॥ प्रसन्नचित्त इति । शान्तबुद्धित्वाद्राज्ञि पुत्रे वा न तस्य क्रोध इति भावः । एवं क्रोधेनाश्वहरणादिकम् ॥ ४७ ॥ राजाऽस्माकमुपकारी तस्यापकरणेनास्माकं कृतघ्नता स्यादित्याह—राज्ञेति । अनुपकारिणोऽपि यज्ञविघ्नोऽयुक्त इत्याह—यज्ञेति ॥ ४८ ॥ सुमना इति । शेपन्त्यक्त्वेत्यर्थः । एष रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तो गण्डशैलं स प्रविश्य क्षणमात्रतः ।
साश्वान् राजसुतांस्तस्मै ददौ प्रीत्या गतक्रुधः ॥५०॥
ततः साश्वान् भ्रातृपुत्रान् संप्रेष्य नगरं प्रति ।
महासेनस्तज्ज्ञणं तं प्रणम्यात्यन्तविस्मितः ॥ ५१ ॥
अपृच्छत् प्राञ्जलिर्भूत्वा प्रसाद्य मुनिपुङ्गवम् ।
भगवन् ज्ञातुमिच्छामि साश्वा मे भ्रातृनन्दनाः॥५२॥
कथं गण्डशैलगर्भे संस्थितास्तत् समीरय ।
एवं राज्ञानुयुक्तो ऽथ तज्ज्ञणः प्राह भूपतिम् ॥५३॥
शृणु राजन् प्रवक्ष्यामि पुराऽहं पृथिवीपतिः ।
समुद्रवलयां पृथ्वीमन्वशासं चिरं खलु ॥ ५४ ॥
महादेवप्रसादेन ज्ञात्वा चितिमधीश्वरीम् ।
त्रिपुरां लोकसंस्थानं नीरसं विमृशंस्तथा ॥ ५५ ॥
निर्विण्णो लोकयात्रायां न्यस्य राज्यं सुतेष्वथ ।
प्राविशं वनमेतं वै भार्या मामन्वगात् सती ॥५६॥
तस्यामितप्यतो मेऽद्य ययुरर्बुदवत्सराः ।
भार्यापि मत्सेवनेन परां सिद्धिमुपागता ॥ ५७ ॥
कदाचिदथ भाव्यर्थगौरवान्मे प्रिया सती ।

जभ्राता ॥ ४९ ॥ सः मुनिपुत्रः । तस्मै महासेनाय ॥ ५० ॥ ॥ ५१ ॥ ५२ ॥ कथमिति । गण्डशैलस्य सघनत्वादित्यर्थः ॥ ५३ ॥ ५४ ॥ आत्मरूपां चितिम् । लोकस्य दृश्यस्य संस्थानं स्थितिम् । नीरसमिति । चितिप्रतिबिम्बत्वेन निस्तत्त्वभूतत्वात् ॥ ५५ ॥ निर्विण्णो जातालम्बुद्धिः । लोकयात्राया व्यवहृतेः ॥ ५६ ॥ परां सिद्धिं मोक्षम् ॥ ५७ ॥ भाव्यर्थगौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधावेव कामार्त्तमानसाभूत्ततस्तु सा ॥ ५८ ॥
मां दृष्ट्वा रतिमिच्छन्ती समाधिस्थं स्थिरान्तरम् ।
असहन्ती कामवेगं भावयामास मद्रतिम् ॥ ५९ ॥
गाढभावनया प्राप्य सम्भोगं तु मया सह ।
दधार गर्भं सुषुवे पुत्रमेतं पुरः स्थितम् ॥ ६० ॥
पुत्रं न्यस्य मदुत्सङ्गे मां समाधेः प्रबोध्य च ।
देहं भूतेषु सात्कृत्य परव्योमाऽऽत्मतां ययौ ॥६१॥
अथ दृष्ट्वोत्सङ्ग एनं ज्ञात्वा तस्या गतिं पराम् ।
दयाक्रान्तमना जातस्तेनायं वर्द्धितो मया ॥ ६२ ॥
श्रुत्वा कदाचिन्मत्तोऽयं राज्यशास्तिं पुरा कृताम् ।
राज्यशासनकामोऽभूत् प्रार्थयामास मामनु ॥६३॥
ततो मदुपदेशेन प्राप्य योगर्द्धिमुत्तमाम् ।
निर्माय भावनायोगात् लोकमस्मिन् महाऽश्मनि॥६४॥
समुद्रवलयां पृथ्वीं शास्ति नित्यं सुतस्त्वयम् ।
तल्लोके ऽश्वः सुता राज्ञो निरुद्धास्ते हि मोचिताः ॥६५॥
इत्येतत्ते समाख्यातं गण्डशैले ऽवरोधनम् ।

त्वात् । भवितव्यस्यावोधत्वात् । समाधावेव । निरुद्धं मनः कामाकारेण प्रोद्बुद्धमिति भावः ॥ ५८ ॥ स्थिरान्तरम् । झटित्युद्बोधयितुमशक्यम् । मया कृतां रतिं भावयामास ॥ ५९ ॥ ॥ ६० ॥ एवं कामविहिता देहेऽपि जातनिर्वेदादेहं त्यक्तवतीत्याह—पुत्रमिति । सात्कृत्य संयोज्य । परं व्योम परं ब्रह्म ॥ ६१ ॥ तस्याः पत्न्याः । अयं सुतः ॥ ६२ ॥ अयं पुत्रो मया कृताम् ॥ ६३ ॥ योगर्द्धिं योगैश्वर्यम् । अस्मिन् पुरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रुत्वा मुनिवचो भूयः पप्रच्छ भूपतिः ॥६६॥
श्रुतं त्वदुक्तमेतद्धै महाश्चर्यकरं परम् ।
तं लोकं द्रष्टुमिच्छामि कृपया मे प्रदर्शय ॥ ६७ ॥
इति सम्प्रार्थितो राज्ञा मुनिः पुत्रं समादिशत् ।
वत्सास्मै दर्शय स्वीयं लोकं सर्वं यथेप्सितम् ॥६८॥
इत्युक्त्वा तद्गणो भूयः प्रविवेश समाहितिम् ।
अथ तं तद्गणसुतः समासाद्य नृपं ययौ ॥ ६९ ॥
गण्डशैलं प्रति ततः प्राविशन्मुनिदारकः ।
प्रवेष्टुं नाशकद् भूप आह्वयन्तं मुनेः सुतम् ॥ ७० ॥
सोऽपि गण्डशिलान्तस्थ राजानं समुपाह्वयत् ।
अथ भूयो विनिष्क्रम्य प्राह भूपं मुनेः सुतः ॥ ७१ ॥
नृपैष लोकस्ते ऽसाध्यः प्रवेष्टुं खल्वयोगिनः ।
अयोगाद् गण्डशैलोऽयं घनः सप्रतिघोऽभवत् ॥७२॥
तेन व्यस्तं सर्वथैव पितुर्वचनगौरवात् ।
तदत्र देहं विन्यस्य कोटरे तृणसंवृते ॥ ७३ ॥
मनोमात्रशरीरः सन् शैलं विश मया सह ।
इत्युक्तः प्राह नृपतिरशक्तो देहनिर्गमे ॥ ७४ ॥

स्थिते ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ समाहितिं समाधिम् ॥ ६९ ॥ गण्डशैले प्राविशत् । आह्वयन्तं राजानं मुनिपुत्रस्याह्वानकर्त्तारमिति भावः ॥ ७० ॥ सोऽपि मुनिपुत्रोऽपि ॥ ७१ ॥ अयोगात् भावनायोगसिद्धिं विना । घनः निबिडः । सप्रतिघः प्रवेशप्रतिबन्धकः ॥ ७२ ॥ यस्मादवश्यं नेतव्यः तत् तस्मात् । कोटरे भूबिले । शरीरोपघातककाका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं मुने देहमिममुत्सृजामि समीरय ।
उत्सृजामि यदि बलान्नाशमेष्यामि सर्वथा ॥ ७५ ॥
एवं वदन्तं नृपतिं प्रहस्याह मुनेः सुतः ।
अहो योगानभिज्ञोऽसि चाऽस्तु नेत्रे निमीलय ॥७६॥
इत्युक्त्वा मीलिताक्षं तं प्रविश्य निमिषार्द्धतः ।
आकृष्य तल्लिङ्गतनुं क्षिप्त्वा स्वभ्रे च तत्तनुम् ॥७७॥
योगसामर्थ्यतः शैले निविश्य नृपसंयुतः ।
सुषुप्तं देहवैकल्यात् स्वसङ्कल्पोत्थदेहके॥ ७८ ॥
संयोज्य बोधयामास प्रबुद्धो नृपतिस्तदा ।
गृहीतं मुनिनाऽपश्यत स्वं महागगने तदा ॥ ७९ ॥
ऊर्द्ध्वं विष्वक् च संपश्यन् नभो भीममनन्तकम् ।
भीतः प्राह मुनेः पुत्रं मुने मां न परित्यज ॥ ८० ॥
परित्यक्तो विनश्यामि पतिष्येऽहं निराश्रये ।
इति भीतं नृपं दृष्ट्वा प्रहस्याऽऽह मुनेः सुतः ॥ ८१ ॥

दिभ्यो रक्षणाय तृणसंवृते इति ॥ ७३ ॥ देहान्निर्गमे ॥ ७४ ॥ बलात् श्वासप्रतिरोधकजिह्वोत्पाटनादिना ॥ ७५ ॥ ७६ ॥ तं राजदेहम् । तत्तनुं राज्ञः स्थूलतनुम् ॥ ७७ ॥ स्थूलदेहवैकल्यात् । स्थूले स्वसङ्कल्पोत्थान्यदेहके ॥ ७८ ॥ लिङ्गदेहं संयोज्य । ननु प्राक् राजपुत्रादयः कथं स्थूलदेहयुता नीता इति चेदुच्यते–ते हि सुषुप्ता एव शैललोके नीताः । जाग्रतः-स्वाभाविकस्थूलदेहवतो ऽयोगिनस्तल्लोकावलोकनमशक्यमित्येव तद्योगसामर्थ्यमिति पूर्वोत्तरग्रन्थार्थसिद्धोऽभिप्रायो ज्ञेयः॥७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परित्यज भयं भूप नोत्सृजामि निशामय ।
एनं शैलान्तरस्थानं लोकं धैर्येण सर्वतः ॥ ८२ ॥
अथ धैर्यं समालम्ब्य नृपः समवलोकयन् ।
अधो दूरे सनक्षत्रमभ्रमन्धतमोवृतम् ॥ ८३ ॥
प्रविश्य तं देशमपि ततोऽधस्तात् प्रपद्यत ।
चन्द्रमण्डलमास्फीतं तत्राऽऽगत्य जडीकृतः ॥ ८४ ॥
चन्द्रमण्डलशीतेन मुनिपुत्रेण रक्षितः ।
अथ प्राप्य सूर्यलोकं तत्करैरभितापितः ॥ ८५ ॥
मुनिपुत्रेण योगेन शिशिरीकृतदेहकः ।
अपश्यल्लोकमखिलं स्वलोकप्रतिविम्बवत् ॥ ८६ ॥
अथ शृङ्गे हेमगिरेर्मुनिना सह संस्थितः ।
मुनिप्रदर्शितं सर्वमपश्यत् पृथिवीपतिः ॥ ८७ ॥
देशान्तरावलोकाय मुनिदत्तशुभेक्षणः ।
अपश्यद्वलयात्मानं लोकालोकाख्यपर्वतम् ॥ ८८ ॥
तद्बहिर्ध्वान्तसन्दोहमन्तःसौवर्णमेदिनीम् ।
समुद्रान् सप्तद्वीपांश्च नदीगिरिसमाकुलान् ॥८९॥

विष्वक् परितः ॥ ८० ॥ ८१ ॥ निशामय पश्य । लोकं प्राणिसमुदायम् ॥ ८२ ॥ अथ मुनिवाक्यश्रवणानन्तरम् । अभ्रमाकाशम् । अन्धतमोवृतमिति । नक्षत्रलोकोपर्यन्धकारस्य सर्ववाह्यस्य विद्यमानत्वादिति भावः ॥ ८३ ॥ तं देशं नक्षत्रदेशम् ॥ ८४ ॥ ८५ ॥ प्रतिविम्बवत् स्थितम् ॥ ८६ ॥ ॥ ८७ ॥ दूरसान्तरयोर्देशयोरवलोकनायाशुभेक्षणोऽप्रतिहतनेत्रः ॥ ८८ ॥ तद्बहिः लोकालोकवहिरन्तः लोकालोका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवनान्यपि सर्वाणि चन्द्राद्यान् विबुधोत्तमान् ।
दैत्यान् मनुष्यान् रक्षांसि यक्षकिंपुरुषादिकान् ॥९०॥
तत्राऽपश्यत् सत्यलोके वैकुण्ठे राजते नगे ।
मुनिपुत्रं स्वमात्मानं ब्रह्म विष्णुशिवात्मना ॥ ९१ ॥
विभज्य संस्थितं सर्वलोकं सृष्ट्यादिहेतवे ।
अथोऽपश्यद् भूविभागे कृत्वा रूपान्तरं तथा ॥९२॥
प्रशासनपरो भूमेः सार्वभौमत्वमास्थितः ।
एवं मुनिकुमारस्य दृष्ट्वा योगर्द्धिमुत्तमम् ॥ ९३ ॥
विस्मितोऽभून्महासेनस्ततः प्राह मुनेः सुतः ।
राजन्नेतल्लोकजातं पश्यतः काल अत्यगात् ॥ ९४ ॥
अर्बुदानां द्वादशकमितोऽप्यत्र दिनात्मकः ।
गच्छावो बाह्यलोकं तं यत्रास्ते जनको मम ॥९५॥
इत्युक्त्वा भूभृता तेन सह भूयः समागतः ।
पूर्ववत्तं गण्डशैलान्निर्गत्याभ्याययौ बहिः ॥ ९६ ॥

इति श्रीम० ज्ञानखण्डे गण्डशैललोकावलोकने द्वादशोऽध्यायः ॥

न्तः ॥ ८९ ॥ ९० ॥ ९१ ॥ भूविभागे भूलोके ॥ ९२ ॥ यागर्द्धिं योगैश्वर्यम् ॥९३॥ ततः स्वलोकप्रदर्शनानन्तरम् ॥९४॥ बहिर्लोके द्वादशार्बुदवर्षमितोऽप्यत्र लोके एकदिनात्मकः ॥९५॥ भूभृता राज्ञा ॥ ९६ ॥

इति श्रीतात्पर्यदीपिकायां द्वादशोऽध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशोऽध्यायः ।

मुनिपुत्रः पुनः शैलान्महासेने विनिर्गते ।
विधाय मूर्छितं लिङ्गदेहं संस्कारमात्रकम् ॥१॥
समादाय विनिर्गत्य प्राक्षिपत्तच्छरीरके ।
उत्थापयामास तु तं जीर्णदेहसुसङ्गतम् ॥ २ ॥
अथोत्थितो महासेनो बाह्यलोकं समीक्ष्य तु ।
भुवं जनांस्तरून् स्रोतोहृदादींश्चापि नूतनान् ॥३॥
बभूव विस्मितोऽत्यन्तं पप्रच्छ मुनिनन्दनम् ।
कतमो वै महाभाग लोकोऽयं मे प्रदर्शितः ॥ ४ ॥
पुरादृष्टादपूर्वोऽयं समाचक्ष्वैतदद्भुतम् ।
इत्यापृष्टो मुनिसुतो महासेनमुवाच ह ॥ ५ ॥
शृणु राजन्नयं लोकः पूर्वं योऽस्माभिरास्थितः ।
स एव चिरकालेन परिणामान्तरं गतः ॥ ६ ॥

अत्राऽध्याये योधपद्यैः स्वप्नजागरयोः समा ।
स्थितिर्दृश्यं भावनैकसिद्धं चेति निरूप्यते ॥ १ ॥

स्थूलेन्द्रियाद्यभावात् सुषुप्ताविव संस्कारमात्रकम् ॥ १ ॥ शैलाद्विनिर्गत्य । तच्छरीरके प्राक् तृणकोटरन्यस्ते । तं राजानम् ॥ २ ॥ नूतनान् परिणामान्तरं गतान् ॥ ३ ॥ शैलान्तरे वेदं लोकान्तरमिति मत्वा पृच्छति–कतम इति । महान् भागो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शैललोकगतानां नो दिनमेकं यदत्यगात् ।
तावतैवाऽत्र कालेन द्वादशार्बुदवत्सराः ॥ ७ ॥
अतिक्रान्ता अतो लोकस्त्वयं रूपान्तरं गतः ।
भिन्नां व्यवहृतिं पश्य भाषां चापि समन्ततः ॥८॥
एवमेव जनानां तु कालेन भिद्यते स्थितिः ।
एवं मया तु बहुधा दृष्टा भिन्ना जगत्स्थितिः ।
पश्यैवमेष भगवान् समाहितमतिः पिता ।
सोऽयं देशो यत्र पूर्वं त्वया मे संस्तुतः पिता ॥१०॥
एनं पश्य महाशैलं यत्र मे लोक ईक्षितः ।
त्वद्भ्रातुर्वंशपुरुषा अतिक्रान्ताः सहस्रशः ॥ ११ ॥
यत्ते परं वङ्गदेशे सुन्दराख्यं स्थितं पुरा ।
तत्राऽभूत् सम्प्रति वनं व्याप्तं श्वापदमण्डलैः ॥१२॥
त्वद्भ्रातुर्वंशजः सद्यो वीरबाहुरिति श्रुतः ।
मालवेशो विशालाख्ये क्षिप्रातीरे पुरेऽस्ति हि॥१३॥
तद्वंश्योऽपि सुशर्माख्यो द्राविडेष्वभवन्नृपः ।
वर्द्धने नाम नगरे ताम्रपर्णीसरित्तटे ॥ १४ ॥
लोकस्थितिरियं चेत्थं सर्वदा परिवर्त्तते ।
अल्पकालेनैवमेतद्भवन्नूतनं जगत् ॥ १५ ॥
इतोऽपि चिरकालेन नगा नद्यो ह्रदा भुवः ।

भाष्यं योगसम्पद्यस्य ॥ ४ ॥ ५ ॥ ६ ॥ कुतः परिणामान्तरं गत इति चेदाह–शैलेति ॥ ७ ॥ अतः बहुकालात्ययात् ॥ ८ ॥ ॥ ९ ॥ १० ॥ ११ ॥ तत्र तत्प्रदेशे ॥ १२ ॥ १३ ॥ १४ ॥ परिवर्त्तते परिणामान्तरं प्राप्नोति ॥ १५ ॥ इतोऽपि द्वाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथाभावमायान्ति एवमेव जगद्गतिः ॥ १६ ॥
गिरयो निम्नतां यान्ति निम्नदेशा महोच्चताम् ।
मरुदेशास्त्वनूपाः स्युः पर्वता वालुकामयाः ॥१७॥
कठिना भूः शिलाप्राया भवेदत्यन्तकोमला ।
कोमला भूरपि भवेत् पाषाणसदृशी क्वचित् ॥१८॥
ऊषरा भूरुर्वरा स्यादुर्वरोषररूपिणी ।
रत्नानि कर्कराः स्युश्च रत्नात्मानस्तु शर्कराः ॥ १९ ॥
क्षारं जलं स्वादुरसं मधुरं क्षारतां गतम् ।
कदाचिन्नरबाहुल्यं कदाचित पशुमञ्चयम् ॥ २० ॥
कदाचित् कृमिकीटादिप्रचुरं जगदीक्षितम् ।
एवमेतज्जगत कालभेदात् परिणतं पृथक् ॥२१॥
तस्मादयं पुराऽस्माकं लोक एवेदृशः स्थितः ।
इत्याकर्ण्य मुनिसुतवाक्यं स च महीपतिः ॥२२॥
महासेनोऽत्यन्तशोकाविष्टो मूर्च्छामुपागतः ।
मुनिपुत्रसमारब्धस्तः प्रज्ञामासाद्य भूपतिः ॥ २३ ॥
अत्यन्तशोकसंविष्टो विललाप सुदीनवत् ।
भ्रातरं भ्रातृपुत्रांश्च दारान् स्वात्मन एव च ॥२४॥

शार्बुदसङ्ख्यपातकालादपि । नगाः पर्वताः ॥ १६ ॥ एतदेवाह–गिरय इति । गिरयोऽत्युच्चपर्वताः । अनूपाः उदकप्रचुराः ॥ १७ ॥ १८ ॥ उर्वरा शस्यवती ॥ १९ ॥ २० ॥ परिणतं भवतीति शेषः ॥ २१ ॥ तस्मात् परिणामान्तरप्राप्तेः ईदृशः अपूर्ववत् ॥ २२ ॥ २३ ॥ स्वात्मनोऽपि पुत्रादीनिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रादींश्च पृथक् स्मृत्वा विललापाऽतिदुःखितः ।
अथ तं मोहतो भ्रातृमुखान् शोचन्तमञ्जसा ॥२६॥
मुनिपुत्रो वचः प्राह बुबोधयिषया नृपम् ।
राजंस्त्वं बुद्धिमान्नूनं तत्किमर्थं हि शोचसि ॥
बुद्धिमन्तो हि विफलं जातु कुर्वन्ति कर्म नो ।
अविमृश्य फलं यस्तु कर्म कुर्यात् स बालिशः ॥२७॥
तत्त्वं शोचसि कं ब्रूहि किमर्थं वा हि शोचनम् ।
इत्युक्तः प्राह तं भूपो महासेनोऽतिदुःखितः ॥ २८ ॥
किं न पश्यसि शोकस्य स्थानं मम महामुने ! ॥
सर्वं यस्य हृतं तस्य कारणं पृच्छसीह किम् ॥ २९ ॥
एकस्मिन्नपि शोकःस्याद्धते लोकस्य सर्वथा ।
कुतस्त्वं पृच्छसि पुनः सर्वनाशे ह्युपस्थिते ॥ ३० ॥
इत्युक्तो मुनिपुत्रोऽपि भूयः प्राह हसन्निव ।
राजन् ब्रूहि किमेतत्ते कुलधर्मः सनातनः ॥ ३१ ॥
यच्छोचनमकृत्वा तु प्रत्यवायो महान् भवेत् ।
अथवा शोचिते नष्टं प्राप्यते भूय एव तत् ॥ ३२ ॥

सम्बन्धः ॥ २४ ॥ तं राजानम् ॥ २५ ॥ बुबोधयिषया बोधयितुमिच्छया ॥ २६ ॥ शोचितस्य फलं कुतः पृच्छसीति चेदाह—बुद्धिमन्त इति । फलं किञ्चित् स्यादेवेति चेदाह—अविमृश्येति ॥ २७ ॥ तत् तस्मात् ॥ २८ ॥ २९ ॥ शोकस्य कारणं कुतः पृच्छसि मम सर्वनाशप्राप्तौ ॥ ३० ॥ एतत् स्वजने नष्टं शोचितव्यमिति । सनातनः परम्परागतः ॥ ३१ ॥ यस्मात् कुलधर्माकरणे प्रत्यवापो भवेदतः शोचसि किम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजन् विमृश धैर्येण शोचिते किं फलं भवेत् ।
नष्टेषु बन्धुषु यदि शोचितव्यं तदा शृणु ॥ ३३ ॥
अतीता बन्धवो नष्टाः पितामहमुखाः खलु ।
तत् सर्वदा शोचितव्यं कुतः सर्वं न शोचितम् ॥३४॥
अथ ते बन्धवः कस्य बन्धुत्वं वा कुतस्तव ।
मातापित्रोः स्वस्य वाऽपि पुरीषकृमयो हि ये ॥ ३५ ॥
असङ्ख्याताः स्वदेहोत्था देहसम्बन्धिनोऽपि च ।
न ते स्युर्बन्धवः कस्मात् कुतो वा ते न शोचिताः ३६॥
राजन् विमृश कस्त्वं वै कान् विनष्टान् प्रशोचसि ।
देहस्त्वं देहभिन्नो वा देहः सङ्घातरूपकः ॥ ३७ ॥
सङ्घातस्यैकदेशस्य वा नाशान्नाश उच्यते ।
प्रतिक्षणं त्वेकदेशनाशो देहस्य भावितः ॥ ३८ ॥

तव नष्टम् ॥ ३२ ॥ नष्टं न प्राप्यते किं तु शिष्टाचारत्वाच्छोचितस्य सफलत्वमिति चेदाह–विमृशेति । लोके शोचद्भिः किं फलं प्राप्तं यत् मम भवेदिति विमृशेत्यर्थः । फलं नास्त्यपि तु कुलधर्म एवेतिचेदाह–शृण्विति ॥ ३३ ॥ सर्वदेति । अनन्तानां बन्धूनां मृतत्वेन तच्छोचनसम्मितं तवाऽऽयुरेव न भवेदिति तात्पर्यम् ॥ ३४ ॥ ते भ्रात्रादयः । तद्बन्धुत्वं तव कुतो हेतोः । एकगर्भवासादिना भ्रात्रादिबन्धुत्वं ममेति चेदाह–मातेति ॥ ३५ ॥ ३६ ॥ देह एवाहमिति चेदाह–देहः सङ्घातरूपक इति ॥ ३७ ॥ सङ्घातरूपदेह एवाऽहं नष्टान् देहात्मकान् बन्धूनेव शोचामीति चेदाह–सङ्घातस्येति । किं बन्धुनाशः समग्रसङ्घातनाशे उत तदेकदेशनाशे वा त्वयोच्यते इति विकल्प्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूत्रोच्चारश्लेष्मनखकेशादेः सन्ततं च यः ।
सर्वात्मना तु सङ्घातनाशो न हि विभाव्यते ॥३९॥
भ्रात्रादेस्तव देहांशः स्यात् पृथिव्यादिषु स्फुटम् ।
अन्ततो देहगगनमविनाश्यस्ति केवलम् ॥ ४० ॥
न त्वं देहः किं तु देही मद्देह इति भाषसे ।
यथा मद्वस्त्रमित्येवं स देहस्त्वं कथं वद ॥ ४१ ॥
यदि त्वं देहाभिन्नोऽसि सम्बन्धः कोऽन्यदेहकैः ।

द्वितो दूषणमाह—प्रतिक्षणमिति ॥ ३८ ॥ कुतः प्रतिक्षणं नाश इति चेदाह—मूत्रेति । उच्चारो विट् । यतः सन्ततं क्षयो दृश्यते अतः प्रतिक्षणं नाशः सिद्धः । प्रथमपक्षं दूषयति—सर्वेति । सङ्घातस्य सर्वात्मना समग्ररूपेण ॥ ३९ ॥ कुत इति चेदाह—भ्रात्रादेरिति । पृथिव्यादिरूपदेहांशः स्यादेवेति स्फुटं सर्वानुभवसिद्धम् । देहपृथिव्याद्यंशो नष्ट एव स्यादिति चेदाह—अन्तत इति । देहांशपृथिव्यादिनाशाङ्गीकारेऽपि अन्ततः पर्यवसानेऽविनाशिनो गगनस्य केवलस्य शुद्धस्य नाशो दुरुपपाद इत्यर्थः॥४०॥ अथ च तव महानयं व्यामोह इत्याह—न त्वमिति । देहसम्बन्धी देहादन्य एवेत्यर्थः । कुत इति चेदाह—मद्देह इति । यतो मद्देह इति भाषसे । ननु मद्देह इति भाषणेन किं जातमिति चेदाह—यथेति । मद्वस्त्रमित्यादिमत्प्रत्ययविषयवस्त्राद्यं यथा त्वं न भवसि तत्प्रत्ययविषयदेहोऽपि त्वं न । एवं सति कथं स देहस्त्वमित्यर्थः ॥ ४१ ॥ इति श्रुत्वा सत्यमहं देहभिन्नोऽस्मीति वदन्तं प्रत्याह—यदीति। देहभिन्नस्यापि मे भ्रात्रादिदेहैः कुतो न सम्बन्ध इति चेदाह—यथेति । यथा भ्रात्रादिवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा भ्रात्रादिवासोभिर्नास्ति सम्बन्धलेशकः ॥४२॥
अविशेषात्तच्छरीरैर्विनष्टैस्तैः कथं शुचा ।
मच्छरीरं मदक्षाणि मत्प्राणो मन्मनास्त्विति ॥४३॥
वदन् भवान् किंस्वरूपो वद मे पृच्छते नृप ! ।
एवमुक्तो महासेनो मुहूर्तं सुविचार्य तु ॥ ४४ ॥
अप्राप्य तं मुनेः प्रश्ने प्राह दीनतरस्ततः ।
न जाने भगवन् कोऽहमिति सर्वात्मनाऽप्यहम् ॥४५॥
स्वभावतस्तु शोचामि कारणं तत्र नाविदम् ।
प्रपन्नस्त्वामहं दीनः किमिदं भगवन् वद ॥४६॥
सर्वे शोचन्ति यत् कस्मिन्नपि बन्धौ मृते सति ।

सोभिस्तव सम्बन्धो नास्ति ॥ ४२ ॥ अविशेषादिति । शरीरवस्त्रयोर्ममत्वस्य तुल्यत्वाद् भ्रात्रादिवस्त्रनाशे शोकाभावाद्वस्त्रतुल्यदेहनाशे कथं शुचा शोक इत्यर्थः । अथ च मच्छरीरमित्यादि वदतः शरीरादिभिन्नस्य ते किं रूपमिति पृच्छति—मच्छरीरमिति । अक्षाणीन्द्रियाणि ॥ ४३ ॥ एवं कस्त्वमित्यादि ॥ ४४ ॥ अन्तं निश्चयम् । दीनतर इति । बन्धुनाशेन दीनः स्वात्मानमविदन्नात्मनाशमपि प्राप्त इव दीनतर इत्यर्थः । ततः प्राहेत्यन्वयः । सर्वात्मना विचारपरोऽप्यहं न जाने ॥४५॥ शोचनेऽपि निमित्तमविदन्नाह—स्वभावत इति । यथा क्षुधातृषादिकं अदृष्टहेतुकमेवं मम शोकोऽपीति भावः । हतबन्धुः प्रायो हतात्माहं दीनस्त्वां प्रपन्नः । अतः किमिदं शोकादिकं सकारणमुत निष्कारणं वेति वद ॥ ४६ ॥ किमिदमिति सामान्यतः पृष्टमेव विवृणोति—सर्व इति । कस्मिन्नपि बन्धौ मृते सति सर्वे शोच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न स्वात्मानं विजानन्ति नाऽन्यं शोचन्ति चैव हि॥४७॥
एतन्मे ब्रूहि भगवन् शिष्याय तव वै स्फुटम्।
इति पृष्टो मुनिसुतो महासेनमथाऽब्रवीत् ॥४८॥
राजन् शृणु महादेव्या मायया मोहिता जनाः।
स्वात्मानमविदित्वैव व्यर्थं शोचन्ति सर्वदा ॥४९॥
यावन्न विदितं स्वात्मसतत्त्वं तावदेव वै।
जनाः शोचन्ति विज्ञाय भूयः शोचन्ति न क्वचित्॥५०॥
यथा निद्रामोहितात्मा स्वमविज्ञाय शोचति।
ऐन्द्रजालिकमन्त्रोत्थमायया मोहितो नरः ॥५१॥

न्तीति यत्तत् कुत इति शेषः ॥ ४७ ॥ एतत् मृतबन्धुशोचनादिनिमित्तम्। तव शिष्याय मे। अथ प्रश्नानन्तरम् ॥४८॥ त्रिपुरामायया मोहितत्वेनाऽऽत्मानमविदित्वा शोचन्तीत्याह-राजन्निति। तथा च शोके आत्माऽज्ञानं हेतुरात्माऽज्ञाने च चिदात्मन ईश्वरस्य मायाख्यं स्वातन्त्र्यमेव हेतुरित्युक्तं भवति। औपनिषदमतेऽपि मूलाज्ञानं भगवच्छक्तिर्माया तदंशत्वात्तद्धेतुकत्वं जीवावरकतूलाज्ञानस्येति ज्ञेयम् ॥ ४९ ॥ एवमज्ञानस्याऽखिलानर्थहेतुत्वमुक्त्वा तन्निवर्तकमात्मविज्ञानमेवेत्याह-यावदिति। सतत्त्वं स्वरूपम्। भूयः पुनः विज्ञानानन्तरं पूर्ववन्न शोचन्तीति भावः ॥ ५० ॥ अत्र दृष्टान्तमाह-यथेति। स्वमात्मानं पर्यङ्के सुप्तमविज्ञाय स्वप्ने क्वचिन्मार्गे स्वाप्नचोराद्यैर्हृतसर्वस्वः शोचति। एवमैन्द्रजालिकमायया मोहितः मोहितमात्मानमज्ञात्वा तन्निर्मितसर्पादिभीत्या शोचतीत्यन्वयः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रकल्पितसर्पादिभीत्या यद्वद्धि शोचति ।
तथैव मायया मुग्धः स्वमज्ञात्वा प्रशोचति ॥५२॥
यथा स्वप्नात् प्रबुद्धो वा ज्ञातैन्द्रजालिकागमः ।
न शोचति कचिच्चान्यान् शुचा युक्तान् हसत्यपि५३॥
एवं स्वात्मविदो मायामुक्ताः शोचन्ति न कचित् ।
शोचतस्त्वादृशान् मायामूढान् प्रविहसन्ति च॥५४॥
तत्त्वं विज्ञायात्मतत्त्वं मायामुत्तीर्य दुर्गमाम् ।
जहि शोकं महाबाहो! मोहोत्थं सद्विमर्शनात् ॥५५॥
इत्युक्तः पुनरप्याह महासेनो मुनीश्वरम् ।
भगवन् यस्त्वया प्रोक्तो दृष्टान्तो विषमः स हि ॥५६॥
स्वाप्नो वा मायिको वाऽपि शून्यात्मा भासते परम् ।
अयं जाग्रत्प्रपञ्चस्तु सत्यः सर्वार्थसाधकः ॥ ५७ ॥

मुग्धो मूढः स्वमात्मानम् ॥ ५२ ॥ ज्ञानिनः शोको नास्तीत्यत्र दृष्टान्तमाह—यथेति । यथा स्वप्नात् प्रबुद्धः सन् पर्यङ्कस्थमात्मानं विदन् चोराद्यैः सर्वस्वहरणं वितथं मत्वा शोकमवधूय भूयस्तन्निमित्तं न शोचति । अन्यान् तथा शोचतो हसत्यपि । ऐन्द्रजालिकस्यागमो मन्त्रः स मोहको ममेति ज्ञातो येन ॥ ५३ ॥ दार्ष्टान्तिके योजयति—एवमिति ॥ ५४ ॥ तत् तस्मात् शोकस्याऽज्ञानमूलत्वादित्यर्थः । त्वमात्मतत्त्वं विज्ञाय मायामज्ञानरूपेण परिणतां दुर्गमामतिक्रम्य गन्तुमन्यैरशक्यामुत्तीर्य मायाऽऽवरणान्निर्गत्य सत आत्मतत्त्वस्य विमर्शनाद् भूयोऽनुसन्धानाद् जहि ॥ ५५ ॥ दृष्टान्तः स्वप्नेन्द्रजालादिरूपः ॥ ५६ ॥ वैषम्यमेवोपपादयति—स्वाप्न इति । मायिकः ऐन्द्रजालिकेनोद्भावितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अबाधितः स्थिरश्चापि कथं स्वाप्नसमो भवेत् ।
इत्युक्तः पुनराचख्यौ मुनिपुत्रोऽतिबुद्धिमान् ॥ ५८ ॥
शृणु राजन् ! यत्त्वयोक्तं दृष्टान्तो विषमस्त्विह ।
एष मोहो द्वितीयस्ते स्वप्ने स्वाप्नस्य यादृशः ॥ ५९ ॥
स्वाप्नवृक्षोऽपि तत्काले किं न साधयते हितम् ।
पान्थानां किं न हरति तापं छायाप्रदानतः ॥ ६० ॥
फलाद्यैः स्वाप्नमर्त्यादीन्न तर्पयति किं वद ।
स्वप्ने क्व बाधितः स्वाप्नः क्व स्थिरश्चोपलक्षितः ॥६१॥

चोरसर्पादिः । शून्यात्मा असद्रूपः । परं केवलं भास एव तद्भासनं वस्त्वविषयमिति तात्पर्यम् । अयमिति सर्वानुभवसिद्ध इत्यर्थः । सर्वार्थसाधकत्वेन सर्वानुभवसिद्धत्वात् सत्य इत्यर्थः ॥ ५७ ॥ अबाधित इति । सर्वार्थसाधकत्वेनाऽबाधितत्वेन स्थिरत्वेन च सर्वानुभवसिद्धत्वाज्जाग्रत्प्रपञ्चः सत्यः एतद्विपरीतत्वात् स्वाप्नादिप्रपञ्चोऽसत्य इति भावः ॥ ५८ ॥ एष इति । दृष्टान्तो विषम इति । निश्चय इत्यर्थः । द्वितीय इति । दृश्यं द्रष्टुर्विभिन्नं सत्यात्मकमस्तीत्याद्यो मोहः समः । तत्र दृश्येषु स्माप्नादिरसत्य इति द्वितीयो भ्रमः । स्वप्नदशायां स्वाप्नपुरुषस्य रज्जौ सर्पभ्रमसदृश इत्यर्थः ॥ ५९ ॥ जाग्रत्प्रपञ्चवत् स्वाप्नस्यापि सर्वार्थसाधकत्वादिकं त्वदुक्तहेतुत्रयमस्तीत्युदाहरति—स्वाप्नेति । तत्काले स्वप्नकाले । यथा जाग्रद्वृक्षो जाग्रति अर्थसाधकोऽबाधितः स्थिरश्चैवं स्वाप्नवृक्षोऽपि च प्रभातकाले सर्वार्थसाधकोऽबाधितः स्थिरश्चेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अखिलं बाधितं जाग्रद्दशायामिति चेच्छृणु ।
जाग्रत्प्रपञ्चोऽपि सर्वः सुषुप्तौ किं न बाधितः ॥६२॥
न बाधितः परदिनेऽप्यनुवृत्तेस्तथेति चेत् ।
स्वाप्नस्यापि परदिने नाऽनुवृत्तिः क्व वा वद ॥ ६३ ॥
नाऽनुवृत्तिर्भाति स्वप्ने इति चेन्नृपते ! शृणु ।
जाग्रत्यपि क्वानुवृत्तिभासो नव्याऽवभासके ॥ ६४ ॥
नव्येऽनुवृत्त्यभानेऽपि भात्यन्यत्रेति चेच्छृणु ।
तथा स्वप्नेऽपि भात्येवाऽनुवृत्तिः स्थिरभासने ॥ ६५ ॥
मृषानुवृत्तिस्तत्रेति चेज्जाग्रत्यपि सा तथा ।
सूक्ष्मबुद्ध्या विमृश तद्वस्तु जाग्रति संस्थितम् ॥६६॥

॥ ६० ॥ ६१ ॥ अखिलमिति । स्वाप्नवृत्ताद्यखिलं जाग्रदवभासनाद्बाधितमिति चेज्जाग्रत्प्रपञ्चोऽपि सुषुप्तावभासनाद्बाधित इत्याह—जाग्रत्प्रपञ्चोऽपीति ॥ ६२ ॥ ननु बाधो नाम नाऽनवभासनं किं तूत्तरकालसम्बन्धरूपानुवृत्त्याद्यनुसन्धानहेतुताऽनुवृत्तिसत्त्वान्न बाधते न इत्याशङ्क्ते—न बाधित इति । तथा स्वप्नवन्न बाधित इति चेदित्यन्वयः । स्वाप्नस्याप्येतत्तुल्यमित्याह—स्वाप्नस्येति ॥ ६३ ॥ स्वाप्नस्याऽनुवृत्तिर्नानुभूयत इति यज्जाग्रत्यपि तुल्यमित्याह—जाग्रतीति । कुत एतदिति चेदसम्भवादित्यभिप्रायेणाह—नव्यावभासके इति । जाग्रति हि प्रतिक्षणं वस्तु नव्यमवभासते । एवं सति कथमनुवृत्तिसम्भव इति भावः ॥ ६४ ॥ ननु क्रियादिक्षणिकभावानां नव्यानामननुवृत्तावपि अन्येषां पृथ्वीगिरिसमुद्रादीनामनुवृत्तिरानिवार्यैवेति चेदेतच्च स्वप्नेऽपि तुल्यमित्याह—तथेति । स्थिरभासने इति । स्थिरं वर्षादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहवृक्षनदीदीपादिकं क्षणविभेदितम् ।
कथं तदनुवृत्तिर्वै भवेदावितथात्मिका ॥ ६७ ॥
अचलानामपि न हि द्वितीयक्षणसङ्गतम् ।
रूपमस्ति सर्वदैव निर्झरैर्भेदितात्मनाम् ॥ ६८ ॥
मूषकैरुपदीकाभिः शूकरैर्निर्झरादिभिः ।
सर्वतस्तु विभिद्यन्ते पर्वताः सर्वदैव हि ॥ ६९ ॥
पर्वता बुद्धिमुख्या अप्येवं क्षणभेदिनः ।
अथ ते सम्प्रवक्ष्यामि पश्य सूक्ष्मधिया नृप ! ॥ ७० ॥

रूपाचिरकालस्थायिभासनं यस्य स्वप्नस्य । दीर्घस्वप्ने पुत्रकलत्रादीनामनुवृत्तेः सर्वानुभवसिद्धत्वादिति भावः ॥ ६५ ॥ स्वाप्नपुत्रकलत्रादीनामसत्त्वेन तदनुवृत्तिभासनं भ्रमरूपमिति चेत्तुल्यमेतत्तवापि इत्याह–जाग्रतीति । सा अनुवृत्तिः । तथा मृषेत्यर्थः । जाग्रत्यप्यनुवृत्तिभासनं भ्रमरूपमेवेति भावः । कथमेतत् प्रत्येयमिति चेदाह–सूक्ष्मेति । अन्धपरम्परागतस्थिरत्वाभिमानवर्जितबुद्ध्येति भावः ॥ ६६ ॥ देहेति । आदिना मेघमण्डलादि । देहादीनां सर्वैः सुस्पष्टं क्षणिकत्वेन ज्ञानानां कथमनुवृत्तिरवितथा भवेदित्यर्थः ॥ ६७ ॥ ननु देहादेरनुवृत्त्यभावेऽपि पर्वतादीनामनुवृत्तिः सम्भवेदिति चेदाह–अचलानामिति । क्षणिकत्वानिर्वाहकविशेषणम् । निर्झरैरिति । अनवरतं निर्झरैर्भिद्यमानानां द्वितीयक्षणसङ्गतं रूपं नाचलानामस्तीत्यर्थः ॥ ६८ ॥ ननु निर्झराणां पर्वतभेदकत्वं न ग्रीष्मादिष्विति चेदाह–मूषकैरित्यादि । उपदीकाः येषां लालासम्बन्धेन काष्ठादि सूचिकात्वमापद्यते ते कृमिविशेषाः । आदिना वनगजादयः॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिच्छिन्नाऽनुवृत्तिर्हि समैव स्वाप्नजाग्रतोः ।
अपरिच्छिन्नाऽनुवृत्तिः कार्येष्वत्यन्तदुर्लभा ॥ ७१ ॥
अनुवृत्तिः कारणेन रूपेणास्ति हि सर्वदा ।
इति तत्कारणं रूपं पृथिव्यादिमयं किल ॥ ७२ ॥
तच्चाऽनुवृत्तस्वप्नेऽपि पृथिव्यादेर्हि भासनात् ।
अथ स्वाप्नस्य बाधो हि जाग्रति ह्यनुभूयते ॥ ७३ ॥

भूर्भूमीति। पर्वतानां बुद्धिभुवो मुख्यानां स्थिरत्वेनाभिमतानां येषां देवलोकादीनां अम्बुधेर्नदीतांपामिलनाद् भुवो नद्यादिभिर्भेदनात् क्षणिकत्वम् । प्रकारान्तरेण जाग्रत्स्वप्नभावयोरनुवृत्तिसाम्यं वक्तुमाह–अथेति । पश्य विचारय ॥ ७० ॥ परिच्छिन्नेति । जाग्रद्भावस्यानुवृत्तिः कालपरिच्छिन्ना न वा ? आद्ये परिच्छिन्नानुवृत्तिः स्वाप्नजाग्रतोः समैव । द्वितीये दृश्यत्वेन कार्यात्मना सिद्धजाग्रद्भावस्याऽपरिच्छिन्नाऽनुवृत्तिर्दुर्लभैवेत्यर्थः ॥ ७१ ॥ ननु कार्यस्य कारणादत्यन्तभिन्नत्वमारम्भवाद्यभ्युपगतं तत्र हि प्रोक्तदोषावकाशो भवेत् । परिणामवादाश्रये तु न कोऽपि दोषः । जाग्रद्भावस्य कार्यरूपेण व्यावृत्तावपि कारणरूपेणाऽनुवृत्तेरित्याशङ्क्य समाधातुमाह–इति चेदिति । पृथिव्यादीति । कारणरूपपृथिव्यादिमयं भौतिकानां महाभूतकार्यत्वात् । यद्वा पृथिव्यादिमयं पृथिव्यादिनिखिलकार्यप्रचुरं प्रधानतत्त्वमित्यर्थः । कार्यमात्रस्य कारणे सूक्ष्मरूपेणाऽवस्थानादिति भावः ॥ ७२ ॥ एवमपि स्वाप्नभावानां तुल्यतेत्याह–तच्चेति । कारणरूपमित्यर्थः । स्वप्नेऽपि प्रत्यहं पृथिव्यादिकारणरूपस्य भासमानत्वादनुवृत्तिरस्तीत्याह–अनुवृत्तमिति । यद्वा पृथिवीति कार्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न जागरस्य बाधस्तु भासते कस्यचित् क्वचित् ।
इति चेच्छृणु वक्ष्यामि बाधो ह्यनवभासनम् ॥ ७४ ॥
सुषुप्तौ सर्वजगतोऽप्यनुभूतं ह्यभासनम् ।
अथ बाधो ह्यप्रमाणदर्शनं चेत्तदा शृणु ॥ ७५ ॥
अप्रमात्वदृशी नास्ति भ्रान्तानां त्वदृशां खलु ।
ज्ञातविज्ञेयतत्त्वानामप्रामाण्यदृशिः स्फुटा ॥ ७६ ॥

पलक्षकम् । तथा च पृथिव्यादिकार्यस्यादिभूतं कारणं यत् प्रधानं तस्य सुखदुःखमोहात्मकगुणत्रयमयस्य स्वप्ने भासमानादिति । प्रकारान्तरेण पुनराशङ्कते—अथेति स्वाप्नभावानां बाधो जाग्रति सर्वैरनुभूयत इत्यर्थः ॥ ७३ ॥ न जागरस्येति । जागरभावस्य बाधस्तु न क्वचिदवस्थायां कस्यचित् प्रमातुर्भासत इत्यर्थः । समाधत्ते—शृणिवति । अनवभासनमिति । अवभासनाऽभाव इत्यर्थः । यद्यपि इदं रजतमित्यादौ नेदं रजतमित्यादिर्यदिविपरीतग्रह एव बाधत इत्युच्यते । तथाऽप्यवभासमानमेव सदिति नियमादनवभासनस्याऽसत्यानियमाच्चाऽनवभासनमेवाऽसत्त्वप्रयोजकमिति बाध इत्युच्यते इति ज्ञेयम् ॥ ७४ ॥ सुषुप्ताविति । अविशेषेण सर्वस्य जगतोऽनवभासनसर्वाऽनुभूतबाधो भवत्येवेत्यर्थः । ननु न ह्यनवभासनं बाधः घटाऽवभासनप्राक्कालिकघटाऽनवभासनस्य बाधत्वप्रसक्तेः । किन्त्वन्यदेवेत्याह—अथेति । अप्रमाणदर्शनमिति । अप्रमाणमिति भावप्रधानो निर्देशः । अप्रामाण्यदर्शनं बाध इत्यर्थः । प्रबुद्धस्य स्वाप्नदर्शने नेदं प्रमाणमिति ज्ञानं सार्वजनीनमेतदेव बाधः । न ह्येवंविधबाधो जाग्रत्यस्तीति भावः ॥ ७५ ॥ यथा हि स्वाप्नप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिदं दृश्यजालं स्वाप्नदृश्यसमस्थिति ।
दीर्घकालोऽपि च स्वप्ने भासते निर्विशेषतः ॥ ७७ ॥
तस्मादबाधितो ह्यर्थक्रियाकारी स्थिरोऽपि च ।
स्वाप्नभावस्तेन तुल्यो जाग्रद्भावोऽपि सर्वशः ॥ ७८ ॥
यथा जाग्रति जाग्रत्त्वं गृहीतं जागरे स्फुटम् ।
स्वप्नेऽपि जागरत्वं तु गृहीतं तद्वदेव हि ॥ ७९ ॥

मातुः स्वाप्नेष्वप्रामाण्यदर्शनं नास्ति, एवमज्ञातज्ञेयतत्त्वानामेव जाग्रत्यप्रामाण्यदर्शनं नास्तीत्याह—अप्रमाणेति । जाग्रत्यप्रमाणदृशिः । "ज्ञेयस्य तु परं तत्त्वं चितिरेव न चेतरत्" । इति नीत्या ज्ञातविज्ञेयतत्त्वानां जाग्रति स्फुटाऽप्रमाणदृशिः ॥ ७६ ॥ तस्मादिति । स्वाप्नभावानामर्थक्रियादिसत्त्वेनाऽवैषम्यादित्यर्थः । ननु जाग्रद्भावो दीर्घकालो भासते न तु स्वाप्न इति चेदाह—दीर्घकाल इति । निर्विशेषत इति । जाग्रत्कालवदविशेषादसत इत्यर्थः ॥ ७७ ॥ तस्मादिति । प्रोक्तदिशा वैषम्याऽभावादित्यर्थः । स्वस्वकालेऽबाधितत्वादेः सत्त्वात् स्वाप्नजाग्रद्भावयोः सर्वांशेन तुल्यत्वमिति भावः ॥ ७८ ॥ नन्वेवमपि जाग्रतो जाग्रत्त्वंत्विनैवं स्वप्नस्य जाग्रत्त्वं भातीत्यस्ति वैषम्यमित्याशङ्क्य परिहरति—यथेति । अथ जाग्रति स्वाप्नाऽनुसन्धानं स्वाप्नस्य स्वाप्नत्वग्रहः नैवं स्वप्ने जागरानुसन्धानादिरित्यस्ति वैषम्यमिति चेत् सत्यम्, आपातदर्शिनामस्त्येव वैषम्यम् । सम्यग्दर्शिनां तु न तल्लेशोऽपि । तथा हि स्वप्ने किमखिलजाग्रदनुसन्धानं नास्ति, उत यत्किञ्चिज्जाग्रदनुसन्धानं नास्तीत्युच्यते । उभयथाऽपि न दोषः । जाग्रत्यपि निखिलस्वप्नानुसन्धानस्य यत्किञ्चित्तदनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं स्थिते कुतो राजन् विशेषः स्वप्नजाग्रतोः ।
तत्स्वाप्नान्निजबन्धूंस्त्वं न हि शोचसि वै कुतः ॥८०॥
केवलं भावनामात्रात् सत्यता जगति स्थिता ।
शून्यताभावनेनाऽपि शून्यं निष्प्रतिघं भवेत् ॥८१॥
भावना ह्यप्रमाणत्ववैधुर्येण स्थिरीकृता ।
भवेत्तदात्मभावेन सत्यमेतन्महीपते ! ॥ ८२ ॥

सन्धानस्य वाऽभावः सर्वानुभवसिद्ध एव । न च यत् किञ्चित्स्वप्नानुसन्धानमस्ति जाग्रति नैवं स्वप्ने इति वाच्यम् । अनुसन्धानं हि स्मृतिः । तथा च पूर्वदिनेऽनेन मयेत्थं भाषितमित्यादि जाग्रद्व्यवहारस्मृतेरानुभविकत्वात् । एवं स्वप्ने सेयं जाग्रदासीदिति जागरस्य जाग्रत्त्वग्रहादिकं सर्वमप्रतिहतमेवेति सूक्ष्मविमर्शिभिर्ज्ञेयम् ॥ ७९ ॥ सर्वसाम्ये स्थिते । तत् तस्मात् स्वाप्नजाग्रतोरविशेषात् ॥ ८० ॥ नन्वेवं स्वाप्नजाग्रतोः साम्ये सर्वेषां जगति सत्यताभासनं कुत इति चेदाह–केवलमिति । सत्यं जगदिति भावनानुसन्धानं तन्मात्रात् । तदेकनिमित्ता सत्यतेत्यर्थः । केवलमिति । असत्यमिति । विपरीतभावनानन्तरितमित्यर्थः । स्थिता दृश्यत इति शेषः । अत एव शून्यत्वभावने इदमेव जगत् शून्यमभावप्रत्ययविषयं भवेत् । निष्प्रतिघमाकाशवदप्रतिरोधकं च ॥ ८१ ॥ ननु मया सम्प्रति शून्यत्वेन भाव्यमानमपि जगत् कुतो न शून्यात्मतां यातीत्याशङ्क्ते–भावनाऽसिद्धा तस्मान्न शून्यात्मतासम्पत्तिरिति वक्तुं भावनायाः सिद्धप्रकारमाह–भावनेति । भावना इदमीदृगिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निदर्शनं त्वत्र चेदं यज्जगद् दृष्टमेव ते ।
इमं शैलं परिक्रम्य यौ हि पश्याव सम्प्रति ॥ ८३ ॥
इत्युक्त्वा नृपतिं हस्ते गृहीत्वा परिचक्रमे ।
परिक्रम्य गण्डशैलं राज्ञा सह समेत्य तु ॥ ८४ ॥
पुनः प्राह महासेनं मेधावी मुनिनन्दनः ।
राजन् ! दृष्ट एष शैलः पादगव्यूतिमात्रकः ॥ ८५ ॥
दृष्ट एवास्य गर्भे ते लोकः सुवितत: स्फुटः ।
एष जाग्रदुत स्वप्नः सत्यो मिथ्यात्मकोऽपि वा॥८६॥
शैललोके यद्दिनैकं तदत्र द्वादशाऽर्बुदाः ।

प्रत्ययसन्तानः । तस्याः स्थैर्यमेव सिद्धिः । स्थैर्यं चाप्रमाणत्व-निश्चयेनोन्मूलनाभावः । यथा शुक्ताविदं रजतमिति भावने नेदं रजतमितिज्ञानेनाऽप्रमाणत्वेन निश्चिते उन्मूलिता भवति च्छिन्नसन्ताना भवति । सेयं भावना असिद्धा । या तु अप्रामा-ण्यनिश्चयवैधुर्येण स्थिरीकृता अनुन्मूलिता स्यात्तदा तदात्म-भावेन भावितवस्तुरूपेण सा भावनैव भवेत् । भावितं सर्वसाधारणं भायादित्यर्थः। स्वेनानुभूतत्वादाह—सत्यमेतदिति । ॥ ८२ ॥ निदर्शनमुदाहरणम् । ते त्वया । शैलान्तस्तावान् प्रदेशः स्यादिति तत्र शङ्का भवेदत इमं शैलं परिक्रम्य पश्याव इत्याह—इममिति ॥ ८३ ॥ शैलं परिचक्रमे । राज्ञा सह परिक्रम्य । ततः समेत्य स्वस्थानमागत्य ॥ ८४ ॥ मेधावी शिष्यबोधनेऽति कुशलः । गव्यूतिः क्रोशयुगम् ॥ ८५ ॥ स्फुटः जाग्रत्सदृशः । एष शैलाऽवभासः सत्यः मिथ्यात्मक एव वा विवेचयेति शेषः ॥ ८६ ॥ पादगव्यूतिपरिमितशैलेऽनन्तदेशस्य विरुद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्सरास्त्वनुभूतास्ते सत्यासत्ये विवेचय ॥ ८७ ॥
विवेचनं नास्य भवेत् स्वप्नयोर्भिन्नयोरिव ।
तस्मादेतद्विद्धि जगद्भावनामात्रसारकम् ॥ ८८ ॥
अभाव्यमानं चैतत्तु लीयेत क्षणमात्रतः ।
तस्माच्छोकं जहि नृपावेक्ष्य स्वाप्नसमं जगत् ॥८९॥
स्वाप्नचित्रभित्तिभूतं स्वात्मानं संविदात्मकम् ।
दर्पणप्रतिमं मत्वा संस्थितोऽसि यथा तथा ॥ ९० ॥

त्वान्नैतद्विवेचयितुं शक्यम्, एवं कालस्यापि विरुद्धत्वादित्याह—शैललोक इति । बहिःपादगव्यूतिमात्रो देशः द्वादशार्बुदमितश्च कालः । अन्तरनन्तरो देशो दिनैकात्मकः कालश्चेति परस्परविरुद्धस्वरूपयोर्मध्ये सत्यासत्ये विवेचय ॥ ८७ ॥ ननु बाह्यविरुद्धमान्तरमसत्यमिति चेदुभयोर्भासनस्य तुल्यत्वेनान्तरविरुद्धं बाह्यमपि असत्यमिति वक्तुं शक्यमिति नैतन्निर्णयः शक्यक्रिय इति सदृष्टान्तमाह—विवेचनमिति । भावनामात्रसारकम् स्वप्नवद् भावनामात्रस्वरूपं न ततोऽधिकं किञ्चिदित्यर्थः ॥ ८८ ॥ मया अभाव्यमानमेतच्छैलजगत् क्षणमात्रेण लीयते । एवं ब्रह्मणाऽभाव्यमानं बाह्यजगदपीति तात्पर्यम् । तस्मात् भावनामात्रसारत्वाज्जगतः ॥ ८९ ॥ कथं शोकं त्यजामीति चेदाह—स्वाप्नेति । स्वाप्ना ये भावास्ते हि चित्रसदृशाः । चित्रस्य भासमानस्य नासत्यातिरिक्तं स्वरूपमस्तीत्यविवादः । तथा च स्वाप्नचित्रभित्तिभूतं संविदात्मकं स्वात्मानं दर्पणप्रतिमं मत्वा यथा संस्थितोऽसि स्वाप्नबन्धुनाशराज्यलाभे वा यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रच्चित्रदर्पणं चावेक्ष्यात्मानं चिदात्मकम् ।
परमानन्दितस्वान्तो भव शीघ्रं महीपते ! ॥ ९१ ॥

इति श्रीज्ञानखण्डे शैललोकदर्शनं
नाम त्रयोदशोऽध्यायः ॥

न शोचसि न प्रहृष्यसि च ॥ ९० ॥ तथाऽवेहीत्यन्वयः । स्वाप्नजाग्रतोरत्यन्तसाम्यात् स्वाप्नभाववज्जाग्रद्भावा अपि चिदात्मदर्पणप्रतिबिम्बरूपा एवेति निश्चित्य स्वाप्नशोकाद्यैरस्पृष्ट इव जाग्रच्छोकाद्यैरस्पृष्टः। अत एव निखिलवासनाप्रहाणमात्रेण निःसारितोदकघटान्तरभिव्यक्ताकाशवत् वासनातिरिक्तस्वान्ताभिव्यक्तात्मानन्दो भवेति भावः ॥ ९१ ॥

इति श्रीतात्पर्यदीपिकायां त्रयोदशोऽध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशोऽध्यायः ।

इत्याकर्ण्य मुनिवचो विचार्य शुभया धिया ।
जगत्स्थितिं स्वाप्नसमां ज्ञात्वा शोकं जहौ द्रुतम् ॥१॥
धैर्यमालम्ब्य निःशोको भूयोऽपृच्छन्मुनेः सुतम् ।
मुनिपुत्र ! महाबुद्धे ! त्वं पराऽवरदर्शनः ॥ २ ॥
ततोऽप्यविदितं किञ्चिन्मन्ये स्यादिति लेशतः ।
पृच्छामि यदहं तन्मे कृपया वक्तुमर्हसि ॥ ३ ॥
भावनाप्रभवं ह्येतत् सर्वं वदसि तत् कथम् !
मया भूयो भाविते च न बहिः सर्वथा भवेत् ॥ ४ ॥
त्वया तु भावनासिध्या शैललोकः प्रकल्पितः ।

अत्राऽध्याये साधुपद्यैर्भावनामात्रकं जगत् ।
भावनायाः सिद्धिमपि प्राह तत्त्वान्यपि क्रमात् ॥ १ ॥

जगद्भावनामात्रसारमित्याकर्ण्य शुभया सतर्कयुतया धिया ॥ १ ॥ जगतः स्वाप्नसाम्यज्ञानेऽपि वासनादार्ढ्याद् भूयः शोक आपतति अत आह–धैर्येति । धैर्यं धृतिः । जगतः स्वाप्नतुल्यत्वाभिमानात्यागः । परावरदर्शनः सेन्द्रियातीन्द्रियज्ञः ॥ २ ॥ अत एवाह–तत इति । लेशतोऽप्यविदितमिति योजना ॥ ३ ॥ सर्वं जगत् । तज्जगन्मया भूयो भावितमपि बहिः सर्वसाधारणं सर्वथा न भवेत् तत् कथमिति योजना ॥ ४ ॥ त्वया तु भाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाऽपि देशः कालश्च युगपद्विविधः कथम् ॥ ५ ॥
तत्राऽसत्यमन्यतरत् कतमं तन्ममेरय ।
इति पृष्टो मुनिसुतः प्रवक्तुमुपचक्रमे ॥ ६ ॥
सङ्कल्पो भावना प्रोक्ता सिद्धाऽसिद्धेति सा द्विधा ।
सिद्धिर्विकल्पासम्भेदो(ऽ)विकल्पस्त्वेकनिष्ठितेः ॥७॥

नासिध्या कल्पितः कथंविधा सा भावनासिद्धिरिति पूर्वाऽध्याये सङ्क्षेपेणोक्तस्य सिद्धिहेतोर्विस्तरप्रश्न इति तात्पर्यम् । प्रश्नान्तरम्–अथाऽपीति । युगपदिति । एकस्मिन्नेव काले एक एव देशः कालश्च विविधः कथमित्यर्थः ॥ ५ ॥ तत्र दीर्घादीर्घत्वाभ्यां भासमानयोर्मध्ये । यद्यपि पूर्वपूर्वाऽध्याये द्वयोः स्वाप्नतुल्यत्वमुक्तं तथापि जाग्रत्प्रपञ्चे सत्यवासनाविष्टो भूयः पृच्छति–अन्यतरत् सत्यं भवेदिति ॥ ६ क्रमेणोत्तरमाह–सङ्कल्प इति । भावना हि सङ्कल्पः । सङ्कल्पो नामेदमीदृशमित्यादिर्मानस उल्लेखः । सा भावना । तस्याः केयं सिद्धिरिति चेदाह—सिद्धिरिति । इदमीदृगिति सङ्कल्पधारामध्ये नेदमीदृगिति विरुद्धकल्पनया असम्भेदः अयोगः । एवं विकल्पासम्भेदसम्पादनाय विकल्पकारणमाह—विकल्पस्त्विति । एकनिष्ठितेः भवेदिति शेषः । एकत्र निष्ठितेः सत्सत्त्वग्रहादित्यर्थः । अयं भावः—बाह्यसृष्टौ सत्यत्वग्रहात् स्वमानससृष्टावसत्यत्वविकल्पोदयः यावदेवं विकल्पसम्भेदो भावनायास्तावन्न सिद्धिरिति । यद्वा विकल्पासम्भेदे उपायं वक्तुमाह- अविकल्पस्त्विति । नास्ति विकल्पो यस्य स सङ्कल्प इत्यर्थः । एकनिष्ठितेः एकत्र सङ्कल्पविषयमात्रे नितरां मनसः स्थितेः । सङ्कल्पवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मभावनया पश्य जातं जगदिदं ननु ।
एतन् सर्वैः सत्यरूपं भावितं सुदृढत्वतः ॥ ८ ॥
तथा स्वसङ्कल्पभवे नास्ति कस्याऽपि भावना ।
विकल्पसम्भेद एषोऽसिद्धौ तस्माद्विभावना ॥ ९ ॥
भावनायाः सिद्धिरत्र बहुधा संस्थिता भवेत् ।
जन्मना मणिना तद्वदौषधेन च योगतः ॥ १० ॥
तपसा मन्त्रसिद्ध्या च वरेण च भवेन्नृप ।
जन्मना ब्रह्मणः सा वै मणिना यक्षरक्षसाम् ॥ ११ ॥
औषधेन तु देवानां योगिनां योगतो भवेत् ।
तपसा तापसानां सा मान्त्रिकाणां तु मन्त्रतः ॥१२॥

षयान्मनसोऽप्रचलनेऽविकल्पः सङ्कल्पो भवेदिति भावः ॥ ७ ॥ यथा वा विकल्पसङ्कल्पात्मकसिद्धभावनाभावितं सर्वसाधारणं भासते । तत्र च यः कश्चिन्नेदं सत्यमित्यविकल्पसङ्कल्पपरो भवेत्तं प्रति तद्दृश्यं तथैव भवेत् । अत एवाह–ब्रह्मेति । ब्रह्मणश्चतुर्मुखस्य सिद्धभावनयेदं जगज्जातम् । एतज्जगत् सर्वैः प्रमातृभिरनेकजन्माभ्यासात् सुदृढत्वतः सत्यरूपं भावितमतः सर्वसाधारणं सत्यत्वेन भासत इति शेषः ॥ ८ ॥ तथा ब्रह्मसृष्ट इव । तत्र स्वसङ्कल्पभवे जगति सत्यत्वभावना न कस्याऽपि । एष तावक एव नेदं सत्यमिति यो विकल्पस्तत्सम्भेदोऽस्ति तस्मात्ते भावना असिद्धा ॥ ९ ॥ कथं भावनासिद्धिर्ब्रह्मादीनामिति चेदाह–भावनाया इति । अत्र जगति ॥१०॥ कस्य कीदृशी भावनासिद्धिरित्येतदाह–जन्मनेति । सा भावनासिद्धिः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वकर्ममुखानां च वरप्राप्त्या हि साऽऽभवत् ।
सङ्कल्पितं तथा भाव्यं पूर्वविस्मरणे सति ॥ १३ ॥
स्थिरं तावद्भवत्येव यावत् पूर्वं न हि स्मरेत् ।
एवमेव निर्विकल्पभावना यदि सुस्थिरा ॥ १४ ॥
अनिच्छया विकल्पस्य यावत् सम्भेदनं न हि ।
तावत् सा भावना सिद्धा साधयेद्धै महाफलम् ॥१५॥
सम्भेदात्तु विकल्पेन न सिद्धा तव भावना ।

औषधेन अमृतेन ॥ १२ ॥ विश्वकर्ममुखा विश्वकर्मप्रभृतयः । भावनासाधनप्रकारमाह—सङ्कल्पितमिति । सङ्कल्पनमित्यर्थः । तथाभाव्यं तथाकर्त्तव्यम् । पूर्वविस्मरणे सति यथा स्थिरं भवेदिति शेषः । सङ्कल्पस्य पूर्वमारम्भः तस्य मया सङ्कल्प इत्थं कृत इत्यस्य विस्मरणे सति सङ्कल्पनं स्थिरं भवेत् । एवं सङ्कल्पनं कर्त्तव्यमिति भावः ॥ १३ ॥ एवं पूर्वविस्मरणमेव भावनासिद्धिसम्पादकमित्याह—स्थिरमिति । पूर्वं न स्मरन् सङ्कल्पमेवानुवर्त्तयेत् । एवं चिराऽभ्यासेन यावत् पूर्वं न स्मरेत् तावद् भावनं स्थिरं भवतीति भावः । एवमेव निरन्तराभ्यासेनैव निर्विकल्पभावना विरुद्धविकल्पासम्भिन्ना भावना यदि सुस्थिरा तदा महाफलं साधयेदिति व्यवहितेन सम्बन्धः ॥ १४ ॥ ननु कियत्कालं सुस्थैर्येण भावना सिद्धा स्यादित्याशङ्क्याह—अनिच्छयेति । विरुद्धविकल्पसम्भेदोऽनिच्छया नैव भवेदिति सुस्थिरा यदा तदा भावना सिद्धेत्यर्थः । अनिच्छया यावद्विकल्पसम्भेदो नास्ति तावत् सिद्धा भावना महाफलं ब्रह्माण्डादिकं सर्वसाधारणं साधयेत् ॥ १५ ॥ तत्र तु विकल्पसम्भेदाद्भावना न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावनां साधय क्षिप्रं यदि प्रष्टुं समीहसि ॥ १६ ॥
शृणु राजन् ! देशकालद्वैविध्यं वदतो मम ।
अव्युत्पन्नोऽसि लोकस्य व्यवहारैस्ततस्तव ॥ १७ ॥
एतच्चित्रं भासते वै शृणु सम्यग् ब्रवीमि ते ।
जगद्भावस्वभावोऽयं विविधत्वेन भासनम् ॥ १८ ॥
एक एव हि सर्वस्य प्रकाशो द्विविधः स्थितः ।
दिवान्धानामन्धकार इतरेषां तु भासकः ॥ १९ ॥
जलं मनुष्यपश्वादेः श्वासस्य प्रतिरोधकम् ।
मत्स्यादीनां बहिः श्वासप्रतिरोधो जलेन हि ॥२०॥
अग्निर्दहति मर्त्यादींस्तं भक्षयति तित्तिरिः ।
वह्निर्नश्यति तोयेन स जले चलति क्वचित् ॥ २१ ॥
एवं सर्वे जागतास्तु भावा द्वैरूप्यतः स्थिताः ॥
एवं सेन्द्रियवृत्तान्तास्त्वन्ये केऽपि निरिन्द्रियाः ॥२२॥

सिद्धेत्याह—सम्भेदादिति ॥ १६ ॥ एवं प्रथमप्रश्नोत्तरमुक्त्वा द्वितीयप्रश्नोत्तरमाह—शृण्विति । तवैतच्चित्रं भासत इति सम्बन्धः ॥ १७ ॥ एतत् एकदैव देशकालयोर्दीर्घत्वं ह्रस्वत्वं च । अत्र कारणं ब्रवीमि । भावस्य विरुद्धत्वेन भासनं स्वभाव एव ॥१८॥ कुत एवं विदितमिति चेद् भूयो दर्शनादिति वक्तुं कांश्चित्तादृशान् भावानुदाहरति—एक एवेति । द्वैविध्यमेवाह—दिवान्धानामिति ॥ १९ ॥ स्वस्मिन्निमग्नमनुष्यपश्वादेः । बहिः निर्जले देशे ॥ २० ॥ तित्तिरिर्भक्षयति तं न दहति । क्वचित् वडवानलकुण्डादौ ॥ २१ ॥ विरुद्धाद्विरूपतया सर्वे भावाः स्थिताः । तत्र केचित् प्रसिद्धाः । अन्येऽपि अप्रसिद्धाः भूम्यादयो मर्त्यानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वभावतो विरुद्धा वै शतशोऽथ सहस्रशः ।
अत्रोपपत्तिं वक्ष्यामि समाहितमनाः शृणु ॥ २३ ॥
एते हि चाक्षुषा भावाश्चक्षुर्विकृतिमात्रकाः ।
न चाक्षुषादंशतोऽन्यद्दृश्यमस्ति कचिद्बहिः ॥२४॥
यथा पित्तप्रदुष्टाक्षो बहिः पीतं प्रपश्यति ।
यथा तैमिरिकोऽन्यस्तु पश्यत्येकं द्विधा स्थितम् ॥२५॥
एवं विचित्रदुष्टाक्षाः पश्यन्ति विविधं जगत् ।
अस्ति पूर्वसमुद्रस्य मध्ये करण्डकाह्वयः ॥ २६ ॥
द्वीपस्तत्र जना भावान् रक्तान् पश्यन्ति वै सदा ।
एवं रमणकद्वीपे सदा पश्यन्ति वै जनाः ॥ २७ ॥
व्यत्यस्तमूर्ध्वाधरतो निखिलं भावमण्डलम् ॥
एवमन्येषु द्वीपेषु विविधा भावमण्डलम् ॥ २८ ॥
जना नेत्रस्वभावेन पश्यन्ति खलु सर्वदा ।

प्रतिरोधकाः पिशाचादीनामप्रतिरोधकाः बुद्धिमद्भिर्ज्ञेयाः । सेन्द्रियाः अपरोक्षाः निरिन्द्रियाः परोक्षाः भावानां विरुद्धस्वभावाः ॥ २२ ॥ निरिन्द्रियाः सेन्द्रियाश्च भावा अन्येऽपि विरुद्धस्वभावाः सन्तीत्याह–स्वभावत इति । कथमेकस्य विरुद्धोभयरूपतेति चेदुपपत्तिपूर्वकं वक्तुमुपक्रमते–अत्रेति ॥ २३ ॥ भावानां बहिरसत्त्वान्नास्ति विरोध इति वदति–एते इति ॥२४॥ अत्र दृष्टान्तः–यथेति । तैमिरिकः तिमिरदोषोपहतनेत्रः ॥२५॥ एवमन्येऽपि दृष्टिदोषवैचित्र्याद्विविधं जगत् पश्यन्तीति सोदाहरणमाह—एवमिति ॥ २६ ॥ सर्वभावान् रक्तान् पश्यन्ति ॥ २७ ॥ व्यत्यस्तमधोमस्तकमूर्ध्वपादमित्यादि ॥ २८ ॥ तन्ने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र तेषामन्यथा तु दृश्यते यदि कुत्रचित् ॥ २९ ॥
नेत्रं सुसाध्यौषधेन पश्यन्ति प्राग्वदेव हि ।
अतस्तु चक्षुषा यावद् दृश्यते जगतीतले ॥ ३० ॥
तावद्भवेच्चाक्षुषोंऽशः पीतवत् पीतचक्षुषः ।
एवं घ्राणादीन्द्रियाणामंशा गन्धादयोऽपि हि ॥३१॥
मानसाश्च मनोमात्रास्तथैवाऽखिलजागताः ।
क्रमोऽप्यक्षस्वभावोत्थस्ततः किञ्चिद् बहिर्न हि ॥३२॥

त्रस्य न स दोषः किं तु स्वभाव एवेत्युपपादयति–तत्रेति । तेषु द्वीपेषु तेषां जनानां यद्यरक्तमव्यत्यस्तं वा दृश्यते तदा तैः स्वनेत्रमौषधैरञ्जनाद्यैरदुष्टं संसाध्य प्राग्वद्रक्तं व्यत्यस्तं च पश्यन्तीत्यर्थः ॥ २९ ॥ ३० ॥ पित्तचक्षुषो यथा दृश्यमानः पीतवर्णश्चाक्षुषोंऽशस्तथा पुरुषस्य चक्षुषा यावद् दृश्यते तावत् सर्वमपि चाक्षुषोंऽश एव । एवं चक्षुर्विषयस्य तदंशत्वं प्रसाध्याऽन्येन्द्रियविषयेऽप्येतदतिदिशति–एवमिति । येनेन्द्रियेण यत् प्रकाशते तस्य तदिन्द्रियांशत्वमिति भावः ॥ ३१ ॥ एवं मनोविषयाणामपि मनोंऽशत्वमित्याह–मानसाश्चेति तथा च देशक्रमस्य कालक्रमस्य क्रियाक्रमस्य च चाक्षुषत्वाच्चक्षुरंशत्वमित्याह–क्रमोऽपीति । क्रमः पौर्वापर्येणावस्थितत्वम् । तथा च द्रव्यक्रमो हि दिक् । प्रयागात् काशी पूर्वेति पूर्वव्यवहारविषयः क्रम एव । एवं क्रियागतः क्रमः कालः । कासांचित् क्रियाणां पौर्वापर्यावस्थितत्वरूपक्रमस्यैव घटिकादिकालव्यवहारविषयत्वं ज्ञेयम् । एवं च यद्यत् देशः कालो वा यथा यथा महत्त्वेनाल्पत्वेन वा भासते स सर्वोऽपि तत्तत्कालिकचाक्षुषोंऽश एव विभिन्न इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणु राजन् ! बहिरिति यल्लोके भाति केवलम् ।
तदाद्यं सर्वजगतां जगच्चित्रस्थभित्तिवत् ॥ ३३ ॥
तस्य बाह्यस्य वक्तव्यमपादानं ध्रुवं ननु ।
शरीरं स्यादपादानं नेतरद्भवितुं क्षमम् ॥ ३४ ॥
तस्याऽपि बहिराभासादुपादानं कथं नु तत् ।
पर्वताद् बहिरित्युक्ते पर्वतो न बहिर्भवेत् ॥ ३५ ॥
यथा घटो भासते हि प्राहुस्तद्वच्छरीरकम् ।
भासकाद् बहिरित्येवं वक्तुं वाऽपि न सम्भवेत्॥३६॥
दीपसूर्यालोकबहिर्गतान्तं न हि भासनम् ।

नैकस्य विरुद्धोभयरूपतादोष इति भावः ॥ ३२ ॥ एवं पित्तादिदुष्टाक्षाणां भासमानपित्तादिवर्णदृष्टान्तेन दृश्यं बहिर्नास्तीति प्रसाध्य बहिर्वस्त्वंशसम्भवादपि तन्नास्तीति साधयितुमुपक्रमते-शृण्विति । चित्रस्य भित्तिरिव बहिःपदार्थः जगच्चित्रस्याश्रयत्वात् कारणत्वाच्चाद्यमित्यर्थः ॥ ३३ ॥ तस्य प्रोक्तस्य । बाह्यस्य बहिःपदार्थस्य ध्रुवमवधिभूतमपादानं वक्तव्यं कस्माद्बहिरित्यपादानस्याऽकाङ्क्षितत्वात् । घटादेः शरीरादन्यस्यापि बाह्यत्वेनाऽपादानत्वासम्भवाच्छरीरमेवाऽपादानं स्यादिति सम्भावयति–शरीरमिति ॥ ३४ ॥ शरीरस्यापि बहिष्ठत्वेनाऽभासनान्नापादानतेत्याह–तस्याऽपीति । अत्र दृष्टान्तः–पर्वतादिति । पर्वतो न बहिष्ठो भवेदित्यर्थः ॥ ३५ ॥ शरीरस्य बहिष्ठत्वे दृष्टान्तमाह–यथेति । अथ घटादिशरीरान्तर्भासक आत्मैवापादानमिति शङ्कते–भासकादिति । इत्येवं वा वक्तुमिति योजना ॥ ३६ ॥ ननु यदि भासक अपादानं तर्हि सूर्यालोकाद्बहिर्गतानामन्धकारस्था-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतस्तु भासकस्यान्तर्भास्यमस्तीति युज्यते ॥ ३७ ॥
भासकं तु न देहादिर्भास्यत्वात् पर्वतादिवत् ।
न सर्वथा यत्तु भास्यं भासकं तद्धि युज्यते ॥ ३८ ॥
भासकस्याऽपि भास्यत्वे भासकस्याऽनवस्थितिः ।
स्वस्यैव भासकत्वं च भास्यत्वं न हि युज्यते ॥३९॥
अतस्तु भासकं शुद्धं भासकैकस्वरूपकम् ।
तच्च भारूपमेवेह पूर्णमेकरसात्मकम् ॥ ४० ॥

नामभासनामिव भासकाद्बहिष्ठानां भासनमेव न भवेदतो भासकान्तरेव भास्यमभ्युपेयम् । तथा च बहिष्ठानां भासक आत्मा नापादानमित्याह—दीपेत्यादि ॥ ३७ ॥ एतावता बहिःपदार्थस्यापादानानिरूपणाद्दर्पणेऽतिविततगगनाभासवद्भासकान्तरेव बहिःपदार्थावभास इति सिद्धम् । अथ भासकमात्रात्मता भास्यस्येति हेतोश्च भास्यस्य बहिःपदार्थस्य न भासकमपादानमिति वक्तुं भासकस्वरूपं विवेचयति—भासकं त्विति । नन्वस्तु स्थूलोऽहं पश्यामीत्यनुभवाद्देहस्य भास्यत्वं भासकत्वं चेति चेदाह न सर्वथेति ॥ ॥ ३८ ॥ ननु भास्यस्य भासकत्वे का हानिरिति चेत् यदि एक एव देहः स्वात्मनः स्वयम्बोधो वेदकश्चेति चेदकस्य कर्त्तृकर्मत्वविरोधः देहान्तरस्थभास्यो भासकश्चेति स्वस्याभासमानस्य भासकत्वासिद्धेर्भासकदेहानां परम्परया भासकान्तराऽपेक्षणान्मूलक्षतिकरी भासकानवस्थेत्याह—भासकस्येति । न हि युज्यते इति । कर्त्तृकर्मत्वविरोधादिति शेषः ॥ ३९ ॥ अतः अनवस्थादिदोषात् । शुद्धम् अभास्यमित्यर्थः । एतस्यैव स्पष्टोक्तिर्भासकैकस्वरूपमिति । ननु भासकं भासनाक्रियावत् क्रिया,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन व्याप्ता देशकाला भासनात्तस्य पूर्णता ।
अभारूपस्य चाऽभानाद्भारूपैकरसं हि तत् ॥ ४१ ॥

क्रिया चानित्यो धर्मः, तथा च भासकत्वस्य कालपरिच्छिन्नत्वात् कथं भासकैकस्वरूपकमिति चेदाह—तच्चेति । भासकमित्यर्थः । भारूपमेवेहेति । लोकवदिह न कर्त्तृक्रिययोर्भेदः । किं तु क्रियात्मक एव कर्त्तेत्यर्थः । दर्पणप्रतिबिम्बवत् कार्यस्य स्वस्वरूपानतिरिक्तत्वेन स्वरूपातिरिक्तक्रियानुपयोग इति तात्पर्यम् । अत एव पूर्णमेकरसात्मकं च । एकरसः वस्त्वन्तरासम्भिन्न आत्मा यस्य ॥ ॥ ४० ॥ तेन भारूपभासकेन कुत इति चेदाह—भासनादिति । सर्वत्र भासनाद्देशकाला व्याप्ता इत्यर्थः । अत एव तस्य पूर्णता । न हि घटपटयोरिव भासकभास्ययोर्भासनम् । किं तु दर्पणप्रतिबिम्बयोरिव । तथा च दर्पणस्य प्रतिबिम्बव्यापकत्वमिव भासकस्य भास्यव्यापकत्वमिति भावः । ननु दर्पणप्रतिबिम्बन्यायेन भास्यभासकानन्यत्वमलौकिकं कुतः कल्प्यत इति चेदाह—अभारूपस्येति । भारूपतादात्म्यानापन्नस्येत्यर्थः । अभानादिति । यदि भास्यस्य भारूपभासकानन्यत्वं नोच्यते तदा तस्य भानमेव न स्यादित्यर्थः । अतो भास्यं भारूपैकरसमेव । अयमत्राऽभिप्रायः—यदि भास्यं भारूपबहिर्गतं तर्हि कथं तस्य भासनमुपपद्यते । न हि भासनं नीलादिरिव भास्यधर्मः सर्वदा भासनप्रसक्तेः । मम भासत इति व्यवहारानुपपत्तेश्च । अन्यथा हि मम नील इति व्यवहारोऽपि स्यात् । ननु घटादौ सौरालोकवद्भास्ये भासनमन्यत उपनिपतितम् । तथा चान्यभासनसम्बन्धाद्भास्यभासनमुपपद्यत इति । स्यादेतत् । घटसौरालो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्बहिर्वा यत् किञ्चिद्भारूपोदरसंस्थितम् ।
अतस्तन्नापादानं स्यात् शृङ्गस्येव हि पर्वतः ॥ ४२ ॥
एवंविधं हि भारूपं ग्रस्तसर्वप्रपञ्चकम् ।
भाति स्वतन्त्रतः स्वस्मिन् सर्वत्राऽपि च सर्वदा ॥ ४३ ॥

कयोः संयोग इव भास्यभासकयोस्तृतीयः सम्बन्धो यदि भवेत् । स एव न सम्भवति । तथा हि किं स सम्बन्धो भास्यात्मक उत भासकात्मक आहोस्विदुभयात्मकोऽथवाऽनुभयात्मकः ? भास्यात्मकत्वे तद्भासनाय सम्बन्धान्तराऽपेक्षायामनवस्था । भासकात्मकत्वे भासकस्य भानमात्ररूपत्वेन भासनस्वरूपे भेदाऽ'नुपपत्तेर्भूयो निरूपितत्वात् स्वस्य सम्बन्धताऽनुपपत्तिः । नोभयात्मकत्वं भासनभास्ययोः चिज्जडात्मत्वेनैकस्य तदुभयरूपताविरोधात् । नाऽप्यनुभयात्मकत्वम् । अपसिद्धान्तात् । अनुभयात्मकं ह्यनिर्वचनीयम् । अनिर्वचनीयवादिनो हि भानात्मकब्रह्मरूपादन्यन्न किंचिदभ्युपगच्छन्ति । ते हि पूर्णे ब्रह्मणि सादृश्यमनिर्वचनीयमाभासमानमभ्युपगच्छन्तो दृश्यस्य दर्पणप्रतिबिम्बतुल्यताभ्युपगतैव । यदाहुः "विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्" इति । तस्माद्दर्पणे प्रतिबिम्बवद्भानान्तरेव भास्यं भासत इति तज्जगदपि दर्पणैकरसात्मकप्रतिबिम्बवत् भारूपैकरसमिति सिद्धम् ॥ ४१ ॥ अत इति । अन्तःपदार्थो बहिःपदार्थो वा यत् किञ्चिदपि भानान्तर्गतमेवेति हेतोः । तत् भासकमात्मरूपम् । यथा पर्वतान्तर्गतशृङ्गविशेषस्य पर्वतो नापादानं तथेति ॥ ४२ ॥ एवमखिलजगच्चित्रभित्तिभूतबहिःपदार्थापादानासिद्ध्याऽसिद्ध इति भित्त्यसिद्धौ चित्रासिद्धिरिव देश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत् परा चितिः प्रोक्ता त्रिपुरा परमेश्वरी ।
ब्रह्मेत्याहुर्वेदविदो विष्णुं वैष्णवसत्तमाः ॥ ४४ ॥
शिवं शैवोत्तमाः प्राहुः शक्तिं शक्तिपरायणाः ।
एतद्रूपादृते किञ्चिद् यदि ब्रूयुस्तदल्पकम् ॥ ४५ ॥
तया व्याप्तं तु चिच्छक्त्या दर्पणप्रतिबिम्बवत् ।
तस्य भास्यकृतं भासकत्वं च न स्वतः स्थितम् ॥४६॥

कालादिभास्यरूपासिद्धावज्ञातरज्जौ सर्पजलधाराभूच्छिद्रादिरूपवद्भासकस्यैव भानात्मनो महदल्पदेशकालादिरूपतेति संसाध्य सम्प्रति गगनान्तर्भासमानभिन्नभाववद्भानान्तरमपि भास्यं भिन्नमेव कुतो न भवेदित्याशङ्क्य शमयितुमुपक्रमते–एवंविधमिति । सर्वं स्वोदरे कृत्वा स्थितमित्यर्थः । तदेवाह–ग्रस्तेति । भातीति । सर्वत्र देशे सर्वदा काले स्वतन्त्रतः अन्यानपेक्षं सदैवंविधं भाति ॥४३॥ सर्वेषु शास्त्रेषु एतदेव मुख्यत्वेन प्रतिपादितमित्याह–एतदिति । एतद्भारूपमेव परा चितिः अपरिच्छिन्ना चिच्छक्तिः त्रैपुरे शास्त्रे त्रिपुरा परमेश्वरीत्युच्यते ॥४४॥ शक्तिपरायणाः शाक्ताः । ननु नीलमेघश्यामादिमूर्तिं वैष्णवाद्या मुख्यत्वेनाहुरिति चेदाह–एतदिति । पराचितिरूपं विना यद्यन्यत् किञ्चिन्मुख्यं ब्रूयुस्तर्हि तदल्पकं कालदेशपरिच्छिन्नमेव भवेत् । तस्मात्त्रिपुरादिनाम्नाप्येतदेव मुख्यमिति वक्तव्यमिति भावः ॥ ४५ ॥ ननु ग्रस्तसर्वप्रपञ्चकमित्युक्त्या जगद्व्याप्तिराकाशस्यैव स्यादिति चेन्नेत्याह–तयेति । ननु सर्वस्य जगतः स्वस्वरूपाव्यतिरिक्तत्वेऽपि चितेर्भासकत्वं घटादेर्नीलादिवद्भिन्न एव धर्मः स्यात् । तथा च भारूपस्य चाभानमिति भासकत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्बहिर्वा यत् किञ्चिद्भारूपोदरसंस्थितम् ।
अतस्तन्नापादानं स्यात् शृङ्गस्येव हि पर्वतः ॥ ४२ ॥
एवंविधं हि भारूपं ग्रस्तसर्वप्रपञ्चकम् ।
भाति स्वतन्त्रतः स्वस्मिन् सर्वत्राऽपि च सर्वदा॥४३॥

कयोः संयोग इव भास्यभासकयोस्तृतीयः सम्बन्धो यदि भवेत् । स एव न सम्भवति । तथा हि किं स सम्बन्धो भास्यात्मक उत भासकात्मक आहोस्विदुभयात्मकोऽथवाऽनुभयात्मकः ? भास्यात्मकत्वे तद्भासनाय सम्बन्धान्तराऽपेक्षायामनवस्था । भासकात्मकत्वे भासकस्य भानमात्ररूपत्वेन भासनस्वरूपे भेदाऽनुपपत्तेर्भूयो निरूपितत्वात् स्वस्य सम्बन्धताऽनुपपत्तिः । नोभयात्मकत्वं भासनभास्ययोः चिज्जडात्मत्वेनैकस्य तदुभयरूपताविरोधात् । नाऽप्यनुभयात्मकत्वम् । अपसिद्धान्तात् । अनुभयात्मकं ह्यनिर्वचनीयम् । अनिर्वचनीयवादिनो हि भानात्मकब्रह्मरूपादन्यन्न किंचिदभ्युपगच्छन्ति । ते हि पूर्णे ब्रह्मणि सादृश्यमनिर्वचनीयमाभासमानमभ्युपगच्छन्तो दृश्यस्य दर्पणप्रतिविम्बतुल्यताऽभ्युपगतैव । यदाहुः "विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्" इति । तस्माद्दर्पणे प्रतिबिम्बवद्भानान्तरेव भास्यं भासत इति तज्जगदपि दर्पणैकरसात्मकप्रतिविम्बवत् भारूपैकरसमिति सिद्धम् ॥ ४१ ॥ अत इति । अन्तःपदार्थो वहिःपदार्थो वा यत् किञ्चिदपि भानान्तर्गतमेवेति हेतोः । तत् भासकमात्मरूपम् । यथा पर्वतान्तर्गतशृङ्गविशेषस्य पर्वतो नापादानं तथेति ॥ ४२ ॥ एवमखिलजगच्चित्रभित्तिभूतवहिःपदार्थापादानासिद्ध्याऽसिद्ध इति भित्त्यसिद्धौ चित्रासिद्धिरिव देश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत् परा चितिः प्रोक्ता त्रिपुरा परमेश्वरी ।
ब्रह्मेत्याहुर्वेदविदो विष्णुं वैष्णवसत्तमाः ॥ ४४ ॥
शिवं शैवोत्तमाः प्राहुः शक्तिं शक्तिपरायणाः ।
एतद्रूपादृते किञ्चिद् यदि ब्रूयुस्तदल्पकम् ॥ ४५ ॥
तथा व्याप्तं तु चिच्छक्त्या दर्पणप्रतिबिम्बवत् ।
तस्य भास्यकृतं भासकत्वं च न स्वतः स्थितम् ॥४६॥

कालादिभास्यरूपासिद्धावज्ञातरज्जौ सर्पजलधाराभूच्छिद्रादिरूपवद्भासकस्यैव भानात्मनो महदल्पदेशकालादिरूपतेति संसाध्य सम्प्रति गगनान्तर्भासमानभिन्नभाववद्भानान्तरमपि भास्यं भिन्नमेव कुतो न भवेदित्याशङ्क्य शमयितुमुपक्रमते–एवंविधमिति । सर्वं स्वोदरे कृत्वा स्थितमित्यर्थः । तदेवाह–ग्रस्तेति । भातीति । सर्वत्र देशे सर्वदा काले स्वतन्त्रतः अन्यानपेक्षं सदैवंविधं भाति ॥४३॥ सर्वेषु शास्त्रेषु एतदेव मुख्यत्वेन प्रतिपादितमित्याह–एतदिति । एतद्भारूपमेव परा चितिः अपरिच्छिन्ना चिच्छक्तिः त्रैपुरे शास्त्रे त्रिपुरा परमेश्वरीत्युच्यते ॥४४॥ शक्तिपरायणाः शाक्ताः । ननु नीलमेघश्यामादिमूर्तिं वैष्णवाद्या मुख्यत्वेनाहुरिति चेदाह–एतदिति । पराचितिरूपं विना यद्यन्यत् किञ्चिन्मुख्यं ब्रूयुस्तर्हि तदल्पकं कालदेशपरिच्छिन्नमेव भवेत् । तस्मात्त्रिपुरादिनाम्नाप्येतदेव मुख्यमिति वक्तव्यमिति भावः ॥ ४५ ॥ ननु ग्रस्तसर्वप्रपञ्चकमित्युक्त्या जगद्व्याप्तिराकाशस्यैव स्यादिति चेन्नेत्याह–तयेति । ननु सर्वस्य जगतः स्वस्वरूपाव्यतिरिक्तत्वेऽपि चितेर्भासकत्वं घटादेर्नीलादिवद्विभिन्न एव धर्मः स्यात् । तथा च भारूपस्य चाभानमिति भासकत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भास्यं तु भाननिर्मग्नमादर्शे नगरादिवत् ।
दर्पणे नगरं यद्वद्दर्पणान्नातिरिच्यते ॥ ४७ ॥
तथा चिति जगद्भाति यत्तन्नैवातिरिच्यते ।
दर्पणात्मनि सम्पूर्णे निबिडे चैकरूपिणि ॥ ४८ ॥
यथा हि भिन्नं नगरं सर्वथा नोपपद्यते ।
तथा पूर्णेऽस्तु निबिडे चैकरूपे चिदात्मनि ॥ ४९ ॥

स्याभानप्रसक्तिरिति चेदाह–तस्येति । भानस्येत्यर्थः । तस्य भास्यकृतत्वेनौपाधिकत्वात् स्फटिकस्थजपाकुसुमलौहित्यवत त-दपि प्रतिविम्बात्मकमेवेति भावः ॥ ४६ ॥ तस्मादादर्शे नगरा-दिवत् सर्वं भास्यं भाननिमग्नमेवेत्याह–भास्यं त्विति । दर्पणे भासमाननगरादेर्दर्पणाऽनन्यत्ववच्चिति भासमानस्य प्रपञ्चस्य चिद-व्यतिरिक्तत्वमित्याह–दर्पण इति॥४७॥तथा प्रतिबिम्बत्वेन चिति-वज्जगद्भातीत्यन्वयः । ननु दर्पणप्रतिबिम्बवदेव चिति जगद्भासन-मिति कोऽयं निर्बन्धः गगने जगद्भासनवदेव कुतो नाभ्युपेयते इति चेदाह–दर्पणेति । सम्पूर्णे छिद्ररहिते । निबिडे अशिथिलाव-यवे, एकरूपिणि वस्त्वन्तरासम्भिन्ने सच्छिद्रे हि पृष्ठतः स्थितं भासते । शिथिलावयवे ह्यवयवसन्धिसन्निविष्टं वस्त्वन्तरं भास-ते । वस्तुसमुदाये च समुदितं विचित्रं भासते । दर्पणस्य त्व-नैवंविधत्वाद्दर्पणाद्भिन्नस्य तत्र भानं नोपपद्यते इति भावः ॥४८॥ यथा नोपपद्यते तथोपपत्तिं न समश्नुत इत्यन्वयः । ननु दर्पणे न प्रतिबिम्ब इति कश्चन विशेषः किं तु दर्पणप्रतिरुद्धैः परा-वृत्तैः चाक्षुषरश्मिभिर्बिम्बस्यैव ग्रहणमिति चेन्न । भित्तिप्रतिरु-द्धैरपि तैर्मुखग्रहणप्रसङ्गात् । न च नैर्मल्यं हि प्रतिरोधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS.

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvālī Bhāskara, a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Ed. with Introduction and Index by Gopinath Kaviraj, M.A. Rs. 1–12

No. 2—The Advaita Chintāmaṇi, by Raṅgoji Bhaṭṭa, Ed. with Introduction etc. by Nārâyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1–12

~~No. 3~~—The Vedānta Kalpalatikā, by Madhusūdana Sarasvatī.
Edited with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya. Rs. 1–12

No. 4—The Kusumāñjali Bodhanī, a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A, Rs. 2–0

No. 5—The Rasasāra, a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–4

No. 6—(Pārt I)-The Bhāvanā Viveka by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0–12

No. 6-(Part II)—Ditto Ditto Rs. 0–12

No. 7-(Part I)-Yoginīhṛdaya dīpikā, by Amṛtānanda Nātha, being a Commentary on Yoginīhṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopīnath Kaviraj, M.A. Rs. 1–4

No 7—(Part II) Ditto Rs. 1–8

No. 8—The Kāvyaḍākinī, by Gaṅgānanda Kavīndra.
Ed. with Introduction etc. by Jagannātha S'āstri Hoshing Sāhityopādhyāya, Rs. 0–10–6

No. 9—(Part 1)-The Bhakti Chandrikā, a Commentary on S'āṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a PrefatoryNote by Gopinath Kaviraj, M.A. Rs. 0–15

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

No. 10-(Part I)-The Siddhāntaratna, by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 1-2

No. 10-(Part-II)-The Siddhāntaratna by Baladeva Vidyābhūṣaṇa.
Ed. with Introduction by Gopinath Kaviraj, M. A.

No. 11-The S'rī Vidyā Ratna Sūtras, by Gauḍapāda, with a Commentary by Saṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste Sāhityāchārya. Rs. 0-9

No. 12-The Rasapradīpa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'āstri Khiste Sāhityāchārya. Rs. 1-2

No. 13-The Siddhasiddhānta Saṅgraha, by Balabhadra.
Ed, with Introduction by Gopinath Kaviraj, M. A. Rs. 0-14

No. 14-The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 0-14

No. 15-(Part 1)-The Tripurārahasya. (Jñāna Khaṇḍa)
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A. Rs. 0-14

No. 15-(Part-II)-The Tripurārahasya (Jñānakhaṇḍa) Ed. by Gopinath Kaviraj, M. A.

No. 16-The Kāvya Vilāsa, by Chirañjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jagannātha S'āstri Hoshing Sāhityopādhyāya. Rs. 1-2

No. 17-The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by M. M. Gaṅgānātha Jhā, M. A., D. Litt. Rs. 0-14

No. 18-(Part I)-The Gorakṣa siddhānta Saṅgraha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A. Rs, 0-14

No. 19-(Part. I)-The Prākṛita Prakāśa by Vararuchi with the Prākṛita Sañjivanī by Vasantarāja and the Subodhini by Sadānanda.
Ed. with Introduction etc. by Batuk Nath S'armā, M. A. and Baladeva Upādhyāya, M. A.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its evolution, by Gaṅgānātha Jhā.

(b) The View point of Nyāya Vaiśeṣika Philosophy, by Gopi nathKaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj. Rs. 5

Vol. II—

(a) Paraśurāma Miśra ALIAS Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):—its sources, by Gaṅgānāth Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f) Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Batuka nātha S'armā.

(h) A Seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj

(j) Nyāya Kusumāñjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇā S'āstri Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj. Rs. 5

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(b) Studies in Hindu Law (3) Judicial Procedure: by Gaṅgā nātha Jha.

(c) Theism Ancient India, by Gopinath Kaviraj.

(d) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa by Nīlakamala Bhaṭṭāchārya.

(f) Indian Dramaturgy, by P. N. Pātankar. Rs. 5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Vol. IV—

(a) Studies in Hindu Law (4): Judicial Procedure: by Gaṅgānātha Jhā.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the Ṛgveda Prātiśākhya, by Maṅgala Deva S'āstrī.

(d) Nārāyaṇa's Gaṇita kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Rāmāyanic Age, by Manmatha nātha Roy

(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj,

(g) Discipline by Consequences, by G. L. Sinha.

(h) History of the origin and expansion of the Aryans by A. C. Ganguly.

(i) Punishments in Ancient Indian Schools by G.L. Sinha. Rs. 5

Vol. V.—(In progress)

To be had of
The Superintendent, Government Press,
ALLAHABAD, U. P. (INDIA).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

०८८१५१३

DATE DUE

ACC No

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५२८

कविराज

AUTHOR ~~कविरजी~~ गोपीनाथ

TITLE त्रिपुरारहस्यम् (ज्ञानखण्डम्)

२ भाग.

५२८

a 25
Gop
1927

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu